को
२

श्रीगणपतये नमः॥ दन्तस्तम्बरसंकराग्निमभुवाव क्रान्तरे स्वादरादोर्विंध्ये पनिबिद्धकुम्भविवरन्यस्तं द्विरेफोत्करम्॥ क्री-
डायाप्ययतोः पयोधरयुगं तिर्यक्क्षिपः पश्यतो गौर्यास्नेहविजृम्भितेक्षितेन जयते हैमातुरः स्कन्दयोः॥१॥ लोकस्वान्तघनान्धकार-
पटलध्वंसप्रदीपाङ्कुरा विद्याकल्पलताप्रताननजननेबीजं निजासंगिनां॥ मज्जेमौलिममासतांस्तु विमला मालायमानाक्षि-
रं श्रीलक्ष्मीधरविट्ठरंघ्रिनखज्ञिनोदीतोः परागाः सावः॥२॥ अर्पालंकाराणां मूर्तिरूप स्थितं सारस्य॥ संगृह्णाति स्वेन ज्ञ-
पिबिम्बस्वरोऽन्वेषां॥३॥ भिन्नयो वैध्येयानो भवति विषयो सावविषयोर्बुधानां स्वाधानेनचक्कुतु कमेताद्दशाकृतेः॥ तथापीदं पा-
रिप्लवयति मनो मे सुमहतां निवं धामेकी भवितुमपि संधानूनि वहः॥४॥ अपतेषामुद्देशः॥ उपमानन्वेउपमेः स्यादुपमेयोपमा-
त्प्रेक्षा संदेहरूपकापह्नुतयः॥ श्लेषः समासोक्तिः॥ पोःकानिदर्शनाप्रस्तुतप्रशंसा पर्यायोक्तिशयोक्तिः॥ प्रतिवस्तूपमया सह दृष्टान्तो दी-
पकं तुल्ययोगिता॥ व्यतिरेकस्याक्षेपो विभावना लप विशेषोक्तिः॥ तद्दरूपथासंख्यार्थान्तरैर्विन्यासो विरोधभावोक्तिः॥ व्याजस्तु-
तिसहोक्तिर्विनोक्तिपरिवृत्तिर्भाविकान्यपि च॥ अथ काव्यलिंगपर्यायोदात्ताः समुच्चयस्तद्गुणः॥ पर्यायोपमेयोनन्येपरिकरविक-
तवोक्तिपरिसंख्या॥ कारणमालान्योन्यो त्तरसूक्ष्मसारहृत्यसंगत्याः॥ ससमाधी संम्मे विषमो वधिकास्त्रे प्रत्यनीकमीलितव-
त॥ एकावलिः स्मृतिभ्रमप्रतीपसामान्यवान्विशेषश्च॥ तदतद्गुणावान्याघातः ससृष्टिसंकरौ चेति॥ कथ्यन्त एकषष्टि १-६

रामः
१

ह्रीर्विद्वत्प्रवरैरलंकारः ॥ तत्र यत्किंचित्काव्ये वेतु सादृश्येनोपमीयते ॥ उपमा नाम सा ज्ञेया गुणाकृतिसमाश्रये
तिमरत ॥ तत्प्रकृतिभूतत्वेन सर्वालंकारेष्वभ्यर्हितत्वादुपमा निरूप्यत इति तल्लक्षणमाह ॥ तत्रैकवाक्यवाच्यं सादृश्य
मित्रयोरुपमा ॥ तत्रालंकारेषु मध्ये निरूपणीयेष्वित्यर्थः ॥ उपमेयोपमावारणाय एकेति ॥ अनन्वयोपमावारणाय वाच्ये
ति ॥ अनन्वयव्यावर्तनाय भिन्नेति ॥ फलितार्थस्तु ॥ यत्सादृश्यप्रतियोगितायामुपमेयतावच्छेदकावच्छिन्नत्वस्वाश्रयमात्र
वृत्तिस्वानवच्छेदकधर्मसामानाधिकरण्याभावः सोपमा ॥ मुखं चन्द्र इवेत्यादौ सादृश्यप्रतियोगितायामित्यर्थः ॥ चं
द्र इव मुखमित्यादौ चन्द्रनिष्ठसादृश्यप्रतियोगिताया मुखत्वस्याभावसत्त्वाल्लक्षणसमन्वयः ॥ मुखं मुखमिव ॥ अनन्वयेऽतिव्याप्ति
वारणाय उपमेयतावच्छेदकावच्छिन्नत्वाभाव इति ॥ तत्र तु पमेयतावच्छेदके मुखत्वावच्छिन्नत्वसत्त्वान्न दोषः ॥ व्यतिरेकातिव्या
प्तिवारणाय स्वाश्रयेत्यादि ॥ उभयत्र स्वपदं प्रतियोगितापरं ॥ तत्र तूपमेये यो पमानेऽपकर्षवशान्नियमात्प्रति
योगितास्यय उपमानं तन्मात्रवृत्तिः प्रतियोगितानवच्छेदकस्वधर्मोऽपकर्षप्रयोजकः ॥ तत्सामानाधिकरण्यमेव सा
दृश्यप्रतियोगिताया इति न व्यभिचारः ॥ नचैवमप्युपमानापकर्षहेतुधर्मकव्यतिरेके व्यभिचारः ॥ अलंकारसाक्षाद्वि
भाजकोपाध्यवच्छेदेन तत्पात्वस्याविवक्षितत्वात् ॥ उक्तधर्मस्य तेहाकौपमास्याव्याप्त्यासोऽन्यपादसंभवापत्तेः ॥ चन्द्र इव मु
खमित्यत्रापि चन्द्रमात्रवृत्तिचन्द्रत्वसामानाधिकरण्यं सादृश्यप्रतियोगितायामस्तीत्यसंभववारणाय स्वानवच्छे

श्री·कौ·
२

दकेति ॥ चंद्रत्वस्य तु सादृश्यप्रतियोगितायामवच्छेदकत्वमेवेति न दोषः ॥ तत्रैव तादृशप्रतियोगितानवच्छेदकत्वाद्धृदक
त्वादिधर्मसामान्याधिकरण्यात् ॥ प्रतियोगितायामस्त्येवेत्यसंभवतादवस्थ्यमेवेत्यत उक्तं ॥ स्वाश्रयमात्रवृत्तीति ॥ तन्नापि मा
त्रपर्याप्तत्वस्य च वृत्तकत्वादेरपि चंद्रवृत्तित्वाद्दोष एवेति मात्रेति ॥ तस्योपमेयवृत्तित्वस्यापि सत्त्वात् प्रतियोगितास्वाश्रयमात्र
वृत्तित्वं ॥ न च चंद्रवच्चंद्रो मुखं चरमपदार्थीयभिन्नस्यातिव्याप्तिः ॥ चंद्रनिष्ठसादृश्यप्रतियोगितायाः मुखोपमेयतावच्छेदकावच्छिन्न
त्वाभावस्य सत्त्वात् ... एवं चंद्रनिष्ठ[illegible]सादृश्यप्रतियोगिता चंद्रनिष्ठोपमेयतानिरूपिता मुखनिष्ठोपमेयतानिरूपिता
[illegible] च ॥ न चानयोपमेयेति वाच्यं ॥ अनन्वयोपमासमस्थले वनरूपत्वेनातथात्वात् ॥ न चोपमांशोल्लेखरामस्येव ॥ अ
नन्वयांशे तूपमेयतावच्छेदकावच्छिन्नत्वसत्त्वादेव न दोष इति वाच्यं ॥ प्रतियोगितायाः एकस्यानुक्त्वे न चंद्रनिष्ठोपमेयतानि
रूपितसादृश्यप्रतियोगितायाः मुखनिष्ठोपमेयतानिरूपितसादृश्यप्रतियोगितारूपतया चंद्रनिष्ठोपमेयतानिरूपितसा
दृश्यप्रतियोगितायामपि उपमेयतावच्छेदकावच्छिन्नत्वाभावसत्त्वादतिव्याप्तेर्दुर्वारत्वात् ॥ अनन्वयोपमांशेपि लक्षणाग
मनासंभवाच्च ॥ न च तत्र चंद्रनिष्ठोपमेयतानिरूपिता मुखनिष्ठोपमेयतानिरूपिता च सादृश्यप्रतियोगिताभिन्नेति वाच्यं ॥
प्रतियोगितावच्छेदकभेदादेव प्रतियोगिताभेदात् ॥ अन्यत्र निष्ठस्यैतान्योन्याभावनिरूपितायाः इह निष्ठप्रतियोगि
तायाभेदाभावात् ॥ नन्वेवं चंद्रवृत्तिसादृश्यप्रतियोगितायामुपमे[illegible]तावच्छेदकावच्छिन्नत्वाभावो नास्तीत्यसंभव एवेति
चेत् ॥ मैवं ॥ तदुपमावाचकपदान्वयि चंद्रपदबोध्यायाः एव प्रतियोगितायाः विवक्षितत्वात् ॥ उक्तस्थले त्वेवं विवक्षाया

रामः
२

मप्यतिव्याप्तिस्तदवस्थैवेति चेत्॥ उच्यते॥ तदुपमावाचकपदान्वयि चंद्रपदवाच्यायामुभयविवक्षितसादृश्यप्रतियोगिता
याश्चंद्रभेदाभ्युपगमेन दोषाभावः॥ न चैतदसंभवः॥ प्रतिबिंबप्रतियोगितापक्षेनुपपत्त्यभावात्॥ अत एव चंद्रो न चंद्रनिष्ठ
सादृश्यप्रतियोगीति बाधधीसत्त्वेपि चंद्र इव चंद्रो मुखं चरमस्त्रीयमिति वाक्यान्मुखं चंद्रप्रतियोगिकसादृश्यवदिति बो
धो द्वयोरनुभवसिद्ध इति॥ उपमानोपमेयत्वं चाग्रतत्वेन लोकप्रसिद्धत्वे॥ अतो न प्रतीपे व्यभिचारः॥ एवमुपमेयोपमायामपि
नीतिव्याप्तिः॥ उपमानोपमेययोर्लोकप्रसिद्धयोरेवोपादानमित्यस्याभिमतत्वे न तत्र मुखमिव चंद्र इत्यत्रोपमेयतावच्छेदकी
भूतमुखत्वावच्छिन्नत्वात्सादृश्यप्रतियोगिताया इति दिक्॥ अथैवं चंद्रबिंबादिविषये चेदनादिव चानयोः परस्पराभावितो वक्रो
हित्यसंभावितोपमाहत्युक्तोप[illegible]मायामव्याप्तिः॥ चंद्रप्रभवविषये रप्रसिद्धत्वादिति चेन्न॥ तत्र चंद्रप्रभवविषये वीगुपमाया
विवक्षितत्वात्॥ किंतु यथा चंद्रबिंबादिषूपमसंभावितं तपात्वं मुखोत्पन्नपरुषावागित्युपमास्वीकारादिति न्यायपंचाननादयः॥ ये
वेका संभावितोपमेत्यस्या संभावितोप[illegible]मानेकत्वं नार्थः॥ किंत्वसंभावितं तदुपमायाः साधारणधर्मत्वमेव॥ तथा वे
विषयरूपवचनयोरुपमायां चंद्रवेदनादेर्मुखस्य बिंबप्रतिबिंबभावः॥ तेन चंद्रादिनिष्ठकारणताप्रतियोगिकवी
यत्वाभावप्रकारकज्ञानविशेष्यतापरुषोक्तिरिति पर्यवसितार्थः॥ यत्र तूपमानतावच्छेदकविशिष्टमुपमान
प्रसिद्धं तत्रोत्प्रेक्षैव॥ तदुक्तं रत्नाकरवर्तिना॥ यदायमुपमानांशो लोकतः सिद्धिमृच्छति॥ तदोपमैव येनैव शब्दः सादृश्य
वाचकः॥ यदा तु न तथायं लोकाद्सिद्धः प्रकल्पितः॥ तदोत्प्रेक्षैव येनैव शब्दः संभावनापर इति॥ एतेन स्वतःसि

कौ
३

द्धेन भिन्नेन समं तेन न वधर्मतः साम्यमनन्वये न वर्णस्य वाच्यं वेदं कदोपमेति विद्यानाथीयोपमालक्षणमनूद्य॥ स्वतःसि
द्धत्वेनेन नोत्प्रेक्षायां व्यभिचारवारणाय॥ न नित्यमभिन्नान्यपि प्रसरंती नित्यक्षालनभः क्षोणितलावतीर्णः॥ आनंदयन्निंदु
रिव स्वधाम्ना विभाति लोके नवकाकतीन्द्रः॥ इति तद्वदुत्प्रेक्षोदाहरणे उपमानस्येन्दोः स्वतःसिद्धत्वात्॥ इंदुः क्षोणितलाव
तीर्णत्वाकारेण कविकल्पित इति चेत् तर्हि चंद्रबिंबादिव विषमित्याद्युपमायामव्याप्तिरिति चित्रमीमांसायां दीक्षि
तोक्तदूषणमयासं॥ तत्र भूतलावतीर्णत्वविशिष्टचंद्रस्य स्वतःसिद्धत्वात्॥ चंद्रबिंबजन्यविषत्वं नोपमानतावच्छे
दकमित्यस्य व्यवस्थापितत्वाच्च॥ यदपि तेनोक्तं॥ उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगंगापयसः पतेतां॥ तेनोपमीये
त तमालनीलमामुक्तमुक्तालतमस्य वक्षः॥ इत्यादौ विशेष्यस्यापि कविकल्पितत्वादव्याप्तिरिति॥ तदप्यसत्॥ तत्रातिशयोक्ते
रेवांगीकारात्॥ प्रवाहस्य स्वतःसिद्धत्वेन पृथक्त्वेनैतस्यैव कविकल्पितत्वेन विशेष्यस्यापि कविकल्पितत्वादित्युक्तेरसंग
तत्वाच्च॥ यच्चोक्तं नैव भिन्नेष्वनन्वय[illegible]व[illegible]ता[illegible]वधि॥ अनंतरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातं॥ एको हि दो
षो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवांकः॥ इत्युपपादकोपमायामव्याप्तिः॥ अत्रोपमेयभूतानामंककिरणा
दीनामुपमानभूतदोषगुणाभिन्नत्वात्॥ दोषगुणानां सामान्यत्वादंककिरणानां च तद्विशेषत्वात्॥ न चोपमेयता
वच्छेदकभिन्नत्वमुपमानतावच्छेदके विशेषणं॥ अत्र दोषकत्वादीनां भेदस्यैवेति वाच्यं॥ अनवरतकनकवितरण
घृतजललवकरतरंगितार्थिततेः॥ भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमला॥ इति रशनोपमायामव्या

रामः
३

ते:॥ मतित्वादुपमानतावच्छेदकानामुपमेयतावच्छेदकभिन्नत्वाभावात॥ उपमेयोपमायामुपमानतावच्छे-
दकयोर्द्वयोरपि तद्भिन्नत्वाभावादुक्तविशेषणे॥ नैवं तद्धर्मिवारंवारंशो दृष्टकद्वेत्यस्यैव पर्य्यापत्तेः॥ न च स्वोप-
मेयतावच्छेदकभिन्नधर्मावच्छिन्नत्वमुपमानस्य विवक्षितं॥ मशिरितिरिव मतिरित्यत्र वोपमानां भिन्नत्वादुपमे-
यतावच्छेदकमतित्वाद्यन्यत्वं न मशिरितित्वादीनामिति न दोष इति वाच्यं॥ उपादेरेतस्य सहसा सरम्भिस्त्वच्छास्व-
यं निर्मितमातपत्रं॥ सततदुकूलादविदूरमौलिरिवमौ पतदुंगङ्गवोत्तमांगे इत्यत्राव्याप्तेः॥ अत्र शिवत्वस्यैवोपमा-
नोपमेयतावच्छेदकत्वात्॥ न चात्रापि दुकूलविशिष्टपरमेश्वरत्वमुपमेयतावच्छेदकं गंगाविशिष्टं तदुपमानता-
वच्छेदकमिति विशेष इति वाच्यं॥ द्वारंद्वारमटन्निक्षुः शिक्षस्तेषु न याचते॥ अदत्वा मादृशो मा भूद्दत्वा त्वं त्वादृशो
भवेत्यत्राव्याप्तेः॥ न चायमनन्वयस्त्वेति वाच्यं॥ तस्य हि द्वितीयसदृशव्यवच्छेदःफलं स चात्र बाधित इति तेरुक्तं॥ तद
प्यसत्॥ उपमानतावच्छेदकतापर्याप्त्यधिकरणस्योपमेयतावच्छेदकतापर्याप्त्यनधिकरणत्वस्य विवक्षितत्वात्॥ त्वं-
त्वादृशो भवेत्यत्र कालादिकृतभेदविवक्षया तदनपायात्॥ अन्यथोपमानत्वस्यैवानुपपत्तेः॥ तथा चैतत्काले तर
कालवृत्तित्वमेतत्कालीनत्वेत्सदृशो भवेत्यर्थः॥ अन्यथैतस्मिन्काले तत्सादृश्यविधानेसिद्धसाधनापत्तेः॥ पर-
पि स्लेषव्यावृत्त्यर्थं धर्मेत दुक्तं॥ तदप्ययुक्तं॥ सकलपुरंदरमेत श्रान्तं संप्रति प्रधाम विवमिवेत्यादि श्लेषेपि

धर्मसाम्यसत्वात्॥ नैवैकत्र कलासाकल्यमन्यत्र च कोलाहलवत्त्वमित्यनुगतधर्मालाभ इति वाच्यं॥ तयोरभेदाध्य
वसायेन धर्मैक्यसंपत्तेः॥ पाश्चायमे सार्थितलंवहारः कृतसांगरागो हरिचंदनेन॥ आभाति वा तातपसानुरक्तः सनि
र्गरोद्गार इवाद्रिराजस्त्यादौ हारनिर्झरयोर्बिंबप्रतिबिंबभावेन साधारण्यस्वीकारात्॥ न च धर्मसाम्यसक
लंकलमित्यादावुपमेव स्यादिति वाच्यं॥ शब्दसाम्यस्योपमात्वस्य दुर्वारत्वात्॥ यथा प्रह्लादनाच्चंद्रः प्रतापात्तपनो य
था॥ तथैव सोभूदन्वर्थो राजा प्रकृतिरंजनादित्यादौ अननुगतार्थशब्दसाम्यस्योपमाप्रदर्शनादिति॥ तदप्यसत्॥ ध
र्मपदस्य प्रसिद्धगुणादिसाम्यस्यैवोपमानत्वे न्यचापि यथा चंद्र इव कलंकि मुखमित्यतदर्थकत्वात्॥ संमत
परेन चोपमानस्यैवासमतस्याव्यावर्त्तनात्॥ धर्मपदस्य शब्देतरपरतया विवक्षितुं शक्यत्वाच्च॥ यदपि अन्येन
वर्ण्यस्येति प्रतीपव्यावर्त्तनार्थं विशेषणं॥ तत्र वर्ण्येन प्रकृतेनाप्यसदृशवर्णनात्र दोष इति॥ तत्र वास्यपदस्य व
र्ण्यात्प्रकृतादन्येनाप्रकृतेनेति यथार्थः॥ तदा इतरापि रक्षांसि पेतुर्वानरकोटिभिः॥ रजांसि समरोत्थानि तच्छो
णितनदीष्विवेति समुच्चितोपमायामव्याप्तिः॥ तत्र समरांगत्वेन रजसां शोणितेषु पतनस्यापि वर्ण्यत्वाद्रजसा
मप्रकृतत्वाभावात्॥ यदि तु स्वयं वर्ण्येनावर्ण्येन वा कृताद्भिद्यशर्प्यापेदन्येनेत्यर्थः॥ तदा स्तुत्युत्कर्षगुणात्वादुप
मानभावमप्यसहमानस्योपमेयत्वे कल्पनात्मके प्रतीपेऽतिव्याप्तिः॥ यथा॥ अहमेव गुरुः सुदारुणानामि

तिहालाहलमास्वनातदृष्यः॥ ननु संतिमवादृशानि भूयांसि वर्णनेस्मिन्नवर्णानि दुर्जनानाम्॥ अत्र वर्ण्यानां दु-
र्जनवचसामप्रकृतेन हालाहलेन साम्यवर्णनादिति॥ तदृष्यसत्॥ सादृश्यप्रयोजकतत्प्रतियोगित्वानुयोगित्व
तद्वद्धर्मैकैतद्धर्मप्रकारकधीविशेष्यत्वेनाविवक्षितत्वस्यैवान्यपदार्थत्वात्॥ उक्तप्रतीपेतु दर्पाभाव
प्रकारकधीविशेष्यत्वेनापि हालाहलस्याविवक्षितत्वात्॥ विवक्षोपाद्यानान्तरधर्मास्तां तत्र सत्वेपि नस्व
तिः॥ नाप्युक्तोपमायामव्याप्तिः॥ वस्तुतोरजसां वर्ण्यत्वेप्युक्तविधानतत्स्यतत्रानवाप्यात्॥ यत्रोक्तं वर्ण्यस्य साम्य
वाच्यमित्यस्य कोर्थः॥ किमन्यप्रतियोगिकत्वेन वर्ण्यस्य साम्यंवाच्यं॥ किंवा यथा॥ कथंचिद्वर्ण्यावर्ण्योभयनि
रूपितं तत्र वर्ण्यानुयोगिकत्वेनेति॥ नाद्यः॥ सरसिजमिदमाननंचतस्याः सममिति चेतसि संमदं विधत्ते इ
त्युभयविश्रान्तसादृश्योपमायामव्याप्तेः॥ न द्वितीयः॥ प्रतीपेत्यव्याप्तेः॥ न तृतीयः॥ वर्ण्यस्य साम्यं वाच्यमित्य
तएव विवक्षितार्थलाभात्॥ अमेनेत्यस्यैव यथ्यीद्विति॥ तदृष्यसत्॥ उक्तविधान्यप्रतियोगिकसादृश्या
धिकरणोपमेयकत्वस्यैव तदर्थत्वात्कस्यापि दोषस्याभावात्॥ सरसिजमित्यत्र हि मुखप्रतियोगिकप
द्मानुयोगिकस्य च पद्मप्रतियोगिकमुखानुयोगिकस्य च साम्यस्य प्रतीतिः॥ तत्र निरुक्तमन्यत्वं पद्मे

अ॰ कौ॰
५

5

स्येव॥ तत्प्रतियोगिकसादृश्याधिकरणं च मुखमिति॥ प्रतीपे तु तादृशान्यत्वे नास्येव॥ अन्यादिपदकदंबे
नैवेतादृशार्थलाभात् अवैयर्थ्यं॥ यदप्युक्तं॥ एकदेशत्वमुपमेयोपमार्थमुपमेयत्वाभिमतप्रतियोगिकसादृ
श्यवर्णनकालीनवह्नित्वसाम्यमित्यर्थकतया निवेशितं॥ तेन खमिव जलं जलमिव खमिति पर्यायप्रवृत्ताय
मुपमेयोपमायामतिव्याप्तिवारणायोपात्तदुक्तं नायुगपद्वृत्तिमिति तेन तावत्संज्ञाः परस्परत्वलाभादिरोहितां तूप्र
स्फुरमानपद्मेतरतारमंतमुखस्थस्तव भ्रूवल्लितभ्रमरं वपुस्वमिति युगपत्प्रवृत्तायां तस्यामतिव्याप्तिनिर
साहितीति॥ तदप्यसत्॥ सरसिजमिदमित्यस्य तदुक्तौ नेत्यादेस्समशीलतया आद्ये उपमा द्वितीये उपमे
योपमेति विभागे बीजाभावात् इदस्यापि लक्ष्यत्वात्॥ अत एव साहित्यदर्पणे द्वावुपमेयोपमावारणाय
कवाक्यवाच्यत्वमेव निवेशितं॥ अन्यथा त्वदुक्तौदाहरणेतिव्याप्तेस्तत्रापि निरासान्तरदसंगत्यापत्तेः॥ यदपि जो
स्त्वेव नयनानेदः सुरेवमरकारणं॥ प्रभूतेवसमा... सर्वलोकानितं विनीतिभिन्नसाधारणधर्ममा
लोपमायामव्याप्तिः॥ तत्रानेकरासाम्यप्रतिपादनादिति॥ तदप्यसत्॥ उक्तस्येकदापदार्थस्य तत्रा
पि सत्वात्॥ तस्मात्स्योक्तमेव विस्मृत्यदूषणमेतदिति न किंचिदेतत्॥ यत्र राजोभिः स्पंदनो दूतैर्गजैस्स्य राम:
५

न सन्ति मे:॥ भव स्मलमिव व्योम गर्भमेव भूतलमिति परस्य सेतुमायाम व्याप्तिरिति॥ तदप्यसत्॥
प्रत्येकं लक्षणासत्त्वात्॥ उपमाद्युपस्येव ततः प्रतीते:॥ एव द्वयं रूपोपमा वारणाय वाच्यमित्युक्तं॥ तदप्यु
क्तं॥ नयनं मुखमेवेदं नमं गोरक्षणीदृशं॥ इति विषयस्य सादृश्यात् त्वारम्यानोपमेव साइत्य व्याप्तेः॥
अत्र सामस्त्यावाच्यत्वादिति॥ तदप्यसत्॥ आता पद्धतावैवैतदंतर्भावात्॥ इति नात् साद्यस्य प्रतीय
मानतामात्राभिप्रायेलोवोपमात्वव्यवहारात्॥ अन्यैः पाचं द्वारविंदयोः कक्षामति क्रमयमुखं तव॥ अ
त्मनैवाम वक्त्रं ल्यमित्यसाधारणोपमेतारे रथिलक्ष्यत्वे नन्वयादि विलोपापत्ते:॥ एवं वेत्वदानेन मधी
रा समाविहृशानदीधिति॥ अमङ्गुरमिवालक्ष्यके सरं भाति पंकजमिति विशिष्टोपमाक्षिमविशेषणो
पमायामव्याप्ति:॥ शास्त्रीश्यामेतिवाचकलुप्तायां वदूरसूहे—अरविमिति सामान्यलक्षकपदवदुपमायां चाव्याप्ति
रिति॥ यदुक्तं॥ तदप्यसत्॥ अंगनेवारीनां विवप्रतिबिंबभावापन्नतया अभेदस्येव विवक्षितत्वान्नतुप
मायाः अविवक्षितत्वात्॥ वाच्यपदस्य व्यंजनामित्र वह्निविषयपरत्वविवक्षया दोषदूयस्याभावाश्च॥
यदपि सामग्र्यं विधेयतयावाऽनुद्यते न वायनयावा॥ आयेसकर्वमहतीसेनांप्रबंसागरगामिनी॥
व मोहरजटामरकां गंगामिवमगीरथाद्यत्याद्यावेव लक्षणास्यात्॥ सपयोप्रथमं प्राचीत प्राची

नवर्हिषा॥ अर्हितानन निलोहूतैस्तज्ञेयनिवर्द्धकेतुमिति स्यादेन स्यात्॥ अंत्ये व्यतिरेकालंकारे मुखेन निः
कलंकेन न समस्तवंद्रमा इत्यादौ निषेधानुवादादिति व्याप्तेः॥ न च निषेधाप्रतियोगित्वेन वाच्यमिति
वाच्यम्॥ असिमात्रसहायोपि प्रभूतारियरा भवेत्॥ नैवान्यस्तु कुजनवत्सगर्वो यमहाढ्यतिरिति व्यतिरे
केतत्याप्यतिव्याप्तेः॥ न च निषेधकोपदानंतरप्रविष्टत्वेन निषेध्यमिति वाच्यं॥ हस्याचरसिकिं मंगतचेतत्र
वनांतरे॥ मालती सदृशीकापि भ्रमर त्रापि न लभ्यसे इत्युपमानलुप्तायाम व्याप्तेः॥ तत्र सदृशीलाभनिषेधे
सादृश्यस्यापि प्रतियोगिकोटिनिविष्टत्वादिति॥ तदप्यसत्॥ स्वाभावप्रयोजकाभावप्रतियोगिकोपप्र
विष्टत्वेन विशेषणात्॥ स्वपरं सादृश्यपरं॥ सदृशीलाभनिषेधस्य च न सादृश्याभावप्रयोजकत्वमिति ना
व्याप्तिः॥ सगर्वत्वनिषेधस्य च सादृश्याभावप्रयोजकत्वमेवेति न व्यभिचारः॥ एतेन दीक्षितानुयायिनो
रसगंगाधरकृतोपि निरस्ता इत्यलं विचारांतरेण॥ सरस्वतीकंठाभरणोक्तु प्रसिद्धेरनुरोधेन यः परस्परम
र्थयोः॥ भूयोवयवसामान्ययोगः सेहोपमा मतेति॥ तत्रापि दीक्षिताः प्राहुः॥ ससेजुरश्वकस्तूरिकानामेलाना
मुत्सतिश्रव॥ तेस्य गंधिकुसुमते भरकेतकीफलेरणाव इत्यादौ गुणक्रियादीनां परस्परसाम्यवर्णाति
कायां॥ उद्भूर्मेद्भूतारमणीरमणोपमर्दभुग्नोन्नतस्तननिवेशासम्भेहिमांशोः॥ विवेकठोरविसकांड

करणगोरैर्धिक्षो: पदंग्र यमसमग्रकरैर्मनक्ति॥ सयोमेऽितमत्त हूरगा विवुक प्रस्पर्द्धि नाहिंगकभि
न्नाहि प्रसिद्धिरहितोपमार्थं गव्यामिदिति॥ तदप्यापाततः सामीप्यपदस्य धर्ममात्रपरत्वात् गउका
दीनामभिन्नाप्रदोषमात्रात्॥ प्रसिद्धेरनुरोधेनेत्यस्य च पदं उपमायां यस्य प्रतियोगित्वानुयोगित्वा
दिकं प्रसिद्धं तदनतिक्रमेण त्वर्थः॥ अतो न प्रतीपादौ व्यभिचारः॥ उक्तं मैत्रादौ तु नद्रू णारमरणी स्त
नादिकं मप्रसिद्धं किं तु तदुपमानत्वमात्रं तत्कल्पनेऽपि प्रसिद्धनतिक्रमस्य सत्त्वान्न दोषः॥ नहि तेषामु
पमानत्वमात्रं वाऽपि प्रसिद्धं येन तद्विरोधः स्यात्॥ यद्यपि तैः स्वयं लक्षणमुक्तं॥ आपाततः उपमानाख्याम
वयादि विवक्षितः॥ क्रियानिःपत्तिपर्यन्तमुपमाले रूति स्तुसे नि॥ उपमितिक्रियानिःपादको व्यापारः उ
पमितिक्रियानिःपत्तिपर्यन्तं विवक्षितमेवं उपमालक्षणकारैः॥ व्यतिरेके तु साक्षान्मरं परपाटोपमितिक्रिया पा
दानिःपत्तेर्न व्यभिचारः॥ अनन्वयेऽपि स्वेतरोपमानव्यवच्छेदे वस्तुतो नुपमत्व एवं कवेस्तात्पर्यात्तदनिःपत्तेः॥
तदुक्तं मामहेन॥ यत्र तेनैव तत्र स्यादुपमानोपमेयता॥ असादृश्यविवक्षातो वदेतितमनन्वयं॥ प्रतीपेऽपि
चाकरीयसरोमाक्षिव वनीयमिरे मुवि॥ शशांक स्तवकं केरागायामरैरूपमीयते इत्यादौ यत्र तदनिःपत्ति
र्नतत्र व्यभिचारः॥ यत्र तु गर्वमसंभाव्यमिमेलोचनयुगले न किं वहसि सहि मद्रे॥ संतिसह शाणि हिदिशि दिशि

अ·को·
८

7

सारस्य नन्वनीलनलिनानीत्यादौ तद्ध्वनिःपत्तिरप्य[illegible]उपमेयमेवेति न तदति व्याप्तिः॥ उपमेयोपमाया अपि लक्ष्य
त्वात् तथैव॥ न च सादृश्यवर्णनादेर् [illegible] विशेषात् [illegible] अपमेनन्वयप्रतीपादिवैषम्य [illegible] उपमितिवाच्येऽप्रतीपादावुपमि
तिक्रियानिःपत्तेः॥ अनन्वये तद्ध्वनिःपत्तेः॥ उपमापदप्रवृत्तिनिमित्तसत्वासत्वयोरेव वैषम्यप्रयोजकत्वा
त्॥ अत एव काव्यप्रकाशादावनन्वयआवर्तनार्थमेव विशेषणं दत्तं न तु प्रतीपादिव्यावर्तकमपीति॥ अ
थ न्यायवेदान्तगोचरस्य॥ उपमितिक्रिया नाम साम्यनिःपत्तिः सा चानन्वये पक्षस्येव परमेश्वरगर्भतया प्रतीतिसि
द्धमेश्वरनिवेशेन तद्धारणामेव [illegible]॥ मेश्वरगर्भतन्त्रानादेव विजातीयोपमितिक्रियाविश्रमिरिति चेत
गोसदृशो गवयः कुमुदमिव मुखमित्यादावपि स्यात्॥ विलक्षणसाधर्म्यज्ञानादिति चेत्। अनन्वयेप्यस्तु॥
न च तत्र निरूपमत्वप्रतीतेर्नैवमिति वाच्यं॥ स्वेतरसाधर्म्यविरहस्य निरूपमत्वस्य स्वसाधर्म्यस्य च युगपत्प्र
तीत्यविरोधात्॥ किंच उपमितिक्रियावैजात्यमानाभाव॥ तद्धि जात्यप्रयोजकादृष्टवैजात्यस्यैवाचितत्वात् तथा न
हि रूपकोत्प्रेक्षादौ क्रियावैजात्यमलंकारप्रयोजकमित्यादृतः॥ रसगङ्गाधरकृतस्तु॥ वर्णनस्य विलक्ष का॰११
णशब्दात्मकस्य विलक्षणज्ञानात्मकस्य वा द्वारस्वाच्यताविरहेणालंकारतामधः। वर्णनस्य सर्वथैवाव्यं
ग्यत्वाभिनिवेशात्पर्यवसाय्युक्त[illegible]सादृश्यवर्णनमनुपमेतितदुक्तौ फलितलक्षणोऽव्यस्तविशेषणाम

राम: ८

पिबन्त्यर्थे॥ यदि तु वर्णनविषयीभूतं तादृशसा[illegible]धर्म्यमुपमेयगतं तदापि विम्बोष्ठि विगलवय इत्यादौ
कालोपसर्जने च तुल्यमिति पाणिनिसूत्रोक्तसादृश्ये चातिव्याप्तिः॥ नापि चमत्कारिविषयकं कवि
आपादकस्यैव वर्णनपदार्थत्वं तथा प्रकृते च चमत्काराभावान्न दोष इति वाच्यं॥ चमत्कारित्वनिवेशे तु उप
मितिक्रियानिःपत्तिविशेषणस्यैव वैयर्थ्यात्॥ अनिःपत्ते नापि ततः प्रतीयमानेन सादृश्येन च चमत्काराभा
वात्॥ स्तनाभोगे पतन्भाति कपोलात्कुटिलोलकः॥ शशांकविंबतो मेरोर्लंबमान इवोरग इत्यादौ
मश्चवाक्यार्थीभूतत्वेनानलंकारभूतायामुपमायामतिव्याप्तिः॥ उपमितिक्रियानिःपत्त्यादिसत्वात्॥
न च यत्नस्यैवेति वाच्यं॥ ध्वन्यमानोपमावारणाय प्रयासस्य वैयर्थ्यात्॥ न चोपमानोपमेयसादृश्यस्य स
त्वादुपमास्वरूपादर्शिकाभिव्यक्तिहृदि शोधयेनोपमातमलंकुर्यात्॥ किं च सादृश्योपादानमनर्थकं॥ उपमिति
क्रियानिःपत्तिमद्दर्शननिमित्तत एव च सिद्धेरित्याहुः॥ तथेदं चिंत्यं॥ स्तनाभोग इत्यत्रास्यैव॥ उक्तविधाय
अस्याप्रसिद्धेः॥ यत्तु॥ कविकल्पितोपमाया निर्विषयत्वापत्तिरिति तन्न॥ उपमानता वद्दूरं कविशिक्षा
पमानत्वाभिमतस्य प्रसिद्धौ तदुपमानत्वकल्पनस्यातरभिमतत्वात्॥ अत एव सर्वत्र उद्भूतमारय
मरणीत्यादिकमेव कविकल्पितोपमोदाहरणं लिखितं॥ अन्यथा ननित्यमसि[illegible]त्यादिपद्यानां तत्पादीना

भंगा
मप्युक्ते सात्वपतेः॥ अभ्युपेत्यापि ब्रूमः॥ अलंकार्यवाक्यार्थाभावादनलंकारत्वमित्यप्युक्तं॥ न
हि वाक्यार्थ एवालंकार्य इति नियमे प्रमाणमस्ति॥ साहस्येन मुखादिरेवोत्कर्षात्॥ तस्य विभा
वतया तदुत्कर्षशोभवसोत्कर्षात्॥ अत एव यत्रान्यसादृश्यप्रयुक्तोपमेयोत्कर्षविवक्षा तत्रोपमेति
न्यायपंचाननादयः॥ किंचेवं स्वप्नेपि स्वपुरेषु त्वां विजयश्रीर्न मुंचति॥ प्रभावप्रभवं कांतं स्वाधीन
पतिकायपेति काव्यप्रकाशोक्तमप्युदाहरणमसंगतं स्यात्॥ एवं हंसीव कृष्ण ते कीर्तिः स्वर्गंगा
मवगाहते द्युत्यायवीति किं बहूनाविभाति वदनं तस्या नासाग्रस्थितमौक्तिकं॥ अ[illegible]त कुधा
क्तेषं राकेंदोरिव मंडलं इति त्वदुक्तोदाहरणमप्यसंगतं स्यादिति क्रमेणासकलमाकुलं स्यात्॥
तदाहुः॥ बालस्य दीपकालेकाक्रीडयैव नगरदाह इति॥ अत्र प्राचीनानां व्यंग्योपमाव्यावर्तक
विशेषणानुपादाना अधोनभूतोपमाया अप्यलंकारत्वमुचितमिति नानुपपत्तिः॥ दीक्षितानां
तु व्यंग्योपमाया अलंकारत्वमसंमन्यमानानां वाक्यार्थभूतोपमाया अपि नालंकारत्वं स्वीकर्तुं
मर्हं तु भयोः स्वाधान्याविशेषेणावधेयप्रमाणाभावादिति चेत् न मुख्यव्यंग्यस्यानलंकारत
येव धर्मिग्राहकमानेन सिद्धेः॥ वाक्यार्थस्य चरसायंगतया सर्वाभ्युपगतत्वादिति दिक्॥ एतां

लू स्त्रिं

म यमं द्विधा विभजते॥ वाचकधर्मसमत्वप्रतियोग्यनुयोगिनोऽग्रे दृष्टान्तौ॥ यथा चंद्र इव रमणीयं मुखमि
त्यत्र इहहि इवपदमुपमावाचकं॥ रमणीयत्वं साधारणधर्मः चंद्रः साम्यप्रतियोगी मुखं तदनुयोगीति च
तुर्णामुपादानं अत इयं पूर्णा॥ तत्र साधारणधर्मस्य क्वचिदनुगामितया प्रसिद्धेः॥ यथा॥ कुवलयमिव अद्दमेव से
लं हि मदमुद्रकमलाअरंवके किविविमुकं॥ पीअमहरं वचसअं बहुलयअं सं वमुद्दअं दाविरहिअं॥ योग: ३
उत्कृष्टतद्गुणत्वमत्र सम्बन्धेऽलोभयानुगते॥ स्यादेतत्॥ अत्रैकरूपसाधर्म्यस्योभयानन्वयाभावात्कथ
मनुगामित्वं॥ एवं वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये॥ जगतः पितरौ वंदे पार्वतीपरमेश्वरौ इत्यादा
वपि॥ अत्र हि वागर्थयोर्वाच्यवाचकरूपः संबंधः॥ पार्वतीपरमेश्वरयोस्तु संयोगरूप इति संबंधताव
च्छेदकभेदात्॥ न च संबंधत्वेन तदिति वाच्यं॥ येन रूपेण साधर्म्यस्योपमेयगामित्वं तेनैवोपमानगामि
त्वमित्यनुगामित्वलक्षणस्यात्र संभवाच्च॥ अत्र प्रयोपचारस्यविधान्तरत्वोक्त्यनुपपत्तेः॥ पंकजैरिव कुमार
मीक्ष्यते विस्मयेन विकचैः पंकजैर्नाइत्यत्र विकचत्वपुष्पधर्म ईक्षणेषूपचरितः॥ न च तत्संभवति॥ मुख्य
लक्ष्यसाधारणविकचत्वस्योभयत्रापि सत्वात्॥ तदर्थं च पुष्पेषु विकचत्वं विजातीयपत्रविभागवत्वं॥ नेत्रे
षु च निमेषराहित्यं वा समत एकेन रूपेण विकचत्वमुभयत्र नास्तीति तद्दोषावज्ञः॥ एवं संपृक्ताविमत्र

अ.कौ.
६

येन रूपेण साधर्म्यस्य वागर्थयोर्बोधनं तद्रूपेण पार्वतीपरमेश्वरयोरिति कथमनुगामित्वं भवः॥ अथ पक्षसंबंध
त्वं संबद्धाविति धीसाक्षिकं तद्योगादिसाधारणो धर्मविशेषः॥ तथाच पर्यवसितधर्मयोर्यत्रैकधर्मावच्छि
न्नत्वे स्वरवानुगामित्वपदार्थः॥ अस्ति च वाच्यवाचकभावसंयोगसंबंधयोरपि संबंधावच्छिन्नत्वमिति चेन्नहि
विकल्पे रीत्यापि भिन्नः संयोगजनकक्रियाराहित्यमुभयत्राप्यस्तीति न दोषतादवस्थ्यम् तत्र संयोगस्य
पक्षपाताद्यवृत्तितया भेदहृतिचेत संबंधस्यापि विभागादिनिरूप्यतया तद्विशेष्यात्॥ किंच अनुगामि
धर्मस्य कीदृशो नोभयसाधारणधर्मणावच्छिन्नत्वं विवक्षितं न तावदेकेन विदेव॥ प्रमेयत्वादिना संबंध
मीसांसारान्याप्त्रकारोतरासांविलयापत्तेः॥ नापि द्रव्यत्वादिना तत्तद्धर्मेण बिंबप्रतिबिंबभावस्थले द्रव्यत्व
स्य हारनिर्देशोभयवृत्तितया तथाप्यनुगामितापत्तेः॥ नापि स्वजन्यशाब्दबोधप्रकारीभूतधर्मेण वस्तुप्र
तिवस्तुभावस्थलेप्यननुगामित्वापत्तेः॥ यंत्यामुहुर्वलितकंधरमाननं तदवृत्तवृंतशतपत्रनिभं वहंत्येत्य
त्रापि वल्गुनोद्वर्तनयोरभेदेन स्वजन्यशाब्दबोधप्रकारीभूतधर्मावच्छिन्नत्वात्॥ नाप्येकपदजन्यबोध
प्रकारीभूतधर्मेण तद्दोषानपसारणं॥ नापि भिन्नवृत्त्येकपदजन्यबोधप्रकारीभूतधर्मेण॥ उक्तस्थ
लेतु वल्गुनोद्वर्तनयोरभेदेन वल्गनस्यनभिन्नवृत्तित्वं॥ भिन्नत्वं च स्वावच्छिन्नप्रतियोगिताकभेदवत्त्वं॥

रामः
६

वाजन्यत्वमित्यादौ तु वाथवा वच्छ.भावसंयोगयोर्भेदस्तु उभयत्र च संबंधत्वमिति वाच्यं॥ संयोगादेरपि सं
बंधत्वावच्छिन्नप्रतियोगिताकपरस्परप्रतियोगिकभेदविरहात्॥ न च परस्परवृत्तिधर्मावच्छिन्नप्रति
योगिताकभेदवत्त्वे सति तादृशपदजन्यबोधप्रकारीभूतधर्मावच्छिन्नत्वमेव तच्चेति वाच्यं॥ तथापि य
मशीयत्वाद्यसंग्रहात्॥ अथ साधारणधर्मवाचकपदजन्यबोधप्रकारीभूतधर्मस्य साधारण
धर्मद्वयसत्त्वेऽनुगामित्वमिति विवेकः॥ संप्रत्काविल्य च च तादृशप्रकारस्य संबंधत्वस्याभयत्र व
र्तेः॥ हारादौ तु हारत्वादेर्निरुक्तरावच्छेदकत्वेऽव्याप्तिः॥ द्रव्यत्वं वा विवक्षितं॥ अतो यत्रैकरूपेणासाधा
रणधर्मे वसाने तत्रापि नाव्याप्तिः॥ यथा॥ तुल्यस्वरूपं तुम्बसेल्लेमित्यादौ त्वद्दृष्टांते॥ नचैवं कृष्णघोष्य
नुगामिधर्मः स्यात्॥ न च सिंहमहीपाल सर्वोप्यरिगणस्तव॥ पारावारसमानत्वं दधाति स्वपरस्तुतेत्य
त्यत्र स्वपरस्तुतपदजन्यबोधप्रकारीभूतधर्मस्य स्वापाकाज्यायत्त्वस्य परम्रष्टत्वस्य च प्रत्येकमुभ
यत्र सत्त्वादिति वाच्यं॥ प्रतीतेरेकपदजन्यत्वस्य वाच्यत्वात्॥ स्वपरस्तुतेत्यत्र प्रतीतेर्भिन्नभिन्नपदजन्य
त्वात्॥ नचैवमपि वातेतत्वमातारिवत्सपंचतां चिरायन सोद्गमसंकुलं महत्॥ अहह संतानतयान शो
भते वनं हरेः॥ मात्प्यपनादिवोद्धविरित्यत्र संतानपदजन्यबोधप्रकारीभूतयोरपि तत्पात्वेन तत्त्य

अ॰ कौ॰
१०

श्लेषेऽनुगामित्वप्रसंगस्य दुर्वारत्वमिति वाच्यं। तत्र पुत्रपारिजातयोः साधारण्यपर्यवसानात्। पारिजातत्व
पुत्रत्वयोस्तु सामानाधिकरण्याभावादिति। न च हेतुत्वस्याविवक्षितत्वात् तत्। कथमेवमिति वाच्यं। यत्र हे
योः साधारण्यपर्यवसानं तत्र हेतुत्वस्यापि विवक्षितत्वात्। अतो न दोष इति चेत् मैवं। पीतघटे द्रव्यगुणा
वान्तरत्व घटेतरत्वयोरनुगामित्वाभावप्रसंगात्। गुणत्वजातिमनंगीकुर्वतां गुणपदार्थरूपत्वरसत्वप्रका
रयोरेव बोधात्। रूपेतरसत्वस्य रसेतररूपत्वस्याभावात्। वस्तुप्रतिवस्तुभावस्य लेशतोऽनुगामित्वाभावप्रसंगा
च्च। ननु पर्यवसितसाधारणधर्मयोर्हेतोरपि उपमानोपमेयवृत्तेरसंभवः। यथा रूपरसयोस्तत्र साधा
रणधर्मो वह्नेरेकीभूतयोः रूपत्वरसत्वयोर्भिन्नयोः सामानाधिकरण्याभावेऽप्यनुगामित्वमेव। यत्र तु पर्य
वसितसाधारण्ययोर्नोपमानोपमेययोर्भयवृत्तित्वं। यथा सेतानेत्यत्र पारिजातस्य चन्द्रवंशे ऽपत्यवनेदने
भावात्। तत्र नानुगामित्वं किन्तु श्लेष एवेति चेन्न। तत्तु ...पारिहर्तयोः साधारणधर्मयो रूपमानोपमेयो
भयवृत्तित्वं किं पर्यवसितसाधारणधर्मनिष्ठधर्मेण वृत्तिरुत साधारणधर्मबोधकपदजन्यप्रका
रीभूतधर्मेण। नाद्यः। वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये इत्यत्रापि पर्यवसितसाधारणधर्मयोर्वाच्यवाचकभावसं
योगयोः साधारणधर्मनिष्ठसंयोगत्वादिधर्मेणोभयावृत्तित्वात्। द्वितीये तु एवं नहि तौ यतः संबन्धत्वेनापि
संयोगादेर्बोधाभावाभावात्। किं च हेतुत्वं विवक्षितं न वा। नाद्यः। चन्द्र इव मुखमित्यादावनुगामि

रामः
१०

त्वानुपपत्तेः ॥ नन्वेवं वस्तुप्रतिवस्तुभावस्थलेऽपि तदापत्तेः ॥ अपसाधारणधर्मवाचकपदजन्य
बोधप्रकारीभूतधर्मावच्छिन्नसाधारणधर्मे योऽयं प्रत्येकमभ्यवच्छिन्नत्वं तदाऽनुगामित्वमिति
संतानपदजन्यबोधप्रकारीभूतपुत्रत्वपौत्रादिजातत्वयोर्नाभयावच्छेदकत्वमिति चेत् न विंबप्रति
विंबभावेऽपि तदापत्तेः ॥ अपसाधारणधर्मवाचकपदजन्यबोधप्रकारीभूतधर्मावच्छिन्नसाधार
णधर्मकस्थले एवोक्तविभागः संतानेत्यत्र तु संतानत्वेन वाच्यतावच्छेदकमपि तु पुत्रत्वाद्येव सं
बंधपदस्य संबंधत्वं वाच्यतावच्छेदकम् एवं च साधारणधर्मविशेषवाचकपदजन्यबोधप्रकारीभू
तसाधारणधर्मे सामान्यवाचकपदजन्यबोधे प्रकारीभूतधर्मावच्छिन्नत्वं तत्रैवोक्तविभाग इति न
दोषः संतानेत्यत्र हि साधारणधर्मविशेषवाचकपुत्रादिपदजन्यबोधे प्रकारीभूतपुत्रत्वादिकं त
त्सामान्यवाचकपुत्रादिपदजन्यबोधेऽपि प्रकारः ॥ संपत्कोविदेत्यत्र तु संयोगादिपदजन्यबोधे संयोग
त्वं संबद्धादिपदजन्यबोधे च संबंधत्वमिति विशेषात् ॥ वस्तुप्रतिवस्तुभावे तु धर्मैक्यनियमेन
सामान्यविशेषवाचकपदभेदाभावान्न दोष इति चेत् मैवं यत्र तत्स्वरवह्निघटाभयपरतया विवक्षि
तं यथाभूतलमिव पर्वतस्तद्वानिति तत्र वह्निघटपदजन्यबोधप्रकारीभूतं वह्नित्वघटत्वादिकमे

वतमदनान्यबोधप्रकारः॥ सर्वनाम्नां बुद्धिस्थत्वरूपं तेन तेनैव प्रकारेणाशङ्केः॥ एवं चेद्दृढवमुखे
तद्दृष्ट्यादेरमर्गी यत्वाद्धृदकत्वो भयपरेपि किंचरमर्गीयत्वादावनुगामित्वाभावापत्तिरितिचेदु
वीरेति तस्माद्धुगर्पाविर्त्यादावनुगामित्वेनैवं वनं दुःकरमिति पर्यवसितं॥ उच्यते॥ धर्मैक्यन्निसामा
न्योपस्थापकपदे क्वापि एवानुगामित्वमिति व्यवस्था॥ धर्मित्वेच तद्धर्मेतावच्छेदकपर्यायस्याधिकरणा
त्वं॥ अत एकोनेकोवेत्यत्र नादरः॥ तदिति॥ तमदनिवीद्येत्यर्थः॥ अतो वद्धूनामिश्रशास्त्रस्थले नानुपपत्तिः॥
बिंबप्रतिबिंबभाववारणाय एकेति सामान्यविशेषणारेयं॥ तत एव श्लेषस्यापि वारणं धर्मस्वप
र्यवसितः चेद्धविरहितमित्यत्र पर्यवसितस्येवोपादानं॥ संप्रक्लावित्यत्र तद्धुतरं पर्यवसानमिति विशे
षः॥ एकेति वस्तुप्रतिवस्तुभावनिरासः॥ तत्र धर्मैक्येपि परमेशात्॥ अतस्य सामान्योपस्थापकपदं श्लेषवा
रणायेव वैरूप्यमित्यलमतिपल्लवेन॥ क्वचिद्बिंबप्रतिबिंबभावेन धर्मोक्तिः॥ सच वस्तुतो भिन्नयोरपि
साद्धृश्याद्वैकत्वाध्यवसानं यथा॥ उमाशिलाहुलशिफं दामिषिसूणीयत्नमिरेरहवलो भाशिम
स्मत्समरगजमाभशापरिष्ठिं भासंरवस्तुतिवः॥ अत्रहि विबिसिनीपत्रमरकतभाजनयोरैकत्वाध्य
वसानं क्वचिद्रूपगम्योपि बिंबप्रतिबिंबं इतिनव्याः॥ यथा॥ वन्मीमल्लयद्वभातिपांडुर्वन्मीकद्वाधि

धर्मिणोस्तु तथात्वात् ॥ अत्र हि दृष्टान्ते नयोर्द्वा नाम लक्ष्यतु योर्धर्मादीनां च बिम्बप्रतिबिम्बभावो गम्यते । अयं
चात्र विशेषः । उभयत्र सत्येव प्रतिबिम्बस्यैवोपादाने तु उपमाने धर्महानिर्दोषः । तत्र तत्स्थानीयधर्मोक्तेः
बिम्बमात्रोपादाने चोपमाने धर्मिणि कां दोषः । उपमेये तत्स्थानीयधर्मोक्तेरिति संक्षेपः । तस्माद्बि-
म्बमात्रोपादाने चोपमाने धर्मोपादाने दोषः । बिम्बप्रतिबिम्बभावापन्नयोर्द्वयोरेव शाब्दत्वं द्वयोरेवार्थत्वं वा कार्यं न त्वेकस्य शाब्दत्वमन्यस्यार्थत्वमि-
व प्रतिबिम्बभावापन्नयोर्द्वयोरेव शाब्दत्वं । स च प्रतियोगिभेदेन द्वेधा स्यैव धर्मस्य हि रूपादाने सत्य-
तिनत्वं ॥ क्वचित्तु वस्तुप्रतिवस्तुभावेन । स च प्रतियोगिभेदेन एकस्यैव धर्मस्य द्विरुपादाने स च प्र-
तीतत्वं ॥ क्वचित्तु वस्तुप्रतिवस्तुभावे विशेषणानां तथा विशेष्यतया वा तिरोहिता । तत्र विशेषणानां
तु न संभवत्येव किं तु बिम्बप्रतिबिम्बभावे विशेषणानां तथा विशेष्यतयोपमेयोपमानयोः । अत्र मेमी
यायथा शार्वपर्वतमाश्लिष्टचन्द्रिकः श्वेतद्रुमा इव — अलं च केसरपर्यङ्कमेकसं क्रमितप्रियः ॥ अत्र मेमी
यायथा शार्वपर्वतमाश्लिष्टचन्द्रिकयोर्विशेष्ययोरेकक्रमितपराभ्यामेकधर्मेण विशेष्यतयोक्तः । विशेष्य
चन्द्रिकयोर्बिम्बप्रतिबिम्बभावः तयोराश्लिष्टैककसंक्रमितपराभ्यामेक एव धर्मो विशेष्यतयोक्तः । विशेष
तयोरथा संख्यातुल्यप्रयो दीसदृशः राग्निमद्धिव — आ अन्दो रत्नदुर्दुरकेतरि — दुर्ग राहुणा हा
तया यथा सज्यातुल्यसदृशो दीसदृशः श्राग्निमद्धिव स्यजितान्तरितपराभ्यामेक एव
दुर्गाव वदूर्ग ॥ अत्र सन्ध्यारागरक्तेन्दुकूलयोर्बिम्बप्रतिबिम्बभावः । उस्यजितान्तरितपराभ्यामेक एव
धर्मस्तोद्दिशो विशेष्यतयोक्तः । सन्ध्यारागरक्तेन्दुकूलयोः स्यजितान्तरितपरविशेषणीभूतत्वात् । यथा वा
अक्राष्टगोलकं चक्रमभ्रिरद्वयोरिति अविहायद्यपगावदं जलभिरिअजहरंतर दहगा अत्र विवध

हरनीलकेतुकनलधरयोर्बिंबप्रतिबिंबभावः। उद्वीरितोद्भूतपदाभ्यामेकएवधर्मस्तद्विशेष्यतयो
क इति। अत्रनुविमलंवरनंतस्याप्निःकलंकमृगांकतीत्यादौसदृशोपिवस्तुप्रतिवस्तुभावःसंभव
तीति। नह्ययंबिंबप्रतिबिंबभावः। यमन्यापिनःकलंककलंकयोर्भेदाभावात्। नचसौरस्यादिनेवाद्यौपमाप्ति
स्यानतस्यधर्मत्वेतिवाच्यं योत्यागद्दृरित्यादावपितरभावापत्तेरित्याहुः। केचित्तुबिंबप्रतिबिंबभूतयो
रण्यमतरविशेषणास्यशब्दत्वेन्यतरस्योपगम्यत्वमपि यथा शरकांडपांडुगंडस्थलेयमाभाति
परिमिताभरणा। माधवपरिणतपत्राकतिपयकुसुमेवकुंदलता॥ अत्रमालविकालतयोरुपमा
यांगंडपत्रयोरलंकारकुसुमानांचबिंबप्रतिबिंबभावः। तत्रगंडांशेपांडुत्वंशब्दोपात्तंविशेषणीभू
तं। पत्रांशेतुपरिणतत्वगम्यंपांडुत्वं। एवंसमानलक्ष्मीयमकेशेमायेनेलंबिनासीद्धृतदिव्यरत्नैः भा॰सा॰८
गजाप्राप्तुलोकेवतुर्भिरेवद्रुमैर्योरिवपारिजातो॥ अत्रचरंगसमयोरुपमायांयमारिकल्प
द्रुमादीनांनलपारिजातयोश्चबिंबप्रतिबिंबभावः। तत्रनलप्रतियोगिकाभाववत्तयासमोक्तिः। भा
गाद्याव्रतित्वेचपारिजातस्यविशेषणारत्नं। तत्रश्चसमभावस्याभावप्रतियोगित्वेनलस्यस्वर्ग
वृत्त्यभावप्रतियोगित्वंपारिजातस्यापिनलस्य। एवंचस्वाधिकरणावृत्तिविजातीयशोभाविरह

राम:
१२

प्रयोजकत्वाभावकत्वमुभयविशेषणतया पर्यवस्यतीति प्रथमस्यापरं स्वाभावपरमिति संक्षेपः॥ कुत्र
चित्सकेवेषायथा उत्कंटकाविलसदुज्ज्वलपत्रराजिराजो मोदमागनपराग तत्रातिगौरी॥ कृद्कृधस्तनदिका
मधियानले सावासार्पिता मधुतको वनकीतकीव॥ अत्रोत्कंटकादीनि विशेषणानि द्वयमयेतीकेत
कोः श्लिष्टानि॥ यथा वा मम॥ घनविशदा हृदाकरया संपन्नपयोधरोदयया। प्रसाधिन्या घनसमयश्रिये
व चेतः समुल्लसितिः॥ क्वचित्तु पचारेणायथा॥ अशीद्दतापद्दुस्सहो द्दाविहत्योहि तम्मिर द्वमि॥ अंगं कल्म
वकुसुमघमतुलिं अकंद्दपृष्ठकि॥ सा॥ द्दहमकुलितत्वपष्पाधर्मद्दपगेहपचरितः॥ क्वापि समासभे
देन यथा॥ विमलेसि अतमासु रागील्लपयोपशोचलतं रंगपद्दमधु॥ ऊहैलीवरासु रदिंदु अहि गर्दस्म
शालेद्दवीठग्रं॥ अत्रविकसिततमालनीलत्वकुस्तैलाव सुरभित्वे च तृतीयासमासेनैवोल्लासितावुप
मानानिसामान्यवचनैरितिसमासेन च दोनल्लेखायां॥ क्वचित्तु बाहुयोर्भिकलेन॥ तत्रानुगामित्वं बिंबप्रति
बिंबभावयोर्भिन्नत्वात् यथा॥ अहृगामे अग्रिशासामग्रं गंभीरत्नशारिकुट्टि अस्मिन्सक्तुहृ॥ शेशा राहववच्य
तांउपाउपचरमेंडलं बविलग्ना॥ अत्र विलग्नत्वमनुगतं ताघववरनचंद्रमंडलयोर्बिंबप्रतिबिंबभावः
अनुगामित्ववस्तुप्रतिवस्तुभावयोर्यथा॥ वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्॥ आसीन्मही

अ.को.
१२
13

म्र तामात्यः प्रतापवः द्वंद्वगामिवा॥ अत्र मनुप्रतापयो रूपमात्रयोर्बिंबप्रतिबिंबभावापन्नयोः द्वंद्वो महीभृ
तो बिंबप्रतिबिंबभावापन्नौ नामात्यत्वविशेष्यतयोक्तौ मनीषिमान्यत्वमनुगतं॥ अनुगामित्वमेव यथा
यथा॥ नाहूतापि पुरः पदं रचयति प्राप्तोपकंठे हठात्पृष्ठा न प्रतिवक्ति कंपमयते स्तंभं समालंबते॥ वैवर्ण्यं
मंदाक्ष १ स्वरभंगमंचति तनोर्मोमेशननोकष्टं भोः प्रतिभावतोपि प्रिसमं वाणी न वो छायते॥ एषेत्वा रावनुगामि
त्वं परमित्यादौ श्लेषः॥ अनुगामित्वोपचारयोर्यथा॥ अतिसुकुमारः सौरभविशेषभरितोतिरमणीयः
सो६ केवतिकपोलविंबेषु वेवकुशोवतंस्याः॥ अत्र सुकुमारत्याद्यनुगामित्वं तुवतीत्ववतंसेतूपचारः॥ अनु
गामित्वसमासमेदयोर्यथा॥ सरोहि अकमल सरोरुहनो अब अब धातुक द्विभि अमुहो ठाशाक्षि ति
श्लोकगर्जं रक्तिसमिकूलापडिंशिउन्तोहि अत्रसो॥ अत्र संध्यानपेतिसमासभेदः संसोमितत्याद्यनुगामि
बिंबप्रतिबिंबभावव स्तुप्रतिवस्तुभावयोर्यथा॥ इयणि अमि अनुगीवेरामंते तापचलि पि आमहतरा
त्रं॥ परिमलमेदुसि रेसैरहिहोवपल अहूम्बीजे॥ अत्र रामस्य धंयोर्बिंबप्रतिबिंबभावापन्नयो
रेकधर्मोन्नतामिमुख शध्यायां निर्दिष्टः सुगीवमेदशिरवरयोर्बिम्बप्रतिबिम्बभावस्य॥ बिंबप्रतिबि
बभावश्लेषयोर्यथा मम॥ संप्रकाशितवसाहकवं शेषं जयपक्षशालिकभावमनेहा॥ हेलभावसुप राम:
१२

षि

लंभितसत्वो बोधिसत्व इव सत्वरमेति ॥ अत्र बोधिसे श्लेषशिक्षाभाविश्यत्वत् तस्या आ-
बोधीति पक्षे श्लेषशिक्षाभावः पदार्थानां प्रतिक्षणशाविनाशित्वं इति श्लेष्म ॥ मेघसत्वयो-
र्बिंबप्रतिबिंबभावः ॥ उभयोर्धर्माक्रमेण विश्लेषशिक्षत्वसाधकत्वात् उपचारः बिंबप्रति-
बिंबभावयोर्धर्मम ॥ नितांतपारि[illegible]वतारः तारकेश्वरसेनयान[illegible]पतिसलीवने ॥ परिभ्रम-
द्भृंगमंजसंगते निशाविस्पानेन विनीवपंकजे ॥ अत्र तारकाभं गागांगनेत्रपंकजानां रसभ्रमा-
णयोर्बिंबप्रतिबिंबभावः ॥ नर्तने नैव पद्मे गोपवरितं ॥ समासभेदः [illegible] योर्धर्मयोः ॥ [illegible] दि उप-
रि अमृतशालं दहनादि [illegible] वशिष्ठि लिअवलं अतालि ॥ मधु अरि मधु [illegible] वं मधु मे अ-
र्थवं मधु [illegible] कमलं ॥ अत्र मधुकरी मधुरोष्ठी पद्मिनीति समासभेदः ॥ मधु मदातान-
मिति [illegible] ॥ समासभेद बिंबप्रतिबिंबभावयोर्धर्मयोः ॥ व [illegible] वमासि मलं गोर [illegible] विरोधयो-
हि धवलेहि ॥ स्त्रीरोरमं [illegible] लिदद्रुधु सितो [illegible] मधु म [illegible] ॥ अत्र [illegible] रवे [illegible] समासभे-
दः धवलपनेद्रुग्ध्ययोर्बिंबप्रतिबिंबभावः ॥ वस्तुप्रति वस्तुभाव [illegible] योर्धर्मयोः ॥ [illegible] रसतर-
हसित [illegible] वीविभातिवरवशि नी [illegible] तारविदासरसीव विनिर्मित [illegible] लिका-

अत्र विंबप्रतिविंबभावापन्नयोर्मुखारविंदयोरेक एव धर्मो हसितोन्मीलि
तपदाभ्यां विशेषणतया निर्दिष्टः प्रथमोत्पविशेषणाहृद्य एव वक्ष्यमाणः ॥ समासभेदो
पचारयोर्यथा ॥ मालतीमुकुलकोमलदंतामत्तवर्हिकुलकेशकलापा ॥ जीवय
त्यसमसायकमेषा कामिनीव जलदागमलक्ष्मीः ॥ अत्र मालतीत्यादौ समासभे
दः ॥ जीवयतीत्युपचारः ॥ समासभेदवस्तु समस्तिवस्तु भावयोर्यथा मम ॥ घनप्रस
वसंकुलास्थगितशर्वरीवल्लभो विराजति वलाहकागमनकालिकी यो हि मम
परं विहतगोचरीभवनपुंडरीकच्छदाततमालदलमेचकावयवकांतिवेशो वपुः ॥
अत्र घनप्रसवेत्यादौ तमालेत्यादौ च समासभेदः ॥ वपुःपुंडरीकयोर्विंबप्रतिविंब
भावापन्नयोः स्थगितत्वं विहतगोचरीभवनत्वं चैक एव धर्म उक्तः ॥ श्लेषोपचा

र्योर्यथा॥ अस्यानगामिभिरलंकरणैरुपेता भूयः पदस्खलितानिहुतिरप्रसज्ञा॥ वाराणीव कापिकु-
वैवमधुपानमत्ता गेहाद्विनिर्यान्ति बहुलेविविक्ते जगाम॥ निर्गमनस्यैवाराणामुपचारः॥ अत्र मेघः॥ कु-
विहङ्गनां मिश्रणेन॥ तत्र समासमेदानुगामित्वोपचारो यथा॥ मुहुर्लग्नयमानि विपाण्डुराणि जलोर्मिवद्-
भरितैः शाङ्गमहीविवरे॥ प्राद्रदुपहुत्वं तेभ्यास्तविहितान्यञ्जनस्वपिञ्जते॥ अत्र मुहुर्वैरित्यत्र स-
मासमेदः॥ तननभोमहीविवरत्वमनुगामि विनिर्गतमित्यस्यवराहस्योपचारः॥ अनुगामित्वोपचारो यो-
षान्तां यथा॥ उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणादायासं श्वसितोद्गमैरविरलैरातन्वती-
मात्मनः॥ अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं पश्यन्कोपविपाटलद्युति मुखं देव्याः करि-
ष्याम्यहं॥ अत्रोत्कलिकेति श्लेषः॥ विपाण्डुरेत्यत्रायासेत्यत्र चानुगामित्वं॥ प्रारब्धजृम्भामिति लतायामु-
पचारः॥ उपचारसमासमेदश्लेषाणां यथा॥ सरस सरसि पद्मिनीपरिहिर्जलोद्गकेसरोद्गतसुरहिगन्धाढ्यं॥ धव-
लहोद्गसलहृष्टापि अतिरक्तां तां समुद्गृहाणं॥ अत्र पिबतीति ढ्वपक्षे उपचारः॥ नीलोत्पलसुरभी-
ति समासमेदः॥ धवलास्सालिधवलाद्यानीति श्लेषः॥ अनुगामित्वं बिम्बप्रतिबिम्बभावश्लेषाणां
यथा मम॥ स्फुरन्नयनपङ्कजा सा स्वच्छसरवीमे मनः प्रसादयति॥ कुसुमाकरं शारदिवेन व सदृशितशी

अ॰कौ
१५
15

तकरबिंबा ॥ अत्र ग सारस्येतीत्यनुगामि ग्रस्त चंद्रयोर्बिंबप्रतिबिंबभावः स्फुरन्नयनेति समासभेदः अतःपरं समे
वेतद्विषये श्लोकाः ॥ अनुगामित्वसमासभेदश्लेषाणां यथा ॥ तरामृ क्का हारा सस्तुद स्मितचंद्रहस्विरुचो ॥ विकसित
केरवहासा ओ स्त्रीवव धून्वरं विधूनोति ॥ अत्र न्वरं विधूनो. तीत्यनुगामि ॥ तारेत्यादौ विकसितेत्यादौ च समासभे
दः चंद्रेति श्लेषः ॥ उपचारबिंबप्रतिबिंबसमासभेदानां यथा ॥ विजृंभमाणो व्रतकोरकस्तनी सरोजिनी कुंबलितिबा
सरेश्वरः ॥ समुल्लसत्कुंकुममयचक्षोहितो द्युवानवीनांबरवशिनीमिव ॥ अत्र विजृंभमाणो मत्र समुल्लसदित्य
त्र च समासभेदः सरोजिनीवरवरवर्णिन्योर्बिंबप्रतिबिंबभावः ॥ कुंचतीति रविपक्षे उपचारः उपचारबिंबप्रतिबिंब
भावश्लेषाणां यथा ॥ रसभरसाद्रीवयवः परिरंभते केतकीपवनः ॥ कठिनतरकंटकोत्करैर्विता कामिनीमिव
सकामः ॥ अत्र पवनपक्षे परिरंभोपचारः ॥ केतकीकामिन्योर्बिंबप्रतिबिंबभावः रसकंटकपदयोः श्लेषः ॥ अ कर्द१
नुगामित्वं प्रतिबिंबभावोपचाराणां यथा ॥ मरुद्गृहीतामलमालतीकः सीमंतयत्येष समालवश्रीः ॥ प्रालेयस्रो
विवर्द जीवितवल्लभायाः स्वयं कृतिं वेणिमिवालकानां ॥ अत्र गृहीतेत्यादिरनुगा मी तमाला लकानां बिंबप्रति
बिंबभावः ॥ मरुदिति सीमंतकर्तृत्वोपचारः ॥ अनुगामित्वबिंबप्रतिबिंबभावसमासभेदानां यथा ॥ तरलयति
मानसमेकं स्मरमनोज्ञास्मितश्रीस्ते ॥ नायं द्वीपवतीनां स्पोत्से वमनोज्ञ वापस्कः ॥ अत्र तरलयतीत्यनुगामी

रामः
१५

स

मानसमुद्रयोर्बिंबप्रतिबिंबभावः ॥ कुमुदरमणो नेत्रेतिस्मासमेदः ॥ वस्तुप्रतिवस्तुभावसमासमेदोपवाराणां

यथा ॥ कुटिलगतासरसीरुहकुं... समारकराः सुधांशुमुखी ॥ वक्रतरंगाकुलिता सरिदिव सा नरमवजा

ना ॥ अत्र ... तरंगयोर्बिंबप्रतिबिंबभावापन्नयोः कुटिलवक्रत्वाभ्यामेकरूपधर्मेणः ॥ सरसीरु

गत २ हेति समासमेदः ॥ अवगाहने स्वकामिन्याम्उपचारः ॥ वस्तुप्रतिवस्तुभावसमासमेदश्लेषयोर्यथा ॥ समी

रलोलंचितकिंचिदंचलं स्तनेरधाना सुमस्तामालवाहुका ॥ कुसुदमसुल्लसितैकपल्लवा सरोजीवासितनोर्थिसे

रभे ॥ अत्र बिंबप्रतिबिंबभावापन्नयोः स्तनगुच्छयोरुदंचितोच्छ्वसितपदाभ्यामेकधर्मनिर्देशः ॥ सुमस्तमाले

ति समासमेदः ॥ सोरभेति श्लेषः ॥ वस्तुप्रतिवस्तुभावसमासमेदानुगामित्वोनां यथा ॥ स्मरस्फुरितकोर

काधरदलामनागीक्षणास्य सौकविशारीभवद्विशारदमुग्धदंताग्रभः ॥ परिसुवितपल्लवाकिंमधिदृश्य

सत्कोरकाललतेव हरतिप्रियाकिमलयाग्रहस्ता मनः ॥ अत्र बिंबप्रतिबिंबभावापन्नौ नामधरपल्लव

नौ रदतकुमलानां च स्फुरितपल्लवत्वे ईक्षणविषयीभवनदृश्यत्वे च यथायथा नेत्रे ॥ हरणमनुगामिकि

सलयेति समासमेदः ॥ वस्तुप्रतिवस्तुभावश्लेषानुगामित्वोनां यथा ॥ घनसारसारविशदांकरं किं

तां सात नुघनैः ॥ पुष्पालीभिवकेतकवल्ली धूलीसितां सहीम ॥ अत्र बिंबप्रतिबिंबभावापन्नयोर्घन

सारूप्यमोर्विशदस्मितत्वरूपैकधर्मः उपगुल्फः । कं रदेति श्लेषः स्फुटीत्यनुगामी॥ वस्तुप्रतिवस्तुभावा
नुगामित्वोपमाशंसायथा॥ मोहयति स्मितवदनो बालाया श्यामकुन्तलकलापः॥ सान्द्रस्मरदीधितिवाहः घने विद्यु
द्वी-ध्वस्ततमसः॥ अत्र बिंबप्रतिबिंबभावापन्नयोर्मुखचंद्रयोः पिहितघनेस्फुरणरूप एव धर्मः मोहयती
त्यनुगामी॥ बोध्यं वैलक्षण्यं चारः॥ एवमन्येपि प्रकाराः स्वयमूह्याः सुगमत्वादुपेक्षिता इति दिक्॥ अथ चात्र वि
शेषः॥ धर्मस्यानुगामित्वे पदार्थतावच्छेदकरूपेणोपादाने स्थितोऽसत्यां तद्रूपेणोपादानोपमेययोस्तदन्वयः प्र
सिद्ध एव॥ बिंबप्रतिबिंबभावस्थलेतु मरकतभाजनवृत्तिशंखशुक्तिप्रतियोगिकसादृश्यमत्र यो बलीका
विशिनीपत्रवृत्तिरिति शाब्दबोधः॥ तदाधारतापन्नयोर्भाजनपत्रयोर्भेदे सति तद्वृत्तित्वेन धर्मेणात
त्सादृश्याभावेन मरकतभाजनबिसिनीपत्रयोरभेदारोपे शोभापर्यवसानेन तन्निमित्तसादृश्यज्ञानेमान
समेव॥ न चैवमेतस्यैव तत्सादृश्यनिर्वाह इति शंक्यं॥ तदाशंखशुक्तेर्मरकतभाजनवृत्तित्वविशेषणावै
यर्थ्यापत्तेः॥ सादृश्यघटकातिरिक्तोपमानविशेषणोपादानस्य वैयर्थ्यात्॥ एकधर्मघटितसादृश्यापे
क्षया बहुधर्मघटितसादृश्यस्य चमत्कारातिशयजनकत्वात्॥ अत एव यात्या मुहुर्वलितकंधरमानन
ननेतदुद्वृत्तंतशातपत्रनिभं वहन्त्या॥ दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या गाढं निखात इव मे हृदये
कटाक्षः इत्यादावपि वस्तुप्रतिवस्तुभावस्थले निर्वाहः॥ अनयापासौ दर्शितो वधर्मेणासाम्यनिःपत्या

कंधराहंतयोरेकारोपेण साधारण्यानुपयोगापत्तेः ॥ अयं वात्र विशेषः ॥ उत्त्वानद्रुममिव शैलमिव वृशैले
समुद्रयोर्धर्मीतरमयोजः चमत्कारकसादृश्य [illegible] स्याप्रसिद्धोत्त्वानद्रुमस्य सादृश्यप्रयोजकत्वानु
संधानेऽविनापि नप्रतीतिपर्यवसानेऽभवत्येव ॥ किं तु कंधरांहतादीनामभेदस्तु सादृश्यस्थाने उत्कर्षकत्वम त्व
त्रमिति ॥ एवं बिंबप्रतिबिंबभावस्थलेऽपि यत्र बिंबप्रतिबिंबभावापन्नधर्मस्यानिरेकता सादृश्यमप्रसिद्धं तत्रापि वै
धर्म्यम ॥ यथा कोमललातपवालम्मग्ने संध्याकालसहोदरे ॥ कुंकुमालेपनोभाति कषायवसनोऽयति ध्वान्तरे ॥ न
ह्यत्र धर्मान्तरेणायति संध्याकालेयोः सादृश्यं प्रसिद्धं ॥ अपितु [illegible] मेरावप्यवसायविशेषीभूतकोमललातपकुं
कुमादिधर्मेणैवेति ॥ एवं मलयेऽपि नेऽरक्षि हे महीपाल सर्वोपरिगताल्लवपारावारसमानत्वं दधाति स्वपदं क्षुत
त्वरूपधर्मनिमित्तकमेव सादृश्यं एवमुपचारेऽपि शतकोटिकठिनचित्तः सोऽहं तस्यासुधैकमयमूर्त्तेः येनाकारि
छिन्नमित्रं सविकलहृदयोऽविधिर्वा यत्र काठिन्यस्य पृथ्वीगुणात्वेनचित्तेऽउपचारः ॥ दयाविरहवत्वात् तत
स्याद्याविरहेकाठिन्याध्यवसायेन कुलिशचित्तयोः सादृश्यसिद्धिः ॥ अन्यनिमित्तकसादृश्यस्याः प्रसिद्धेः ॥ तस्मा
त् [illegible] दुर्मः सादृश्यस्य स्वरूपनिर्वाहकोऽन्यस्तु तदुत्कर्षक इति सिद्धम् ॥ इदानीमुपमायां विभेदाः रेते मे शाब्दे या
सम्मास्तेः ये शाब्दालङ्कारोनोक्ताः सर्वालंकारास्त्वपि कतइति भरतवाक्यमपि संध्यायतं ह्निप्रविभजते ॥ श्रौत्या
र्थी साहि द्विधा वाक्ये च नीचतद्धितेनतद्वत् ॥ इवादिवत्समस्तमिति शाब्दबोधेनाव्ल्केविशिष्टाहु ॥ यद्यपि इवादिशब्द

नो तुल्यादिपदानां च सादृश्यबोधकत्वाविशेषात् तर्कलविभागानुपपत्तेरिति। न चैवमादिभिरुपमयत्र धर्मसंबं
धः शब्दतः प्रत्याय्यते तुल्यादिभिस्तु धर्ममात्रमिति विशेष इति वाच्यम्। इवादीनामुपमानविशेषणत्वनि
यमेन तैरुपमानस्य च साधारणधर्मसंबंधो बोधयितुं न शक्यते इति। अन्यविशेषणतायाः अत्र संबंधबोध
कत्वाभावात्। तथापि यथा चैत्रस्य धनमित्यत्र चैत्रपदोत्तरषष्ठ्या चैत्रस्य स्वामित्वं बोध्यते धनस्य च स्वत्वम्।
शब्दशक्तिस्वाभाव्यात्। तथा तत्रापीवपदेनोभयत्र तद्बोधनो न्यायोपपत्तिः। न चैवमपि कमलमुपमानोपमेययोर्भे
दान्वय इति वाच्यम्। प्रकारीभूतविभक्त्यर्थ संबंधस्यैव फलानुरोधान्नामार्थयोर्भेदान्वये प्रकारीभू
तनिपातार्थसंबंधस्यापि हेतुत्वकल्पनात् सदृशश्चंद्रीयमुखमिति शाब्दबोधः। चैत्रस्य धनमित्यत्र स्वा
मि चैत्रीयं धनमितिवत्। अत एव श्रौतीत्वं सादृश्यप्रतियोगित्वाख्यस्योपमानत्वस्यैव पदेन बोधनादिति।
अत्र केचिदाहुः। मीमांसकमतमभिसंधायैवात्र समाधानं। तथाहि। चंद्रप्रतियोगिकसादृश्यमेवात्रेवप
दार्थः। घटो नेत्यत्र घटप्रतियोगिकाभावस्य नञर्थतावत्। न च सादृश्यमात्रमेवात्रेवपदादेरर्थ इति वाच्यं
चंद्रस्य सादृश्यमितिवच्चंद्रस्येव मुखमित्यादेरप्यापत्तेः। घटस्याभाव इतिवद् घटस्य नेत्यादेरप्यापत्तेः। इव
पदस्य सादृश्यमात्रवाचकत्वे ततः षष्ठ्यर्थसंबंधाभेदान्वयेन तद्बोधार्थं षष्ठीप्रयोगस्यावश्य[illegible]कत्वात्
अस्मदीत्याद्युसादृश्यप्रतियोगितायाः एवेवादिपदवाच्यतया षष्ठ्यनपेक्षणात्। न वाव्यय

स्थले विलक्षणस्यानुमितिवल्लोत्रषष्ठीतिवाच्यं॥ नयासत्तितस्यैव गौरवस्यापत्तेः॥ अतोऽव्ययस्थलेऽन्वि
ताभिधानेन नञ्नञ्त्वादिपदानामपीति॥ तत्र॥ समस्तनञोऽभावमात्रपरत्वे न प्रतियोगितांशस्य संसर्ग
मर्यादया भानसंभवात्॥ न च घटस्येति षष्ठ्यापत्तिः॥ न स्याद् जन्याभावोपस्थितौ प्रतियोगितांशस्य
संसर्गमर्यादयैव भानमभावपदजन्यायां तु प्रकारतयैवेति नियमाभ्युपगमात्॥ न च गौरवं तथापि घटो
नेत्यत्रपदप्रतियोगिकाभावभानवारणाय समभिव्याहृतपदार्थप्रतियोगिकत्वाभावो भासत इत्यस्याप्यु
पगंतव्यतया तदपेक्षयाभावमात्रे नञर्थः॥ प्रतियोगित्वं संसर्गमर्यादया भासत इत्येवयुक्तत्वात्॥ घटपद
स्यैव घटप्रतियोगिकाभावपरत्वं न स्याद् तात्पर्यग्राहकाभिमतस्यापि सत्त्वात्॥ अन्विताभावबोधत्वमपि
घटाभावत्वप्रकारकबोधत्वस्यैव लाघवेन नञ्पदशक्तिज्ञानकार्यतावच्छेदकत्वात्॥ एवं च प्रतियोगितांश
स्य संसर्गमर्यादया भानसंभवेन नैतद्वचनमात्रेः शक्तिः॥ अत्र लभ्यत्वात्॥ न च घटो भाव इत्यत्रापि तथाभानसंभ
संभवे षष्ठ्यपेक्षा न स्यादिति वाच्यम्॥ समानविभक्तिकनामार्थयोरभेदान्वयस्यैवाकांक्षितत्वेन तत्र घटस्य प्रति
योगित्वेनान्वयासंभवात्॥ अन्यथाऽभावपदस्यापि घटप्रतियोगिकाभाववाचकत्वसंभवेन तथापि तत्र षष्ठीप्रयोग
स्यादुःसमाधानत्वात्॥ न च निपातस्थले एवान्विताभिधानमितिवाच्यं॥ त्वयान्विताभिधाननियामकत्वं यस्यैव
कल्पितं तस्यैव मम षष्ठीप्रयोगनियामकतया वाच्यत्वात्॥ तद्धेतोरितिन्यायात्॥ न स्यादिदं इष्टत्वाद्दोः प्रतियोगित्व

श्री॰ कौ॰
१८

१४

स्य संसर्गेन या बोधात्र षष्ठी ॥ चंद्रस्य सादृश्यं मुखमित्यत्र तु संसर्गेन या तद्वानासंभवात् ॥ षष्ठी तस्य संबन्धस्य तु या न चंद्रप्रतियोगि
कसादृश्यपदे वा देने वा हृदयप्रतियोगिकाभावेन आहार्यः शक्तिरिति सिद्धम् ॥ तस्मान्निपातातिरिक्तनामार्थयोर्भेदान्वय एव
प्रकारीभूतनिपाता...र्थोपस्थिते तत्त्वमिति नैयायिकाः ॥ केचित्तु इव स्थले तथा बोधसंभवेपि यथा चंद्रस्तथा
मुखमित्यादौ न तदुपपत्तिः ॥ तत्र यादृशधर्मवांश्चंद्रस्तादृशधर्मवन्मुखमित्युपमानोपमेयोभयविशेष्यकबोधा
त् तेन चंद्र इव मुखमित्यत्राप्युभयविशेष्यक एव बोधः ॥ अत एव हंसीव धवलश्चंद्र इति द्वयोपमा तत्रापि यादृशधा
वल्यवती हंसी तादृशधावल्यवांश्चंद्र इति बोधे पुंल्लिंगधवलपदस्य हंस्यामन्वयासंभवात् ॥ अत एव मैत्रीति त्वं द्वयोरेकविभ
वल्यवती हंसी तादृशाधावल्यवांश्चंद्रः साधारणधर्मसंबंधस्याश्रयत्वात् ॥ चंद्रे शान्तेपि मुखममनोज्ञमित्यत्र तु विभक्तिभेदात्तथा ॥ मध्यमं मुखमिव
क्तिकत्वेनोभयत्र साधारणधर्मसंबंधस्याश्रयत्वात् ॥ ...उपमानोपमेयभावस्य प्रसिद्धिवशादेव लाभ इत्याशयवमित्याहुः ॥ तत्र चंद्र इव मुखमित्य
मनोज्ञमित्यत्र तु विभक्तिसाम्येपि ॥ उपमानोपमेययोर्भिन्नलिंगतया मनोज्ञत्वस्य मुखान्वितस्य चंद्रेन्वयासंभवात् यत्र
त्वत्राप्युपमायां दुष्टत्वप्रसंगात् ॥ तत्राप्युपमानोपमेययोर्भिन्नलिंगतया मनोज्ञत्वस्य मुखान्वितस्य चंद्रेन्वयासंभवात् यत्र
त्वत्राप्युपमायादुष्टत्वप्रसंगात् ॥ नपुंसकेन सहैकशेषे एकवद्भावे च पुंल्लिंगरमणीयपदस्य चंद्रे नपुंसकस्य च
रमणीयं च रमणीयश्चेति द्वंद्वे नपुंसकं ... नपुंसकेनेत्येकशेषे एकवद्भावे च पुंल्लिंगरमणीयपदस्य चंद्रे नपुंसकस्य च
रमणीयं च रमणीयश्चेति द्वंद्वे नपुंसक... कुवलयमिव श्यामः कटाक्षः ध्वांतमिव केशी नीलः इत्यादौ दुष्टोपमात्वप्रसंगस्य
मुखे चेयान्न दोष इति ॥ तत्तु इष्ट्यापत्त्या कुवलयमिव श्यामः कटाक्षः ध्वांतमिव केशी नीलः इत्यादौ दुष्टोपमात्वप्रसंगस्य
मुखेनेयान्नदोष इति ॥ तत्तु इष्टमेव ... तथापि दुर्वीरत्वात् ॥ न च तत्र दुष्टत्वमिष्टमेवेति वाच्यम् ॥ मानाभावात् ॥ दुष्टः पुंनपुंसकयोः प्रायेण एति वामनोक्तेरुभयत्र
तथापि दुर्वीरत्वात् ॥ न च तत्र दुष्टत्वमिष्टमेवेति वाच्यम् ॥ मानाभावात् ॥ दुष्टः पुंनपुंसकयोः प्रायेणैति वामनोक्तेरुभयत्र
साम्यात् ॥ प्रागाद्य वाक्ययो येमेवियाधनमिवाजितादृशस्यापि दंडिनानिर्दूषत्वेनांगीकृतस्य दुष्टत्वप्रसंगा

रामः
१८

ठ॥ युक्ते दंतत्वम्॥ तद्भिन्नत्वे सतीति तद्गतधर्मवत्त्वं हि स्यादृश्यं। तत्र तद्भिन्नवृत्तित्वे सतीति तद्[illegible]त्तित्वमात्रमिवार्थः। तद्
नेत्यत्र वृत्तित्वस्य धर्मवत्त्वमित्यत्राधिकरणत्वस्य च निवेशापेक्षयोभयत्र वृत्तित्वनिवेशस्यैव युक्तत्वात्। तद्भिन्नवृत्तित्वनिवे
शस्योभयत्र समानः। न च तद्भिन्नवृत्तित्वस्य तत्प्रतियोगिकान्योन्याभावाधिकरणवृत्तित्वरूपस्य निवेशेन तदभावाधिकरणत्व
निवेश इति वाच्यम्। तद्भिन्नत्वे सतीति भेदनिरूपिताधिकरणत्वस्यापि निवेशसाम्यात्। न च तद्भिन्नत्वे सतीत्यत्र तदन्यो
न्योन्याभावधर्मियोः सामानाधिकरण्यं संसर्गः। तत्र विशेषणतासमवायादिघटितं। तेन भेदस्य च प्रकारः। न च तत्र के सं
बंधघटितसामानाधिकरण्यस्यैव प्रकारत्वात्। तथा तद्भिन्नवे[.]शः। मैवं। वृत्तित्वत्वस्य स्वरूपसंबंधेन वृत्तित्वेऽपि वैशिष्ट्य
मितिमहद्गौरवमिति वाच्यम्। तथापि धर्मे तद्वृत्तित्वविशेषणतास्य सत्त्वेन तत्र समवायादिनिवेशलाघवानवकाशात्॥
न च मते संसर्गीभूतसामानाधिकरण्यघटकत्वेन विशेषणतातादिविशेषसमवायादेस्तद्वृत्तित्वेऽत्र च समवायादेः प्र
वेशः। तत्र च प्रकारीभूतसामानाधिकरण्यघटकत्वेन विशेषणताताविशेषसमवायादेर्वृत्तित्वेऽवृत्तित्ववैशिष्ट्यघटकत्वेन च
स्वरूपस्य निवेशः। धर्मतद्वैशिष्ट्यघटकत्वेनापि स्वरूपस्य निवेश इति गौरवमिति वाच्यम्। धर्मवत्त्वेऽप्यत्रापि समवायसं
सर्गकताया स्वमते सत्त्वात्। न च धर्मस्योपमेये वैशिष्ट्ये समवायादिसंबंध एव स्वयापि वाच्य एवेति वाच्यम्। इवा
र्थे एव लाघवगौरवयोर्विचार्यत्वात्। किं च। तद्भिन्नवृत्तित्वे सति तद्भिन्नधर्मे इवपदस्य शक्तिकल्पने चंद्रनिष्ठप्रकारि
तानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरूपितभेदनिष्ठविशेष्यतात्व[illegible]प्रकारतानिरूपि

तविशेषणताविशेषनिष्ठसांसर्गिकविषयतानिरूपिताधिकरणानिष्ठविशेष्यताख्यप्रकारतानिरूपितस्वरूपनि
ष्ठस्वरूपनिष्ठसांसर्गिकविषयतानिरूपितवृत्तित्वनिष्ठविशेष्यताख्यप्रकारतानिरूपितायास्वरूपनिष्ठसां
सर्गिकविषयतानिरूपितावंद्रनिष्ठप्रकारतानिरूपितसमवायादिनिष्ठसांसर्गिकविषयतानिरूपितवृत्तित्वनि
ष्ठविशेष्यताख्यप्रकारतानिरूपितस्वरूपसंबंधनिष्ठसांसर्गिकविषयतानिरूपितधर्मनिष्ठप्रकारताशालिज्ञा
नत्वमित्यपरशक्तिज्ञानस्य कार्यतावच्छेदकं कल्प्यम्॥ तद्भिन्नत्वे सति तद्वृत्तधर्मवत्त्वे शक्तिकल्पने तु वेद्रनिष्ठप्रकारता
निरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरूपितभेदनिष्ठप्रकारतायानिरूपितायाविशेषणताविशेषनिष्ठ
सांसर्गिकविषयतानिरूपित [illegible] समवायनिष्ठसांसर्गिकविषयतानिरूपितवृत्तित्वनिष्ठसांसर्गिकवि
षयतानिरूपितावेद्रनिष्ठप्रकारतानिरूपितसमवायनिष्ठसांसर्गिकविषयतानिरूपितवृत्तित्वनिष्ठविशेष्यताख्यप्र
कारतानिरूपितस्वरूपनिष्ठसांसर्गिकविषयतानिरूपितधर्मनिष्ठविशेष्यताख्यप्रकारतानिरूपितसमवायनिष्ठसां
सर्गिकविषयतानिरूपिताधिकरणानिष्ठविशेष्यताख्यप्रकारताशालिज्ञानत्वे तत्कार्यतावच्छेदकं कल्पनीयम्॥ धर्म
वत्त्वमित्यत्र च धर्मवद्भिन्नतराशक्तित्वादिघटितधर्मवत्त्वेन धर्मवत्त्वज्ञानं तद्घटकवैशिष्ट्यादीनां शक्तिज्ञानविषयत्वं वा
धिकं कल्पनीयं समस्ते तु धर्मस्यैव विशेष्यतया तत्र धर्मत्वस्य स्वरूपेणैव प्रकारकत्वमिति तद्घटकानां ज्ञानविषयत्व
कल्पनमिति लाघवम् किंच प्रथमपक्षो रमणीयत्वादिधर्मस्यैकत्वेन तत्राभेदेन धर्मान्वयसंभवो न तु द्वितीयइ

ति। तस्माद्विशिष्टशक्तिपक्षे धर्मस्यैव शक्तिकल्पनमुचितं। इदं चात्र पक्षद्वयेपि तुल्यमविभाव्यं। अक्षादिपदवच्छिवशब्दस्य ना-
नार्थतैव। तत्र तत्सममभिव्याहारस्य च नियामकत्वात्तथा बोधः। येन संबंधेन धर्मस्योपमानोपमेययोर्भयवृत्तित्वं तत्तस्यैव सं-
सर्गित्वं। यत्र चोपमानेऽन्यसंबंधेनोपमेये चान्यसंबंधेन धर्मस्य वृत्तित्वं यथा वागर्थाविव संपृक्तावित्यत्र वागर्थयोर्वाच्यवाचक-
भावस्य स्वरूपेण वृत्तित्वं पार्वतीपरमेश्वरयोस्तु संयोगस्य समवायेन तत्र तत्र तत्प्रकारतायां तस्य तस्य संसर्गित्वं। नन्वेवं चंद्रा-
दिपदवैयर्थ्यं। तात्पर्यग्राहकत्वेन तदुपयोगात्। न च प्रत्ययादीनां विशिष्टशक्तिपक्षे घटादिपदवत् चंद्र इव चंद्रतुल्यादौ भिन्नश-
क्तिकल्पनाद्विलक्षणो बोध इति दिक्॥ अथ भेदस्तु तद्धर्मस्य वार्थः। चंद्रत्वावच्छिन्नप्रतियोगितासंबंधेन चंद्रादेर्भेदेऽन्वय-
नस्य च विशेषणताविशेषेण मुखादौ धर्मस्य च समवायादिना मुखएव। तथा च चंद्रभिन्नमुखं चंद्रगतधर्मवदिति बोध इति
चेत् भेदं वा तथाहि। किमत्र विशिष्टवैशिष्ट्यमिति रीत्या बोधः उत एकत्र द्वयमिति। नाद्यः। चंद्रभेदविशिष्टमुखे चंद्रगतधर्मवैशि-
ष्ट्यभानस्य चंद्रभेदं धर्मितावच्छेदकीकृत्य चंद्रगतधर्मप्रकारकज्ञानरूपतया मुखत्वधर्मितावच्छेदकचंद्रभेदप्रकारका-
वांतरवाक्यार्थज्ञानस्य पूर्वमभ्युपगम्यत्वात्। मुखत्वावच्छिन्नविशेष्यताकचंद्रगतधर्मप्रकारकज्ञानरूपविशेष्यतावच्छेद-
कप्रकारकज्ञानस्यावांतरवाक्यार्थज्ञानपूर्वमपि योग्यताज्ञानविधयाऽपेक्षणीयत्वात्। चंद्रभेदावच्छिन्नमुखनिष्ठवि-
शेष्यताकचंद्रगतधर्मप्रकारकयोग्यताज्ञानस्य महावाक्यार्थहेतुतयाप्यपेक्षणीयत्वाच्च। न तत्पदार्थधर्मितावच्छेदकी-
कृत्यान्यपदार्थविशेष्यकतत्पदार्थप्रकारकज्ञानस्याप्रसिद्धत्वाच्च। चंद्रभिन्नवृत्तित्वविशिष्टोपमेयचंद्रवृत्तिधर्मवन्मुख

मित्यस्मत्संमते बोधे तु चंद्रभिन्नवृत्तित्वविशिष्टचंद्रवृत्तिधर्मवैशिष्ट्यं मुखे विषयः। तथा च चंद्रभिन्नवृत्तित्वविशिष्टचंद्रवृत्तिधर्म
द्वत्त्वांतरवाक्यार्थज्ञानविधया योग्यताज्ञानविधया वापेक्षितं। अथवा मुखे चंद्रवृत्तिधर्मस्य तत्र च चंद्रभिन्नवृत्तित्वस्य वैशिष्ट्य
मिति विशेष्ये विशेषणं तत्र च विशेषणांतरमिति न्यायेनैव बोधः। तथा च चंद्र इव मुखमिति शाब्दबोधसामग्र्या मुखं न चंद्र इवेति
चाक्षुषादिकं प्रति प्रतिबंधकत्वे कल्पनीये भवता मुखं न चंद्रभिन्नमित्यादि बाधाभाववैशिष्ट्यं निवेशनीयं मुखत्वाव
च्छिन्नविशेष्यताकचंद्रभेदाभावप्रकारकनिर्णयस्य मुखत्वावच्छिन्नविशेष्यताकचंद्रभेदप्रकारकज्ञानप्रतिबंधकतया तद्दा
नीं मुखं चंद्रभिन्नमिति विशेष्यतावच्छेदकप्रकारकनिर्णयाभावेन शाब्दबोधानुदयात्। मम तु तादृशबोधस्य चंद्रभेदांशे निरू
पितावच्छेदककत्वेन मुखत्वावच्छिन्नविशेष्यताकचंद्रभेदाभावप्रकारकनिर्णयप्रतिबध्यतावच्छेदकानाक्रांततया तादृशशाब्द
बोधोत्पत्तौ बाधकाभावेन तदभावनिवेशे प्रयोजनाभावात्। न च चंद्रवृत्तिधर्मी न चंद्रान्यवृत्तिरिति बाधाभावस्त्वयापि साम
ग्रीप्रतिबंधकतायां निवेशनीय इति वाच्यं। तन्निवेशस्य तवाप्यावश्यकत्वात्। तादृशज्ञानसत्त्वे मुखं चंद्रगतधर्मवदिति ज्ञानस्या
प्यनुपपत्तेः। चंद्रान्यवृत्तित्वावच्छिन्नाभावस्य तद्विषयत्वात्। वस्तुतस्तादृशप्रतिबंधकमेव नास्ति द्रव्यत्वादेश्चंद्रतद्भिन्नोभयवृत्ति
त्वात्। तन्मात्रगर्भे च ग्राह्याभावानवगाहितयैव न तथा। न हि मुखे चंद्रगतधर्मी भिन्नधर्मी ग्राह्योऽपि तु तत्सजातीय इति। ता
दृशाभावावगाहिन एव तर्हि निवेश आवश्यक इति चेत्। तथापि तन्न्यूनमिति द्वयमेवोत्तरं। एवं मुखं न चंद्रगतधर्मवदिति बाधा
भावादरयोश्छुभाभ्यामेव निवेशनीयाविति। न च मुखं न चंद्रभिन्नमिति मानसं प्रति चंद्र इव मुखमिति शाब्दबोधसामग्र्याः

बंधकता १

ग्रतिकल्पनेन न मम लाघवं । तत्काले विशेष्यतावच्छेदकप्रकारकनिर्णयविघटया मुखे चंद्रभि
न्नमिति निर्णयस्यावश्यकतया तत्तत्र वर्तमानसंवादरणोपि तिवाच्यं । चंद्रान्यवृत्तिधर्मो न चंद्रवृ
त्तिरिति मानसंप्रति तादृशसामग्र्याः प्रतिबंधकत्वाकल्पनेन प्रत्युत लाघवस्य ममापि सत्वात् । सा
मग्रीप्रतिबंधकतायां तादृशाभावनिवेशापेक्षया सामग्रीप्रतिबंधकत्वकल्पनेपि लाघवसंभवा
त् । नापि द्वितीयः चंद्रगतधर्मस्य विधेयत्वप्रतीतिवच्चंद्रभेदस्यापि मुखे विधेयत्वेन प्रतीत्यापत्तेः न
चेष्टापत्तिः । अनुभवविसंवादात् । अत एव मुखं चंद्रगतधर्मवदिवेति संशयस्यैव तो निवृत्तिर्न तु
चंद्रभिन्नं नवेत्यस्येति । ममतु विशेष्ये विशेषणमिति न्यायेन मुखे धर्मस्य तत्र चंद्रभिन्नवृत्तित्व
स्य च भानाभ्युपगमान्मुखे धर्मस्यैव विशेषणतया मुखोद्देश्यकधर्मविधेयकप्रतीतिनिर्वाहान्नानु
पपत्तिलेशोपि । न च यावच्चंद्रभिन्नवृत्तित्वं धर्मे चैव परस्य शक्तिः । त्वयापि शक्तित्रयस्यैवोक्तेर्विषयेकल्प्य
त्वात् । न च मम भेदे शक्तिस्त्वन्तु तद्वृत्तीति वाच्यं । भेदवत्यप्येकस्या एव शक्तेः कल्प्यत्वात् । न च मम
भेदत्वे शक्यतावच्छेदकं तवतु भेद इति वाच्यं । तस्यापि भेदघटितत्वात् । तत्र तु प्रतियोगियोगितासंबंधे
न तदेकदेशे भेदे तु उपमानस्य चंद्रादेरन्वयः । भिन्नस्य च वृत्तित्वे चंद्रस्यापि वृत्तित्वे चान्वयः । आकांक्षावला
त् न च चंद्रभिन्नस्य वृत्तित्वान्वयो मदपेक्षया तवाधिक ॰ तिदूषणं । वृत्तित्वनिरूपकारतानिरूपि

तद्विशेष्यतासंबंधेनान्वयबोधं प्रति चंद्रादिपदजन्योपस्थितित्वेन हेतुत्वस्य त्वयापि कल्पनीयत्वात् तत्र चंद्रा
दिकमनिवेश्य तद्भेदपदजन्योपस्थितित्वेनैककारणताकल्पनात् ॥ उपमानानामनेकत्वेन तद्घटितकार्यका
रणभावानामानंत्येन तदपेक्षया लाघवात् तैरेव लाघवेनादरणीयत्वात् ॥ न च वृत्तित्वस्य वनशक्तिः सामानाधि
करण्यसंबंधेन चंद्रभेदस्य धर्मे एवान्वयाभ्युपगमात् तथा च सामानाधिकरण्यसंबंधेन चंद्रभेदविशिष्टो
यो धर्मस्तद्वन्मुखमित्येव धीरिति वाच्यं ॥ ममापि स्वाश्रयवृत्तित्वसंबंधेन भिन्नविशिष्टो यो धर्मस्तद्वन्मुखमि
ति वक्तुमशक्यत्वात् ॥ एतावान्परं विशेषः ॥ तव विशेषणतासमवायाद्युभयघटितं सामानाधिकरण्यं संसर्गः
मम त्वभेदसमवायादिघटितं तन्न ॥ इति ॥ विशेषणतापेक्षया च तादात्म्ये लाघवमिति सोऽप्यधिकः सिद्धं तथा ता
दात्म्यस्य सामानाधिकरण्यघटकत्वेन लाघवं परं ममातिरिच्यते ॥ अपधर्मस्य चंद्रभिन्नाश्रयवृत्तित्वबोधे
नैव मुखस्य तद्वत्त्वधीसिद्धौ मुखे तद्वत्त्वस्य योग्यत्वापत्तिरिति चेत् सामानाधिकरण्यसंबंधेन धर्मे चंद्रवै
शिष्ट्यबोधेपि तुल्यमेतत् ॥ सांसर्गिकविषयता तादृशबोधेपि तत्प्रकारकबोधाभावात् नतपेति चेत् ॥ ममापि समा
नमेव समाधानं ॥ एवं सति धर्मे चंद्रगतत्वबोधानुपपत्तिस्तथा च तन्निरूपितसादृश्यबोधानुपपत्तिरित्यप्या
वयोस्तुल्यम् ॥ चंद्रवृत्तित्वप्रकारकबोधानुरोधेन तत्र शक्तिरेवेत्यपि तुल्यमेव ॥ न च चंद्रभिन्नवृत्तित्वबोधे मु
खे तद्वत्ताज्ञानेन स्यादनाकांक्षत्वादिति वाच्यम् ॥ मुखविशेष्यकतद्धर्मप्रकारकबोधस्य ततोऽभावेन
योग्यत्वाभावात् ॥ अत एव घटत्वमित्यत्राभावप्रत्ययस्य समवायसंबंधावच्छिन्नप्रतियोगितावच्छेदकघट

त्प्रत्योऽन्याभावप्रतियोगितानवच्छेदकत्वार्थकतया घटवृत्तित्वस्य लाभेऽपि समवायसंबन्धेन घटवृत्तित्वस्य घ
टत्वेऽप्रसिद्ध्याभावेन प्रकृतस्यार्थघटस्य घटत्वे समवायेनान्वयोगीकृतः । नहि वह्निभिन्नवृत्तित्वेन धर्मस्य प्रसक्तवृत्तित्व
बोधोपपत्तिः । नदन्यघटत्वादिनत्यर्थवसानात् । नहि तद्भिन्नत्वावच्छिन्नवृत्तित्वं तद्धर्म्यबाधादिति यत्किंचिदेतत् ॥ अ
थैवमन्वयविलोपापत्तिः । त्वन्मते भेदस्यापि प्रमेयान्वयाभावेन तथापि वह्निभिन्नवृत्तिवह्निवृत्तिधर्मवान्स्येद्द
इति बोधसंभवादिति चेत् । वह्निभिन्नवृत्तित्वे सति वह्निगतधर्मवदिति बोधवारिनस्तवापि कल्पने तद्दोषावकाशः
उभयभेदस्य वह्नेरपि सत्वात् । व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वेनान्योन्याभावविशेषणात् इति
चेत् । तादृशविशेषणमेव किमर्थं दीयत इति चेदर्थान्तरयोगात् । तत्र विवक्षितबोधनिर्वाहार्थं भिन्नत्वस्य प्रवृत्तिस्वीकार
इति नु ममापि तुल्यम् । नहि वार्थभेदे तादृशप्रतियोगिताकत्वविशेषणादेयमेवेति नियमः । भेदविवक्षायां तत्रोप
मात्वस्यापि स्वीकारात् । न चात्र मानाभावः । प्रामाणिकैर्वह्न्यांगीकारात् । प्रकृतधर्मे वह्निभिन्नवृत्तित्वबोधेन
वह्न्यन्यनिष्ठसादृश्यप्रतियोगित्वलाभेन वह्निनिष्ठसादृश्यप्रतियोगित्वान्तरस्यावच्छेदानुगुण्यात् । अन्यथोप
मानान्तरस्यावृत्तिवदुपमेयान्तरस्यावृत्तेरपि वेरन प्रसंगात् । वह्न्यन्यनिष्ठसादृश्यप्रतियोगित्वान्यप्रतियोगिक
सादृश्यानाअप्रयत्वोभयबोधे चमत्कारोत्कर्षस्यानुभवसिद्धस्यापह्नोतुमनर्हत्वादित्यलं वहुना । इदं चात्र विभा
व्यं साधारणधर्मस्य शाब्दत्वेन तद्रूपेणोवस्थदवार्थः । अन्यथा तु धर्मत्वेनैव । तथा च वह्निवन्मुखमित्यत्र वं
ह्निप्रतियोगिकान्योन्याभावसमानाधिकरणां यद्वह्निवृत्तिरमणीयत्वं तद्वन्मुखमिति बोधः । वह्निवन्मुख

मित्यत्र तु नादृशं चंद्र इति धर्मवन्मुखमिति । अत एव व्याघ्रौ तीत्युपपद्यते साधारणधर्मस्योपमानोपमे
यवृत्तितायाश्च पदेन प्रतिपादनात् । तत्र समानाधिकरणांते नोपमेयवृत्तित्वं वृत्तित्वं ते नोपमानवृत्तित्वं च । तत्तेनो
पमानवृत्तित्वमिति विवेकः । नव चंद्रान्यवृत्तित्वस्य ततो लाभे पि मुखवृत्तित्वस्याबोधात्कथमेवमिति वाच्यं
उपमेयस्यापि चंद्रान्यतया सामान्यतेन तत्वृत्तित्वलाभात् । तावतैव प्रकृते व्यवस्थोपपत्तेः । न तु साधारणध
र्मप्रयोगस्थले तस्यैवेव पदेन रमणीयादिपदेन च बोधनेन्यतरस्यानिराकांक्षत्वादन्वयानुपपत्तिः । न चोभा
भ्यामेकमेवोपस्थाप्यत इति वाच्यं । तावतापि चंद्र इव मुखमाह्लादयतीत्यादावनुपपत्त्यनुद्धारात् । आह्लादकत्वस ८६
धात्वर्थतया नामार्थमुखे व्याप्यत्वादिभेदसंबंधेनान्वयायोगात् । धात्वर्थनामार्थयोः साक्षाद्भेदान्वयस्या
व्युत्पन्नत्वात् । न च चैत्रेण न स्पृश्यत इति भावाख्यातस्थले धात्वर्थस्य प्रतियोगितासंबंधेन नञर्थेनकेऽलं भक्षये
दित्यादौ नञर्थस्य विशेषणतानाविशेषसंबंधेन धात्वर्थे भक्षणे वान्वयदर्शनात्तद्दोष इति वाच्यं । तावता धात्व
र्थनिपातार्थयोरन्वयेपि निपातातिरिक्तनामार्थधात्वर्थयोरन्वयस्यादर्शनात् । अन्यथा तंडुलः पचतीत्यत्र कर्म
तासंसर्गेणातंडुलस्य पाकान्वयापत्तेरिति वत्तन्नादृशस्थले आह्लादकत्वमिवार्थस्य वधातेस्तात्पर्यग्राह
कमात्रमिति वाच्यं त्वात् । अपि चंद्रसीव धवलः । स्थंडिले त्वाद्रेः कथं तु छत्वं । उत्तकबोधे लिंगभेदस्याप्रतिकू
लत्वादिति चेत् । मैवं । न हि शाब्दबोधप्रतिकूलतयैव दोषत्वं । उभयविशेष्यकबोधांगीकारे प्यतिप्रसंगस्या
भिहितत्वात् । हीनत्वादिदोषाणां तत्प्रतिकूलतोयाः संभावयितुमप्यशक्यत्वाच्च । किंतु लिंगविशेषस्योपमा

यो विशेषानुपपादकत्वेन न तत्प्रयोगस्यानर्थकत्वादेव दोषत्वं॥ अत एव यत्र पुंल्लिंगेऽप्युपमेये नित्यस्त्रीलिंगस्योपमानस्य
न पुंल्लिंगतासंभवः॥ यत्र चैकवचनांतेऽप्युपमेये नित्यबहुवचनांतस्योपमानस्यैकवचनांतत्वासंभवस्तत्र न लिंगवचनभेदे
पि दोषः॥ तदुक्तमाचार्यदंडिना॥ न लिंगवचने भिन्ने न न्यूनाधिकतापि वा॥ उपमादूषणायालं यत्रोद्वेगो न धीमतां॥ स्त्रीव गच्छति षंढो
ऽयं वक्त्येषा स्त्री पुमानिव॥ प्राणा इव प्रियोऽयं मे विद्या धनमिवार्जितेति॥ सहृदयोद्वेगबीजं तु उत्कटीभूतप्रकृतानुपयुक्तलिंगव
चनविशेषोपादानमेव॥ न च नियतलिंगवचनेष्विति न तत्रोद्वेग इत्यर्थः॥ एवमेव काव्यादर्शविवरणकृद्भिर्मल्लीनाथादिभिरपि व्या
ख्यातं॥ नियतवचनत्वं च स्वार्थाभिधानानियतस्वकत्वं॥ तत्त्वेनानुशासनतात्पर्यविषयत्वमिति यावत्॥ प्राणादारादयस्त्वे
कस्मिन्नपि प्रयोगे न बहुत्वाभिधानानियमात्॥ तेन प्राणादारादेरेकत्वे एकवचनान्तत्वेनानुशासनेऽपि पुंसि भूम्न्यसवः प्रा
णा इतिवद्बहुवचनांतत्वेनाप्यनुशासनमस्त्येवेति न दोषसंभवः॥ चंद्रेण तुल्यं मुखमित्यत्र तुल्यपदस्य सादृश्यवानर्थः॥ केवल
सादृश्ये तदप्रयोगात्॥ सादृश्याभिन्नं मुखमिति बोधापत्तेश्च॥ नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वात्॥ तदेकदेशस्य सादृश्यस्य च
चंद्रप्रतियोगिकान्योन्याभाववत्सामानाधिकरण्यधर्मस्यार्थः॥ आश्रयत्वं प्रत्ययार्थः॥ तृतीयार्थश्चन्द्रनिष्ठत्वं॥ तुल्यार्थैरतुलो
पमाभ्यां तृतीयान्यतरस्यामिति सूत्रात्॥ अत एव चंद्र इव मुखं भाति चंद्रमिव मुखं पश्यामि चंद्रेणेव मुखेन कृतमित्यादौ उपमा
नोपमेयसमानविभक्तिकत्वनियमेऽपि चंद्रात्तुल्यं मुखं भाति चंद्रात्तुल्यं मुखं पश्यामि चंद्रात्तुल्येन मुखेन कृतमित्यादौ

नोपमेयवृत्तिविभक्तिनियमः । अन्यथा चंद्र इव धर्मयोर्नामार्थतया अयता संबंधेन चंद्रे धर्मान्वयो न स्यात् । अत एव वृत्तित्व
स्यापि तुल्यपदार्थत्वकल्पनमानेनिष्फल नामार्थतासाम्यात् । तत एव चंद्रप्रतियोगिकान्योन्याभावसमानाधिकरणत्व
स्य चंद्रवृत्तित्वस्य च धर्मेन्वयः । तस्य चान्वये । तदर्थान्तरे । तथा च चंद्रप्रतियोगिकान्योन्याभावसमानाधिकरणचंद्रवृत्ति
धर्माश्रयाभिन्नं मुखमिति धीः । अत्रोपमेयवृत्तित्वं धर्मोपस्थापकपदस्य तु उपमानवृत्तित्वं च तृतीयाया अर्थः । अत उभयं
धर्मवाचकपदार्थेन भवतीत्यर्थः उपमेत्यर्थः । न चोभयत्रैव धर्मसाम्यात्कथमयं विभाग इति वाच्यम् । इवादौ सादृश्यशक्ति
स्त्वन्याद्यैर्लक्षणोल्य चेकपमेवमिति तन्यत्वात् । प्रकृतमित्रपद इति पायले नास्मल्लक्षणस्य च विशेषात् । चंद्र इव मुखं पश्यामी
त्यादावुपमानपदोत्तरविभक्तिः स्वविशेष्यसमानलिंगवचनकत्वस्यौत्सर्गिकतया साधुत्वार्था । न च प्रथमोपस्थिततया
साधुत्वार्थमप्रथमैव स्यादिति वाच्यम् । विशेषणातिरिक्तस्थले तथात्वात् । न च चंद्रस्य मुखान्वयाभावान्न तथा विशेषणवि
शेष्ययोरभेदान्वयार्थमेवैकविभक्तिरूपयोगादिति वाच्यं । विशेषणविशेष्ययोः समानविभक्तिकत्वमेवौत्सर्गिकं तत्र
च साक्षादन्वयाभेदेनैव त्वन्यदे तत । न च परंपरया विशेषणस्यापि तल्लिंगत्वे तु द्रुतं पक्षे दधता दृढेन विशिष्ट इत्यादौ तु द्रु
तादेरपि तृतीयापत्तिः । नामार्थान्तराविशेषणीभूतेति विशेषणोविशेषणस्यैरेयत्वात् । न च चंद्रादेरपि प्रतियोगित्वेन
नार्थभेदान्वयात्कथं प्रथमा वृत्तिरिति वाच्यम् । निपातातिरिक्तनामार्थान्तरेति वाच्यत्वात् । एवं च चंद्रात्तुल्यं मुखं पश्यामीत्या

दावपि नातिप्रसंग इति ॥ नन्वेवमप्यव्ययविशेषणानां नपुंसकत्वमित्यनुशासनादिवार्थविशेषणस्य चंद्रादेः क्लीबत्वापत्तिरिवीरेति चेन्न मैवं शास्त्रीयस्यामाशास्त्रीयस्या मृगीव चपला मृगवच्चपल इत्यादि महाभाष्यकारादिप्रयोगसामर्थ्यादुपमानवृत्तिलिंगसिद्धेः ॥ अत एव पार्थ इव धनुर्द्धर इत्यादावपि नानुपपत्तिः ॥ उक्तानुशासनस्यानियतलिंगविषयत्वात् ॥ चंद्रस्य नतले त्यादौ तु तुल्यशब्दस्येव शब्दवत्सादृश्यमात्रार्थत्वेपि तद्धर्मेद्वारो प्रतियोगित्वसंबंधेन चंद्रादेरन्वयासंभवान्न षष्ठीप्रयोग इति विशेषः ॥ तत्र श्रौतार्थत्वविशेषास्तु धर्मलुप्तावसरे वक्ष्यंत इति चंद्रो मुखं च तुल्यमित्यादौ तु तुल्यपदार्थस्य चशब्दवाच्येतरेतरयोगवत्वेन चंद्रमुखयोर्द्वंद्वजपदान्वयादवगमात् चंद्रप्रतियोगिकान्योन्याभावसमानाधिकरणातद्भिन्नधर्मवन्मुखं मुखप्रतियोगिकान्योन्याभावसमानाधिकरणातद्भिन्नधर्मवांश्चंद्र इति बोधः ॥ अत एव मुखं चंद्रसदृशं न वा चंद्रो मुखसदृशो न वेति संदेहद्वयस्यापि ततो निवृत्तिः ॥ तुल्यपदार्थैकदेशस्य सादृश्यस्य चशब्दवत्वे नोभयत्रान्वयेपि सादृश्यवाचकपदस्योभयत्र धर्म्यन्वयविरहः स्पष्ट एव ॥ तस्माद्यत्र धर्मोपस्थापकपदस्यैवोभयत्र संबंधबोधकत्वं ॥ तत्र श्रौत्यन्यत्रार्थीति सिद्धं उपमानादिवृत्तित्वविशिष्टनियतशाब्दबोधविषयत्वं श्रौतीत्वं इवादौ तथा नियमात् ॥ तुल्यादौ चंद्रेण तुल्यमित्यत्र तथात्वेपि चंद्रो मुखं च तुल्यमित्यत्र प्रकृतित्वादिनैवोपमानोपमेयभावप्रतीतेर्विलंबादिति प्रकाशसिद्धांतः ॥

दीक्षितास्तु । सादृश्यमुख्यविशेष्यकज्ञानजनकपदप्रयोगे श्रौतीत्यत्रार्थीत्याहुः । इवादिभिः सादृश्यमनुयोगित्व
संबंधेन बोध्यते । तुल्यादिभिस्तु सदृशाभेदेनेति विभाग इत्यन्ये । तुल्यादिष्वपि प्रामाण्यामविवेकेन सादृश्यस्यैव विधेयत्व
त्वेऽसमर्थ्यमित्यपरे ॥ अत्र धर्मोपस्थापकपदस्याभयत्र सादृश्यसंबंधबोधकत्वे श्रौतीति पक्षे तुल्यार्थकवति प्रमय
योगेऽपि श्रौती स्यात् । तथा हि । तुल्यादिपदोपादाने वृत्तित्वादीनां नामार्थत्वे न तत्र चंद्राद्यभेदान्वयानुपपत्त्या चंद्रवृत्ति
त्वादिकं चंद्रे यो त्वादिपदानामर्थ इत्युक्तत्वात्तत्र चंद्रवृत्तित्वादिकं तुल्यपदार्थो नेत्युक्तं । वतिप्रत्ययार्थस्तु वृत्तित्वादेश्चं
द्रादेर्भेदान्वयस्योपपन्नत्वे न तत्रैतत्सामर्थ्यशक्तिकल्पनात् । तत्र वृत्तित्वं भेदो धर्मस्य वत्यर्थः पूर्ववदेवान्वये चंद्रान्वे
नाभावसमानाधिकरणचंद्रवृत्तिधर्मवन्मुखमित्येव बोधः । न चेष्टापत्तिः । तत्रार्थी उपमेति सकलग्रंथविरोधा
पत्तेरिति चेत्तदुच्यते । तेन तुल्यमिति तुल्यार्थे वतिविधानं । तथा च यावदेव तुल्यपदेन बोधयितुं शक्यते तावदेव वति नापि
अनुशासनमिकार्यातिरिक्तार्थबोधकत्वे सर्वत्राव्यवस्थापत्तेः । एवं च तत्रापि चंद्रपदस्य तद्वृत्तित्वे लक्षणा । उक्तरी
त्यानुशासनसंमतत्वात् । अतो नानुपपत्तिलेशोऽपि ॥ अत एव पूर्ववत्सन इति सूत्रे पूर्वस्मादिवेति भाष्यं पंचम्यं
ताद्वतिविधानाभावेनानुपपन्नमाशंक्य कैयटेनोक्तं । तुल्यार्थे विहिता तृतीया सर्वविभक्त्यर्थानंतर्भावयतीति
पंचम्यर्थस्यार्थग्रहणानुपपन्नमेव । यथा ब्राह्मणवद्वैश्यादधीते ब्राह्मणादिव वैश्यादधीते इत्यर्थः । वैश्या

पादानकस्याध्ययनस्य ब्राह्मणापादाने कोऽध्ययनमुपमानमिति तत्र च ब्राह्मणशब्दो वर्त्तते ॥ तेन ब्रा
ह्मणेन तुल्यं वैश्या दधीत इति लतीयातो इति रेव मिहापि पूर्ववदिति ॥ अथ वति प्रत्ययप्रकृत्यर्थस्योप
मानत्वनियमाद्वृद्धवृत्तित्वमेवोपमाने स्यादिति चेन्न ॥ प्रकृतिगतस्यैव तथात्वात् ॥ अयोग्यसंख्यादेरणु
पमानत्वापत्तेः ॥ नन्वेवं ब्राह्मणाध्ययनमुपमानमिति अत्र पक्षविरोधोऽध्ययनस्यलक्षणत्वादिति वाच्यं ॥ भावा
नवबोधात् ॥ प्रत्ययोपस्थितिरिस्थायां यदर्थबोधकत्वं तस्योपमानत्वनियमात् ॥ नन्वेवमपि वृत्तित्वस्य धर्मान्वया
नुपपत्तिः ॥ प्रकृत्यर्थत्वाभावादिति वाच्यं प्रत्ययार्थे प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति नियमेऽपि सकलस्य सा
धारण्यात् प्रकृत्यर्थोपादानात् ॥ अत एवाङ्गयोगो [illegible] इत्यादौ तीर्थादेः सम्बन्धार्थेऽप्यन्वयो न स्यात् ॥ तस्मात्तुल्यार्थे वति
विधानात्तदर्थ एव तद्धिक्रितिरिति सिद्धं ॥ यत्तु ब्राह्मणवत् ॥ क्षत्रियवत् ॥ ब्राह्मणादिवत्र बलादवेति निरूक्ते इत्येतत
त्कालितार्थकथनं मात्रं प्रयमाणाद्वृत्तिविधानाभावात् ॥ किं च तुल्यादिपदानां सादृश्यमात्रार्थत्वेनामार्थत्वाभाग
इदान्वयानुपपत्तिः कृपबाधकाभावेन तन्मतेऽपि तत्र श्रोतीत्वस्यानुपमानादि विशिष्टविषयत्वनियतशाब्द
धविषयत्वस्यापि वतिप्रत्ययत्वावच्छेदेन व्यभिचाराभावेन सादृश्यमुख्यविशेष्यकज्ञानजनकत्वसत्वात् ॥ अतु योग्य
गित्वसंबन्धेन न द्योधकत्वस्यापि वतिप्रत्ययस्य तुल्यार्थविधानेन न तद्योगे यथा ॥ आर्पीतपा ॥ वतिप्रत्ययप्रयोगेऽपी

नित्वया कल्पनीयम् । तथानुशासनिकमेव तुल्यपदसमानार्थकत्वं वृत्तिप्रत्ययसमयाक्षयशीर्यमिति निर्मूलक
ल्पनोपजीविनात्वया समालंवितकृत तत्र प्रामाण्याभावश्च समस्यमनोपरि यो घाम्नासउ ज्ञाप्यत इति महत्साहसम् । त
दुक्तं । आशामोदकतृप्ताये ये चोपार्जितमोदकाः । रसवीर्यविपाकादि तुल्यं तेषां प्रसज्यत इति दिक् ॥ केचित्तु सादृश्यं
पदार्थान्तरमभ्युपगम्यैवं बोधमाहुः । अरविंदसुंदरं मिलत्यत्र अरविंदपदस्यारविंदनिरूपितसादृश्यप्रयोजके लक्ष
णा । तस्य चाभेदसंसर्गेण सुंदरपदार्थैकदेशे सौंदर्येऽन्वयः । चैत्रस्य नप्तेत्यादावेकदेशान्वयस्य बहुशो दर्शना
त् । तथा चारविंदनिरूपितसादृश्यप्रयोजकाभिन्नसौंदर्यवदभिन्नं मुखमिति धीः । समुदायस्यैव तादृशविशि
ष्टार्थपरतेत्येके । अरविंदपदस्यैव लक्षणायां सर्वोऽर्थः । सुंदरपदं तात्पर्यग्राहकमित्यन्ये । अत्रोच्यते । पक्षत्र
येऽप्यरविंदसुंदरमित्यत्र समासगतवाचकलुप्तोपमात्वं सिद्धांतसिद्धमसिद्धं स्यात् । सादृश्यवाचकपदसत्त्वात्
न च सादृश्ये लक्षणेति न तद्वाचकपदसत्त्वमिति न तद्विरोध इति वाच्यम् । वाचकत्वं सत्त्व एव स्यात् उपस्थापकत्वमे
व । न तु शक्तत्वं गौरवात् । अन्यथा तेन तुल्यमित्यादिना विहितस्य वत्यादेरपि धर्मिशक्ततया पदार्थतावच्छे
दकीभूतसादृश्यशक्तत्वाभावात् तत्रापि वाचकलुप्तत्वापत्तेः । न चैवमन्यतेऽपि वत्यादीनां सादृश्यशक्तिर्लक्षणान्यतरा
भावे न दोषसाम्यमिति वाच्यम् । स्यात् तद्धि पदतानियतबोधजनकत्वस्य विवक्षितत्वात् । न चैवं तिलवस्याशक्ते

लक्षणान्यतरत्वरूपस्य निवेशापेक्षया शक्तिनिवेशे कृतो गौरवमिति वाच्यं शक्तिजन्यबोधस्य ल
क्षणाजन्यबोधात्मकत्वेन लक्ष्यतावच्छेदकरूपाभावेन विशेषणविधया निवेशानुपपत्तेः॥ चमत्कारप्रयोजक
रूपस्यैवोपमाविभाजकत्वात्॥ अत एव मृगनयना हरते मुनेर्मनइत्यत्र वाचकधर्मोपमा
नलुप्ता मृगनयनाहरतीत्यत्र कर्मकाशकृतासम्बन्धपमानेत्यादिना समासे लोपो यदा भवतस्त
देरुदाहरणमित्युक्तं॥ केचित्तु कृरीत्या मृगपदस्यैव मृगनयनसदृशे लक्षणेति यदि
स्वीक्रियते तदा तद्घटकमृगशब्दस्य त्वेन लुप्तत्वाभावादिति हितदाशयः॥ यद्यपि तेनैतत्तं त
न्नाथ त्रिलुप्तैव॥ लक्षणापक्षे तत्र विशिष्टार्थवाचकत्वमिति वैयाकरणमतेऽपि स्वस्वमात्र
बोधकपराभावात्तथा लोपापादितिः॥ तत्रेदमवसेयं॥ मात्रपदोपादानेवीजाभावाद्वारवात्र स्व
तराबाधकत्वे सति स्वबोधकस्य तदर्थत्वात्॥ अप्राप्तस्येह्युपमानादिपदानामपि चेत्य
न्यचेद्गतत्वेनतत्संबंधबोधकत्वात्॥ अथ स्वविषयकत्वाभाववद्वृत्तिविषयिताकान्यज्ञानजनक

त्वेन तदर्थ इति चेत् तर्हि प्रस्तुतेपि वस्तुन्यस्तु इत्थं प्रक्षेपः ॥ अत एव काव्यस्य सदृश
मित्यत्र सदृशपदस्योपमानेन लक्षणां कृत्वा तद्वानीसादृश्यवाचकपदसमभावे नाहि
लुप्तत्वं स्यादित्याशंक्य सादृश्यप्रतियोगित्वस्योपमानत्वार्थकसदृशपदस
त्वेन वाचकलोपाभाव इति व्याख्यातं न्यायालंकारादिभिः ॥ त्वद्रीत्या तु लक्षणा
गम्येप्यर्थे लुप्तत्वव्यवहारात् तल्लक्ष्यतावच्छेदकीभूतसादृश्यस्य सुतरां तदर्थत्वा
भावादनुपपत्तिः स्यात् ॥ अरविंदवत्सुंदरमित्यत्र तेन तुल्यमिति विहितस्य वतेः सा
दृश्यवदर्थस्य [illegible] सादृश्ये लक्षणोक्तौ लक्षणया
तदभिधानात्तदर्थत्वमिति स्वयमेवोक्तं ॥ अत्र त्वद्रीत्या तु तेनापि वाचकलुप्तत्वं स्यादि

त्रिस्वरूपविरोधोऽपि दुःपरिहर इति दिक् ॥ अरविंदमिव भातीत्यत्रेवार्थः सादृश्यं । तत्रारविंदस्य निरूपि-
तत्वसंबंधेनान्वयः । सादृश्यस्य च प्रकारतासंबंधेन धात्वर्थे ज्ञानेऽन्वयः । तथा चारविंदनिरूपितसादृश्यप्रका-
रकधीविशेष्य इति बोधः । सौंदर्ये शोभत्यस्याः पुपाशनेत्तीत्यर्थः प्रयोज्यत्वं धात्वर्थे भाने इवार्थसादृश्ये वाऽन्वे-
ति तेन सौंदर्यप्रयोज्यारविंदनिरूपितसादृश्यप्रकारकधीविशेष्य इति बोध इति । अत्र ब्रूमः । प्रकारतया सादृश्या-
न्वयबोधं प्रति तदनुयोग्युपस्थापकपदजन्योपस्थितित्वेन हेतुतेति कार्यकारणभावो लाघवात्कल्प्यते ॥ अ-
रविंदमिव मुखमित्यादि साधारणात् । अरविंदनिरूपितसादृश्यवन्मुखमित्येव बोधात् । सुंदरशरदिपदोपाशनेपि
तादृशसादृश्यवन्मुखं सुंदरमित्येव बोधात् सादृश्यप्रयोजकधूमाकांक्षायां सौंदर्यस्यैवमानसे[illegible] न तत्वेन वि-
षयीकरणाच्च ॥ सौंदर्यशोभनुकौ च सौंदर्यप्रयोज्यारविंदसादृश्यवन्मुखमिति बोधः । न च मुखं न चंद्र इवेत्यादौ सादृश्य-
स्य प्रतियोगितासंबंधेन नञर्थप्रकारत्वाद्व्यभिचार इति वाच्यं ॥ प्रतियोगित्वातिरिक्तत्वस्य कार्यतावच्छेदकसंबंधे नि-
वेशत्वात् ॥ एवं चंद्र सादृश्यं मुखवदतीत्यत्रापि न व्यभिचारः ॥ अत्र प्रकारतासंबंधेन सादृश्यस्यान्वयाबोधात् ॥ नन्वेवं
सति अरविंदमिव सुंदरं मुखमिति शाब्दबोधान्मुखवृत्त्यरविंदीयसादृश्यं सौंदर्यप्रयोज्यं न वेति संदेहनिवृत्तिर्न
स्यात् ॥ त्वद्रीत्या सौंदर्यप्रयोज्यत्वस्य सादृश्यमानसगम्यत्वात् ॥ न च तत्र मानसोत्तरमेव संशयानिवृत्तिर्न तु शाब्दबोधा-

व्यवहितो न रक्षसो क्षणाविलंबस्य दुर्ग्रहत्वादिति वा । तत्कल्पने प्रमाणाभावादिति चेत् न । अरविंदमिव भातीत्य
त्राप्यरविंदनिरूपितसादृश्यप्रकारकधीविशेष्यत्वेन तद्बोधाद् अप्यरविंदसदृशं न वेति संशयानिवृत्तिप्रसंगसत्वा
त् क्षणाविलंबकल्पनस्य चोभयत्र साम्यात् । एवं चारविंदमिव भातीत्यत्रापि तादृशसौंदर्यमुखं ज्ञानविषय इत्येव
बोधः । अन्यथोक्तकार्यकारणभावे व्यभिचारापत्तेः । तादृशसंबंधेन बोधे धातूपस्थितिकल्पने गौरवाच्च । नन्वे
वमेतदीयसादृश्यप्रकारकज्ञानाभावेपि अरविंदमिव मुखं चैत्रस्य भातीति प्रयोगः स्यात् । तादृशसौंदर्यवतो मुखस्य
ज्ञानविषयत्वसत्वात् मम तु सादृश्यप्रकारकत्वस्य ज्ञाने लाभान्न तथेति चेत् । इष्टापत्तेः । स्वरूपान्तरेण मुखप्रकारकज्ञानस
त्वेपि मुखं चैत्रस्य भातीति न तदा प्रयोग इति वाच्यम् बाधकाभावात् । प्रकारत्वार्थकविभक्त्यैवारविंदाद्य । वस्तुतो मु
खत्वरूपमुखं तद्भातीति बोधात् । अतएव तत्र बोधाद्वैत्रो मुखत्वप्रकारकज्ञानवान्न वेति संशयानिवृत्तिः । अतएवा
रविंदसादृश्यवन्मुखं भातीत्यत्रापि वस्तुतोरविंदसादृश्यवन्मुखं ज्ञानमित्येव बोधः । मानान्तरेण चैत्रीयज्ञानस्य सा विषय इ
दृश्यप्रकारकत्वनिश्चयेतत्सादृश्यप्रकारकज्ञानवान्न वेति संशयानिवृत्तेर्नत्वन्यथेत्यनुभवसिद्धमेतत् । तदवच्छि
प्रकारताकज्ञाननिश्चयस्यैव तदवच्छिन्नप्रकारताकज्ञानाभावबुद्धिप्रतिबंधकत्वात् । अरविंदसुंदरं मुखं मम भा
तीत्युक्तौ तु वाक्यार्थज्ञानविधया वक्तुरि सादृश्यप्रकारकत्वं ज्ञानस्य लभ्यते । अतएवारविंदसुंदरमुखं वालानांप

यावस्थितमेव भातीत्याशावपि न ज्ञानेन तत्प्रकारकत्वलाभ इति स्पष्टमेव । अपि च यत्र रविंद
मिव भातीत्यस्मादरविंदसदृशं न वेति संशयनिवृत्तिरनुभवसिद्धा । सा च त्वदुक्तरीत्या दु
र्घटा । न च तस्य शाविलेव कल्पनान्निस्तारः । तत्प्रकारकधीविशेष्यत्वस्य तद्व्यभिचारेणात
द्रुतरमप्यरविंदसदृशमिति मानसासंभवात् । न च प्रमाविशेष्यत्वं तदर्थ इति वाच्यं । कुमुद
मिव मुखमित्यादौ तदसंभवात् प्रमाया धात्वर्थाभावाच्च । अस्माकं त्वरविंदसदृशं मुखं ज्ञान
विषय इति बोधे प्रतिबंधकज्ञाननिर्वाहात्र काप्यनुपपत्तिः । न चैवमपि मुखमरविंदमिव भा
तीत्यत्रारविंदसादृश्यप्रकारकधीविशेष्य इति धीरावश्यकीति वाच्यं । तत्रापि स्वप्रकारकज्ञा
नविषयत्वसंबंधेन सादृश्यवदित्येव बोधात् । धातोरुक्तसंसर्गे तात्पर्यग्राहकत्वात् । न च सादृश्य
प्रकारकधीविषयो न वेति संशयायनिवृत्तिप्रसंगः । तत्प्रकारकतदभावज्ञाने तत्संसर्गकबुद्धेः प्रति
बंधकत्वादिति वाच्यं । तादृशस्यापि प्रतिबंधकत्वाभ्युपगमात् । स्वशाविलेव कल्पनादिति दिक् ॥ अ २६
तरवारविंदतुल्यो भातीत्यत्रापि नानुपपत्तिः । त्वन्मते सादृश्यस्य निपातनामिन्नामार्थत्वेन धात्वर्थभेदे
नान्वयानुपपत्तेः । न च तुल्यपदस्य तुल्यत्वप्रकारके लक्षणा । तस्य चाभेदसंबंधेन धात्वर्थेऽन्वयइ

दिवाच्यं॥ तथा सति क्रियाविशेषणानां कर्मत्वं नपुंसकलिंगता च वक्तव्येत्यनुशासनात् क्लीवत्वापत्तेः॥ प
तु स्तोकं पचतीत्यादिविषयत्वमात्रेणानुशासनोपपत्तिरिति॥ तदसत्॥ संकोचे प्रमाणाभावात्॥ अपि
च अरविंदतुल्यो भात्यरविंदवद्भातीत्याभ्यां तुल्यविषयकोऽनुभवः॥ न च त्वरविंदतुल्यत्वप्रकारकत्वप्र
कारकाभेदसंसर्गकज्ञानविशेष्यकः॥ द्वितीये त्वरविंदसादृश्यप्रकारकत्वसंसर्गकज्ञानविशेष्यक इ
ति वैषम्यापत्तिः॥ अरविंदतुल्यो न भवतीति शाब्दबोधोत्तरमरविंदवद्भातीत्येतद्वाक्यजन्यशाब्दबोधाप
त्तिः स्वग्राह्याभावानवगाहिज्ञानस्य प्रतिबंधकत्वात्॥ यत्तु धातोरेव लक्षणया सादृश्यप्रकारकज्ञान
मर्थः तुल्यादिपदं तात्पर्यग्राहकमिति॥ तदप्यसत्॥ तुल्यादिपदस्य सादृश्यानुपस्थापकत्वे उक्तोपमा
या आर्थत्वस्यैवस्थित्यभावात्॥ न च सादृश्यतात्पर्यग्राहकतामात्रेण तथात्वमिति वाच्यं॥ तात्पर्यग्राह
कत्वस्य श्रौतार्थत्वव्यवस्थापकत्वे मानाभावात्॥ किंच॥ तथापि क्लीवत्वापत्तिरनिवार्यैव स्वार्थपरविशे
षणस्यैव समानलिंगत्वमिति चेत्॥ नहि सामान्ये नपुंसकमिति क्लीवत्वपराहते पुंस्त्वैकपं समादधी
यात्॥ तस्मादालंकारिकसिद्धांतानुरोधिनां यथोक्तरीत्याश्रयणमेव युक्तमित्यलं बहुना॥ गज इव
गच्छति पिकरव रौतीत्यादावपि गजपदस्य तद्गमने लक्षणा॥ तस्य प्रतियोगित्वेन सादृश्येन्वयः॥ त

स्यान्नु योगित्वेन धात्वर्थैगमने तत्पादगजगमनसदृशगमनानुकूलकृतिमानित्यादिर्बोध इति केचित्। धा
त्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेनान्वयबोधं प्रति विशेष्यतया विभक्तिजन्योपस्थितेर्हेतुत्वस्या
वश्यकतया सादृश्यस्य धात्वर्थेऽन्वयासंभवात् सादृश्यस्य गमने कर्तर्यैवान्वयः। कर्तृद्विजे सादृश्यं च स्वगम
नसदृशगमनकर्तृत्वमित्यन्ये। केचित्तु एवं सति सादृश्यस्य विधेयतया प्रतीतिरस्तु भवत्सिद्धान्तसिद्धेन गजग
वयः पुरुषः स गच्छति पुरुषो यः स गज इव गच्छतीत्यादिवाक्याभ्यामिव विधेयकप्रतीतिजननात् एवं गजसदृ
शं देवदत्तो गच्छतीत्यादौ वनादेरन्वयापत्तेश्च। गजनिरूपितसादृश्यप्रयोजकगमनाश्रय इत्येव बोधः तुल्य
कार्यकारणभावस्य संसर्गीकार्यः। न च घटो न पश्यतीत्यत्र घटाभावं पश्यतीत्यादिबोधवारणाय तदावश्यकमि
ति वाच्यं। धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंसर्गेणान्वयबोधं प्रति नञ्पदजन्योपस्थितिमात्रस्य प्र
तिबंधकत्वकल्पनादित्याहुः॥ वस्तुतस्तु। गजप्रतियोगिकसादृश्यवत्पुरुषो गमनानुकूलकृतिमानित्येव
धीः सादृश्यस्य च धर्मान्तरनिमित्तकत्वे तात्पर्यज्ञाने तूक्तधियश्चावश्यकत्वात्॥ यत्रापि गमनप्रयोज्यमेव सादृ
श्यं विवक्षितं तत्रापि सादृश्ये गमनप्रयोज्यत्वज्ञानं मानसमेव॥ अत एव धर्मान्तरप्रयोज्यसादृश्यविवक्षायां
पुरुषगमने न गजगमनसदृशमिति बाधज्ञाने सत्यपि गजगमनसदृशः पुरुषो गमनानुकूलकृतिमानिति

धीर्मवत्येव ॥ अयं चात्र विशेषः ॥ धर्मान्तरप्रयोज्यसादृश्यविवक्षायां गज इव गच्छतीति धर्मलुप्ता गमनप्रयोज्यसा-
दृश्यविवक्षायां तु न तथेति ॥ न च गमनस्य साधारणधर्मतायां मानमगम्यत्वात् त्वन्मते गमनप्रयोज्यसादृश्यवि-
वक्षायामपि धर्मलुप्तत्वापत्तिरिति वाच्यम् ॥ साधारणधर्मस्य शाब्दत्वे एव तदभावात् ॥ न हि शाब्दबोधगम्य एव ध-
र्मस्य साधारणत्वेन धर्मलुप्तत्वापत्तिरिति नियमे प्रमाणमस्ति विंवप्रतिविंवभावादौ शाब्दबोधोत्तरमनुमेयो ध-
र्मयोरभेदस्य मानसविषयतया तत्रापि तदभावापत्तेरसंभवापत्तेश्चेति न किंचिदेतत् ॥ एवं पिक इव रौति चञ्च-
रविन्दाकुटरी वमूय इत्यादावपि पिकरुतसदृशरुतानुकूलव्यापारवानित्यादिरेव बोधः ॥ पिकप्रतियोगिक-
सादृश्यवान्रौतीत्यादिरेव बोधस्य स्वीकारान्तदुत्तरं सादृश्यस्य रुतनिमित्तकत्वज्ञानेमानसमेवेति सर्वमनिर्वाहात्
नन्वेतदनुपपन्नं ॥ तथाहि ॥ यत्र गजसादृश्याभाववाप्यवद्गमनं इत्याद्येपेक्षाबुद्ध्यात्मकः परामर्शः गज इव गच्छती-
ति शाब्दबोधसामग्री च ॥ तत्र शाब्दबोधो जायतामितीच्छासत्वे छेद्घटितत्वेन शाब्दसामग्र्या बलवत्वात् गज-
सदृशो गच्छतीति बोधः ॥ तदुत्तरं लक्षणया गजगमनसदृशं न गमनमित्यनुमितेरेव तस्मात् गजे गमनसदृशं न गमन-
मितिमानसं न संभवति ॥ एवं तद्रूपबोधज्ञानसत्वात्तदुत्तरं लक्षणयोपि न तादृशमानससंभवः ॥ तथा च सादृश्यगम-
नप्रयोज्यत्वज्ञानेसवीजमवसिद्धं न निर्वहेत ॥ मम तु गमने गजगमनसादृश्यस्य शाब्दबोधविषयतया शाब्द-

बोधकाले एव तद्बोधावश्यकत्वे नानुपपत्तिरिति चेत् । उच्यते । तत्रापि शाब्दबोधवत्प्रत्यक्षस्याप्येव सादृश्य
गमनप्रयोजकत्वे ज्ञानानभ्युपगमे क्षतिविरहात् । किं च । गजे इव गच्छतीत्येतद्वाक्यजन्यशाब्दबोधात्पूर्वं ग
जसादृश्येन वेति संशयनिवृत्तिरनुभवसिद्धा । गजसादृश्येनेति ज्ञाने सत्येव तच्छाब्दबोधात्पूर्वं यस्य । एतच्छाब्द
बोधे सति गजसादृश्येनेति भ्रमानुत्पत्तेश्चेति निर्विवादं । तथा च एतेन च गमने गजगमनसादृश्यबोधेऽपि पूर्वं च ग
जसादृश्यस्यैतद्विषयत्वोत्सर्गे भिन्नं दुर्घटम् । मननं तु पूर्वं च गजसादृश्यस्यैतद्विषयतया नानुपपत्तिः । न च धर्म
सादृश्येन धर्मिसादृश्यस्यापि सिद्धावसरादिति लंबकत्वेनावद्येषु इति वाच्यं । गजसादृश्येनेति बोधज्ञाने सत्येव त
च्छाब्दबोधापत्तेस्तत्पाप्यवारणात् । न च तस्मादेतेऽपि गमने न गजे गमने सादृश्यमिति ज्ञाने सत्येव तच्छाब्दबोधा
पत्तिस्तस्येति वाच्यं । समवाये बोधात्पूर्वं गजसादृश इति योग्यताज्ञानसत्ताया आवश्यकत्वात् तत्सत्त्वे च तद्गमने
सादृश्यबोधस्यापि सामग्री सत्त्वे नावश्यकतया न गजगमनसादृश्यमिति बोधस्य पूर्वमनावश्यकत्वात् । तद्बोधे
पि बाधकाभावात् । न गजगमनसादृश्यमिति ज्ञाने सति गजसादृश्यज्ञानरूपयोग्यताज्ञानाभावादेव तदनुत्प
न च ममापि गजगमनसादृश्यमिति योग्यताज्ञाने गजसादृश्यज्ञानस्यापि सत्त्वे नोक्तरीत्यैवानुपपत्तिरिति वाच्यं ।
धर्मसादृश्ये धर्मिसादृश्यस्य नियमाभावात् । न हि धर्मिसादृश्यं विना धर्मसादृश्यमनुपपन्नमपि तु धर्मसा

अ.को.
३
३०

दृश्यं विना धर्मिसादृश्यमेव॥ उपपादकस्योपपाद्यं विनानुपपन्नभावात्॥ अन्यथोपपाद्योपपादकभावव्याघाताप-
त्तेः॥ तथा च गजसादृश्यं तद्गमनसादृश्यं विनानुपपन्नमिति तस्य तदाक्षेपकत्वमुचितं न तु गमनसादृश्यस्य गजसा-
दृश्याक्षेपकत्वं। अतस्तद्गजगमनसादृश्यस्यैव मानसत्वकल्पनमुचितमिति॥ यद्वा तु गमनसादृश्याभिप्रायेणै-
व गजेंद्रवद्गच्छतीत्यादिप्रयोग इति शापथः। किं यते तर्हि प्रतियोगित्वातिरिक्तसंबंधावच्छिन्नप्रकारतासंसर्गेण सा-
दृश्यान्वयबोधत्वावच्छिन्नं प्रति तदनुयोग्युपस्थापकपदजन्योपस्थितित्वेन हेतुत्वमिति कार्यकारणभावे पदंश-
क्तिमात्रं बोध्यं अतो धातोरपि संग्रहः॥ एवं च गमनस्य सादृश्याश्रयतया धात्वर्थेपि तत्र सादृश्यान्वयः॥ तथाप्यरविंद-
मिव भातीत्यादौ ज्ञाने सादृश्यान्वयोऽनुचित एवेति दिक्॥ इवधात्वर्थ कीदृशे इवपदस्य प्रयोगे श्रौती कीदृशस्य की-
र्थीत्याह इवादिपदादियोगे वतौ तदर्थेपि वार्थी सा श्रौती॥ तुल्यादिकपदयोगे वतौ तदर्थेपि वार्थी सा॥ इव
शब्दस्य यथाशब्दस्यादिपदाद्वाशब्दादीनां तत्र तस्येवेत्यनेन षष्ठीसमर्थात्सप्तमीसमर्थाच्चेवार्थविहितवति
प्रत्ययस्य चोपादाने श्रौती॥ तुल्यसदृशादिपदप्रयोगे तुल्यार्थविहितवतिप्रयोगे वार्थीत्यर्थः॥ उपमार्थकाः॥
प्रोक्तं दंडिना काव्यादर्शे॥ इववद्वा यथाशब्दाः समाननिभसंनिभाः॥ तुल्यसंकाशनीकाशप्रकाशप्रतिरूपकाः॥
प्रतिपक्षप्रतिद्वंद्विप्रत्यनीकविरोधिनः॥ सदृक्सदृशसंवादिसजातीयानुवादिनः॥ प्रतिबिंबप्रतिच्छंदसरू-

रामः
३

पसमसङ्काशाः ॥ सलक्ष्मसदृक्षाभाः सपक्षोपमितोपमाः ॥ कल्पदेशीयदेश्यादिः प्रख्यप्रतिनिधी अपि ॥ सव
र्णतुलितौ शब्दौ ये चान्यूनार्थवाचकाः ॥ समासश्च बहुव्रीहिः शशाङ्कवदनादिषु ॥ स्पर्धते जयति द्वेष्टि द्रुह्यति
प्रतिगर्जति ॥ आक्रोशत्यवजानाति कदर्थयति निन्दति ॥ विडम्बयति सन्धत्ते हसतीर्ष्यत्यसूयति तस्य मुष्णाति
सौभाग्यं तस्य कान्तिं विलुम्पति ॥ तेन सार्धं विगृह्णाति तुलां तेनाधिरोहति ॥ तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते
तमन्वेत्यनुबध्नाति तच्छीलं तन्निषेधति तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः ॥ कविकल्पलतायां बंधु
चौरसुहृद्द्वारी कल्पप्रख्यः समः प्रमः ॥ देशीयदेश्यहृद्याभसोदराद्या इवार्थकाः ॥ वं वा यथा तथैवैवमित्यमरे
वश्चोपमार्थाः ॥ शान्त्वेवं वपुर्यश इति कालिदासः ॥ कादंबखंडितदलानि च पंकजानीति पूर्वप्रयोगः ॥ अत्र निपा
तसंज्ञा इवादयः ॥ वदिति इवार्थे तुल्यार्थे च वति कल्पदेशीयदेश्यास्तद्धितप्रत्ययाः ॥ ते च यद्यपि ईषदसमाप्ताविति
ति सूत्रेण विहितास्तथापि तुल्यार्था एव ईषदसमाप्तेरपि सादृश्यपर्यवसानात् ॥ तदुक्तं कैयटेन गुड इव ईषद
समाप्ता द्राक्षा गुडकल्पा ॥ यद्यप्यत्रोपमानगतं हृतं नोपात्तं तथापि सामर्थ्यात्तदुपमानोपमेयभाव इति ॥ वाच्यलिङ्गाः
समस्तुल्यः सदृक्षः सदृशः सदृक् साधारणः समानः स्युरुत्तरपदे त्वमी निभसंकाशनीकाशप्रतीका
शोपमादयः इत्यम रः ॥ तत्र प्रत्ययानामुपमानोत्तरमेव प्रयोगः तस्यैव तत्प्रकृतित्वात् ॥ निभादीनां तु नित्य

अ.कौ.
३१

समासविषय ...त्वाच्चंद्रगात्तुल्यं चंद्रनिभमिति रीत्या विग्रहः। तदुक्तं क्षीरस्वामिना। उत्तरपदेत्युक्तेश्चंद्रगानिभमि
तिन भवतीति वैरिणावका सैद्धाम का श्मशब्दाः सादृश्यार्थाज्ज्ञेयाः शशांकवदनेत्यत्र समस्तुपमानपूर्वपदो बहु
व्रीहिरिति समासः प्रतिबिंबः स्पर्द्धते इत्यादयः सादृश्याक्षेपका ज्ञेयाः॥ तत्र वाक्ये श्रौती यथा। इतीदृशैर्नैषधकु
न्द्रतास्मैते विदर्भजन्मामुखशमुखेलसाम्यःस्तोरविमौः शिशिरानुजन्मनः पिकस्वरैरिह रविकस्वरैर्यथा॥ अत्र च वसं
तश्रीरुपमानं मेस्तुपमेयं यथेत्युपमावाचि उल्लासेति सामान्यधर्मः। न चैषां कस्यापि समास इति वाक्यगा। य
त्तु प्राचीनैर्गीर्माजायां यथा शशरदृवोदाहृतः। तत्र इवेन समासस्यानित्यत्वाभावात। अन्यथा उदाहार्यैव वाममत्तद्
त्यादेरनुपपत्तेः। जीमूतस्येवेत्यत्र शारत्वांतरे समासेन शारत्वांतरे वा समासेन पदकारैः पाठाच्चेति तत्र निर्णीतत्वाच्चि
तिवोद्यम्॥ वाक्ये आर्थी यथा मम। जलदोदरादु ताभामिनि सोरश्मिनीलरवा। नीललत्तिवौ लादाविर्भूता कांतिरुच्च
ते समारभ्या॥ अत्र समपदप्रयोगादार्थी। समासे श्रौती यथा। आविर्भवंती प्रथमं प्रियायाः सोच्छ्वासमंतःकरणं दीर
करोति संतापरंध्रस्य शिखंडिसूनोर्वृष्टेः पुरस्तादचिरप्रभेव। अत्रेयं हीति पूर्वशोषाकोमेदस्तुपमेया। अवि
रप्रभेवेत्यत्रेवेन सह समासः। तत्रार्थी यथा मम॥ स्तुतीनां संदोहैर्बहुविशरयंती दशदिशो हरंती संतापात्रुपग
तवती स्पर्शविषयं। प्रयाता स्वच्छंदं रहशमधिसुधादीधितिकलासमाने यं केषां न हरति मनस्तत्तनुलता॥ अत्र सम

राम:
३१

नपदस्य योगात्मस्य समासान्तर्गतत्वात्स्वतन्त्रत्वं ॥ तद्धिते ऋतौ तीक्ष्णांशाममम ॥ सुकुमारमहत्वात्त्वाद
शोर्डश्रीकारकरत्वात्वंच ॥ भातीह मन्त्रकाशिनिपाणिपुङ्गेतामरसवत्ते ॥ अत्रैवार्थे सप्तम्येताद्धृतिः
षष्ठ्यर्थे यथा ममैव ॥ मत्सगमेघवर्षियेकेशकलापस्य तेछाया ॥ संतर्पितजनं नयनातिरयतिसं
तापसंतानं मेघस्यैव षष्ठ्यर्थे वतिः ॥ वेदेपि यथा ॥ प्रियमेधवदत्रिवज्जातवेदो विरूपवत् ॥ अंगि
रस्वन्महीन्द्र नमस्कण्वस्य श्रुधीहवं ॥ प्रियमेधस्येवेति वतिः एतेषाम्मर्षीणांमाहात्म्यं यथा
त्वयाकृतं तथाप्रस्कण्वस्य मुनेः संशितव्रतस्य ॥ तद्यथा चीर्यपामम ॥ उन्नतिमानतिकठिनः समु
न्नतनक्षत्रमालोयमम् ॥ वालेपयोधरस्तवकनकाचलवद्धरीवर्त्ति ॥ इह तुल्यार्थे वतिः ॥ तदेवं
षड्विधा प्रसंख्या ख्याता ॥ अत्रेदं शंक्यते ॥ चित्रकाव्यमिहानिरूप्यतत्रयंग्यरहितत्वेसति ॥ यदुक्तं शो
द्धश्चित्रं वाच्यवाचित्र मध्यमं त्ववरं स्मृतमिति ॥ कश्चित्तचोदाहृतेषु सर्वत्र व्यंग्यमिति ॥ अत्राहुः ॥ रसा
दिरूपं व्यंग्यं सर्वत्रैवास्तीति न स्यावर्ज्जनीयमस्त्रिविधितपातरनादरेणो वोपमादयउदाहृयंते ॥

व्यंग्यबोधानन्तरं चमत्कारः। किंतु वाच्यवैचित्र्यादेवेति। केचित्तु। तात्पर्यविषयव्यंग्यराहित्यमेव चि-
चत्वं। तदुक्तं। रसभावादिविषयविवक्षाविरहे सति अलंकारनिबंधो यः स चित्रविषयो मतः इत्याहुः
अथ लुप्तानिरूप्यते। अन्यतमस्य चतुर्णां विरहे लुप्तो वरं त्वाप्ताः। चतुर्णामुपमेयोपमानवाचक-
धर्माणां अन्यतमस्याप्रयोगे लुप्ता। सा च त्रिधा संभवति एकलोपे द्विलोपे त्रिलोपे चेत्यर्थः। तत्र विशे-
षमाह। धर्मोजकयोरंजकसमयोः समधर्मयोः समान्येषां॥ अत्र पूर्वार्द्धे धर्मलुप्तायास्तुयोभेदाः। वाच-
कलोपे धर्मलोपे उपमानलोपे चेत्यर्थः। उत्तरार्द्धे [illegible] षञ्चं तत्रये लोपद्वयस्यानुषंगः। सामान्यधर्मवाच-
कयोः वाचकोपमेययोः धर्मोपमानयोश्च लोपाद्विलुप्ता त्रिविधेत्यर्थः। समान्येषामुपमानभि-
न्नानां त्रयाणां उपमेयधर्मवाचकानां लोपे त्रिलुप्तैकविधेत्यर्थः। समान्येषामित्यत्र समपदं स-
हृदयप्रतियोगिपदं प्रत्येकमेतद्विदानाह। धर्मविलुप्त एकोनत्रि[illegible]र्थी वृत्तौ वाक्ये च तद्धिते त्वार्थी। वा-
क्ये समासे च श्रौत्यार्थीति चत्वारः। तद्धिते त्वार्थ्येवेति धर्मलुप्तायाः पंच भेदाः। ननु तद्धिते श्रौती धर्म-
लुप्ता कुतो नोक्तेति चेत्। न तत्र तस्यैवेति विहितस्य वतेः प्रयोगे हि तद्धिते श्रौती संभवति। न च तत्र ध-

र्यलोपः संभवति। उपमेयेउपमानसंबंधबोधकस्य तस्य साधारणधर्मप्रयोगं विनानुपपत्तेः। न हि म
थुरायामिव मथुरावत्स्रुघ्न इति संभवति सप्तम्यर्थान्वयानुपपत्तेः। किंतु मथुरावत्स्रुघ्ने प्राकार इत्येवं
तस्मात्तच्छब्दार्थसंबंधविशे॰षणस्य सप्तम्यर्थाधारत्वविशेषणस्य च साधारणधर्मरूपस्य प्रयोगं वि
नाइवार्थवतेरसंभवान्न तद्धिते श्रौती धर्मलुप्ता। ननु मास्त्विवार्थकवतिप्रत्ययप्रयोगे श्रौती धर्मलु
प्ता। तथापीवार्थकतद्धितान्तरस्य दुर्वारात्। तथाहि। इवे प्रतिकृतावित्यधिकारे कुशाग्राच्छ इति सूत्रेण कुशा
ग्रमिव कुशाग्रीया बुद्धिरित्यत्र तेन तच्छप्रत्ययविधानेनैतादृशस्थले तत्संभवादिति चेत्। अत्राहुः। इवे प्रति
कृतावित्यधिकारे विहिताः प्रत्ययास्तुल्यार्था एव। कुशाग्रतुल्या बुद्धिरित्यभेदान्वयदर्शनात्। तस्य सादृश्य
मात्रार्थत्वे तत्सदृशत्वाभावेनोपमेयसामानाधिकरण्यासंभवात्। न चेवार्थे तद्धिधानाविरोधप्रसंग इति
वाच्यं। सादृश्यविधानमपि सदृशे पर्यवस्यतीत्यभिप्रायेणेवार्थे तद्विधानेन तद्विरोधादिति। अथ सदृशादि
पदप्रयोगे श्रौत्यार्थी का। यथा। परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु। मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टि
षु इत्यादाविति चेत्। अत्र दीक्षिताः। श्रौत्येवेयं। यत्र प्रत्ययप्रकृतिभ्यामेव सदृशशब्देन सादृश्यवदभिधा

नेपि भावप्रत्ययस्य प्रकृत्यर्थतावच्छेदकशक्ततया तद्वत्सादृश्यस्यैव वाक्यार्थान्वयित्वादित्याहुः। न्यायपंचानना
दयस्तु। धन्यत्वार्थविशिष्टतात्सादृश्योपमानत्वनियमस्तत्रैव श्रौती इवादिविशेषणीभूतस्य चंद्रादेरुपमानत्वनिय
मात् सादृश्यादिविशेषणतास्थले नोपमानत्वनियमं ... चंद्रसादृश्यमित्यादौ तथात्वेपि चंद्रस्य
त्वेपि सादृश्यमित्यादौ व्यभिचारादित्याहुः। तस्मात् धर्मलुप्तायाः पंचभेदाः स्थिताः। अप्पयदीक्षिताः। द्विर्भावेपि ध
र्मलुप्ता सादृश्यते। यथा पटुपटुरिति प्रकारे गुणवचनस्येति सूत्रेण सादृश्ये द्विर्भावविधानात् पटुसदृश इत्यर्थः। व
स्तुतोऽपटावपि प्रयोगात्। न चैवं वाक्यगा। कर्मधारयवदुत्तरेष्विति तत्रैव कप्यविधानात्। नापि समासगा वा स
वसमासत्वाभावादिति। तत्र। आतिदेशिकसमाससाधारण्येनैवाचौपमाविभागकरणे नातिदेशिककर्मधा
रयवद्भावेपि समाससाधारण्येनैवान्तर्भावसंभवात्। अत एवाच पटुपटुरित्यादौ समासत्वप्रयुक्ताः पुंवद्भावांतो
दात्तत्वादयोपि सिद्ध्यंतीति। केचित्तु। वाचकधर्मलुप्तायामेतद्द्विरुक्त्याधिक्यं न तु केवलधर्मलुप्तायाम्। न वा द्वि
र्भावस्य सादृश्यवाचकस्य सत्वात् कथं वाचकलोप इति वाच्यं सादृश्ये द्योत्ये द्विर्भवतीति दर्शनात्। द्विर्भाव
स्य वाचकताया भाष्यकैयटविरुद्धत्वादित्याहुः। तन्न। द्योतकत्वेप्युभयलुप्तत्वासंभवात्। अथ यथा इवादीनां

द्योतकत्वे पसेवं द्वंद्वे स्यादावपि लुप्तोपमात्वप्रसंगात् पदांतरेणानाहृतसाधर्म्यबोधसहकारित्वरूपस्य द्यो-
तकत्वस्य समासे तद्वाचकत्वस्य पदांतरेणाकारस्यावश्यकत्वात्तु यथेमे कलुप्ता यदि वा द्विलुप्ता उ-
यथापि समासमध्येंतर्भावान्न कोपि विशेष इति तत्वं॥ तत्र समासे श्रौती धर्मलुप्ता यथा ममा॥ आलोक-
चंद्रमसमिव वरवर्णिनि तावकं वदनं॥ न भवंति मनसि केषां व्यापाराः पांचवाणीयाः॥ अत्र मुखचंद्र-
योरुपमायां साधारणधर्मस्याप्रयोग एव लोपः॥ न चैतादृशस्थले साधारणधर्मस्यैव पदेनैवोपस्थि-
तिरिति प्रागभिधानात्कथमेतदिति वाच्यं॥ तत्र धर्मत्वेनैव धर्मोपस्थापितेप्येवं स्थापितत्वेनानाहृतत्व-
त्वादिति तद्रूपेण धर्मानुपस्थितेरनुपपत्तिभावात्॥ अत एव चंद्रद्वंद्वमुखमित्यस्यानुखमाहृतदं-
नचेति संशयानिनेवर्तनमिति बोध्यं॥ तत्रार्थी यथा ममा॥ प्रत्यूषकालरजनीकरमंडलेन तुल्येन सुंद-
रि कपोलतलद्वयेन॥ उन्मत्तां सुकृतसंततिमंजरीणां त्वं कंजपत्रसदृश धन्यतरस्य कस्य॥ समासे
श्रौती धर्मलुप्ता यथा॥ लद्धासा एणाविरं सुरवंदिपरिग्गहेऽपि सा अरवदरणा॥ सीआरररवसव
सईरिछिविसघरंविसोसहिवउअणीआ॥ एव सीतावियोगबध्योः साधारणधर्मोपगम्य-

आर्थी यथा ॥ अग्घाइ द्धिवदृंवदठवेदहि अञ्जमिजलिअरोमंचो । जाआ कवोलसरिसाइं पहिंरेड मह
अपुष्याइं ॥ छेक्षे जायाकपोलसदृशानीति समासः सदृशपदप्रयोगादार्थी ॥ तद्धिते आर्थी धर्मलुप्ता य
थाममम ॥ मुखममृतद्युतिकल्पं कपोलदेशो मुकुरदेश्यः । तस्मात् दृशां विलासाः कुवलयदलदामदेशी
याः ॥ तेन तुल्यमिति विहितस्य वतेः प्रयोगे तु धर्मलुप्ता न संभवति । तस्य क्रियासाम्यविधाने न क्रियादृप
साधारणधर्मप्रयोगं विना त्रुपपत्तेः ॥ अथोपमानलुप्तामाह ॥ वाक्यसमासोभयगोपमानलोपे इति वा
क्ये समासे चोपमानलुप्तेत्यर्थः । न तु तद्धितेपि । वत्यादेस्तद्धितस्योपमानवाचकपदेन तरमेव विधाने नोपमा
नानुपादाने तत्संभवात् ॥ नापि क्यङ्गीतीयम् । इवादिपदानामुपमानानन्तर्यनियमे नोपमानपदं विना
न्वयावोधकत्वात् ॥ अत आर्थी द्विविधैवेयं ॥ तत्र वाक्ये यथा ॥ सअलकरत्तापरवीसामसिरिविरअ
सरसकव्वस दीसइ अह व ण सुव्वइ सरिसं अंसस्स मेत्ते रा ॥ अत्रैव कव्वस्सइत्यत्र कव्वसमं मिति पाठे
चवाक्येति काव्यप्रकाशकृत् ॥ नन्विदं कथमुपमानलुप्ता । चंद्रस्य सदृशमित्यत्र चंद्रस्येवोपमानताप्र
तीतेः । तथा च काव्यसदृशमित्यत्र काव्यमेवोपमानमिति चेत् । अत आहुः । काव्यस्य सदृशमित्यत्र काव्य
मेवोपमानमिति चेत् । अत आहुः । काव्यसदृशमित्यत्र काव्यप्रतियोगिकसादृश्यान्वयोगीति र्थः । किं ना१२

तुकावच्छिन्ननिष्ठसादृश्यप्रतियोगीत्येव ॥ कान्यस्य प्रकृततया तदुत्कर्षायोपमेयत्वस्यैव विवक्षितत्वात्
न्नु चैवं तद्भिन्नसादृश्यप्रतियोगिनोऽसत्वे नन्वयः स्यात् ॥ किं च मेरुगर्भसादृश्यस्याप्रसिद्धतया कथं
निषेधः ॥ न चात्र मेरुगर्भसादृश्यं स्वस्मिन्नेवाप्रसिद्धमिति वाच्यं ॥ उपमोदाहरणत्वविरोधादिति
वेतना ॥ दर्शनस्य वराविषयतयोत्कृष्टगुणस्योपमानत्वविवक्षणात् ॥ दर्शनस्य वराविषयस्यैवो
पमानस्य निषेधात् ॥ अतोऽत्रानुपादानमात्रेणोपमानस्य विवक्षितं न तु वस्तुतोऽप्यसत्वं ॥ अत्र न चैवे
त्वसत्वमेवाभिमतमिति ॥ अत्र मेतु ॥ सदृशपदस्यैवोपमाने लाक्षणिकत्वं ॥ न चैवं तदनुपादानं नास्तीति
वाच्यं ॥ सादृश्यपदेनोपमानोपादानेन तदुत्तरवर्तिनेवादिपदेनोपमानत्वं बोध्यते तादृशपदेनानुपा
दानेनेत्यर्थात् ॥ न च सादृश्यादिपदेनोपमानोपादानेन तदुत्तरमिवादेः संभवः ॥ न गोकरीत्यासदृशपद
स्योपमानस्य परत्वे सादृश्यार्थकपदाभावेन ॥ लुप्तत्वं स्यादिति वाच्यं ॥ सादृश्यप्रतियोगित्वस्योपमा
नपदार्थतया सदृशपदस्यैव सादृश्यार्थकत्वात् ॥ न च सादृश्यप्रतियोगितारूपस्योपमानत्वस्य सदृश
पदार्थत्वे श्रौतत्वं स्यादिति वाच्यं ॥ उपमानविशेष्यमहेतायाश्च प्रतियोगिताया उपमात्वात् ॥ प्रकृते चप

दार्ढ्यतावच्छेदकतया तस्यातूपमाने विशेषणत्वात् । सदृशापदस्योपमाने लाक्षणिकत्वेन क्लृप्तत्वाभावाच्चे
ति व्याचक्षते ॥ काव्यप्रदीपकारस्तु विलक्षणमेव तद्दूषणाद् । तस्योपमाशयः प्रकृते तथा काव्यस्यैवोपमेयत्व
मुत्कर्षाय त्वसंगतेः । स्वनिष्ठसादृश्यप्रतियोगिनिषेधस्यैव स्वप्रतियोगिकसादृश्यानुयोगिनिषेधस्याप्यु
त्कर्षपर्यवसायित्वात् । यथा । रक्षांसीति पुरापि संभ्रमयति मेघे वीरस्तकस्तात् शौर्ये जागर्ति जगत्त्रयीभि
दलंकर्मीणा शौर्यविक्रमः । शम्भुर्हूरस्तु विप्रशास्ति रवनावर्णीयमारोऽस्य दाशरथी संभृतगोत्रभिन्मयमू
यस्ते प्रोयथाशावर्णः ॥ अत्र हि रावणासदृशस्याप्रवर्णनात्यथोत्कर्षलाभः । यथा वा । त्वमिव कोऽपिप
रापकृतौ कृती न ददृशे न च भग्नमथ श्रुतः केवा । स्वमदहो दहनाच्छलता स्मना ज्वलयितुं परिरभ्य जगंतिय
अत्रप्रकृतः कामः । तथा च कामप्रतियोगिकसादृश्यवान नाोऽदर्शनश्रवणाभावविषयत्वाभाववानि
ति बोधः ॥ एवं वैरेपि इन्द्राणी मासृ न्यारीणु सुभगामह । मत्कं वं । नह्यस्या अपरं च नेत्यत्र न चास्या अपरं
समाप्तिमिति निरुक्तकारोक्तेः । इन्द्राणी समं नाम्नोऽर्थमित्यत्रापि इन्द्राणीप्रतियोगिकसादृश्याश्रयना
रीविषयकज्ञानाभाववानहमिति त्वेवार्थः । अत्र कथं चित्त्रापि कामवत्निसादृश्यप्रतियोग्यन्योऽदर्श
नायविषयइति बोधं स्वीकुर्यात्तीर्हि वादिपदानामुपमानोत्तरमेव प्रयोग इति नियमव्याघातापा

नः श्रौत्या अप्युपमानलुप्तायाः प्रकृते संभवे नाप्येवेति नियमः क्षतिस्य इवादिपदानां प्रयुक्तत्वं प्रयोगस्तस्यैवोपमा
नताधीरिति नियमभंगः स्यादिति दिक्॥ अत एव कुंभोलितो वक्ष्यसीमहिमादिहसीति वक्ष्यमाणो नाश्रोपमानलोपह
त्वलंकारे रत्नाकरकारः एतेन तत्रोपमानस्यासत्वं नाभिमतमपि त्वप्राप्तिरेवेति उपमानलोप एवेति तद्रूतररस
गंगाधरदूषणामप्यपास्तं॥ उक्तेरीतेस्तत्राभिसंधानात् नस्मादेनदुदाहरणीयं॥ चेदसारिसमुहं सेसारिसो अग
अस्समुहरसोति स्समासक॥ अंगाहररहसाउ अस्सुहं एक स्स सरिसे सो॥ अत्र समकचगाहररमसहठ्ठं वनेक स्यस
हशाभिन्नुपमानस्याप्रयोगः समासे यथा॥ मत्तूलनामधिरोहसि लोकोत्तरवर्णपरिमलोद्गारैः॥ कुसुमकुलति
लकचंपक नवयंतं तु आभीमः द्विविधेयमिति प्राचीनात्तसायदुक्तं वस्तुतस्तूपमानलुप्ताक्विबंतद्धितेपि संभव
ति यथा॥ चंचत्कः ब्रह्मत्कदृति॥ तथा चकैयटः॥ अवंचचत्रापि यस्य चानिवलक्ष्यते चंचत्कः॥ यथा महिषाः संदनप्रभावत्वात्
अवहट त्रापि वहत्रिवप्रसूतम मत्वायोहृश्यते सवहत्कदृति॥ अत्रहि चंचत्वं वहत्वं चधर्मः समापादिरुपमेयं वाचकः॥ वं कप्रत्ययः
चत्वायाश्रयस्यवाप्रयोगः॥ नवेयच्छत्तसैक्षाम रोचवत्वायप्राचात॥ साधारणधर्मस्योऽस्य यत्र वत्तावेवोपमास्वी स्व
कायत॥ तथा चायं महिषो स्य चत्वप्रकारकसंभावनाविषय इति वोध इति वा॥ आरोपितेनापि चंचत्वेन साधा

सि॰कौ॰
३६

रत्योपपत्तेः॥ प्रास्त वहति त्वस्य चालंकारता याम प्रयोजकत्वात्॥ वस्तुतो द्योत्ये क्षात्वशंकैव नास्ति॥ तथा हि केन
प्रकारेण यावं वदंति लोकप्रसिद्ध्यानुमिति वा अर्थनिकम् इव प्रतीतिरुत्पादयति वक्तुः सादृश्यार्थ इव भवति॥ अथ यथा
वंचेत्यादीनामनुपमात्वमसिद्धं स्यात्॥ नापि यमतिशयोक्तिरिति वाच्यं॥ सप्तम्यादेः प्रयोगसत्त्वात्॥ न्याय आयः स्पृ
लिकादिव्यवच्छेदकप्रत्ययस्यैवायमर्थः तु शासनाभावेन क्रूरा चारा यद्युपमेयप्रयोगाभावे न चतत्पात्वस्वीकारात् रा
मकस्त्यादीनामनुपमानत्वोक्तिर्दप्रसंगाः॥ प्रकृते प्रकृत्यर्थे प्रत्ययविधायकेनानुशासनेन सादृश्यार्थ एव
तद्धितविधानात्॥ अथ यथा सर्वत्राप्यनवस्था प्रसंगात् कृन्तनकलेहः स्यादिति दिक्॥ अथवा चक्रतुल्यमाह॥ नवा
क्यगां त्रकेलुप॥ वाक्यपदं वा अत्र तद्धितो भयपरं॥ द्योतकलुप्तोपमावाक्ये तद्धिते च न संभवति मुखं चंद्रोऽरम
रणीय इत्यतः सादृश्यार्थ इतीति॥ कन्यावादीनां द्योतकतया तत्प्रयोगे द्योतकलोपस्यैवासंभवात्॥ अतएव त
द्विषयप्रतिपादनमुखेनोक्तार्थं दर्शयति॥ वृत्तौक्तौ धारणावृत्ति क्वाड्िः स्याद्विधानात्तुलि॥ वृत्तौ समासेकार्थ्य
त्वि आधारक्वाचिक्वाङ्िः कर्मणात्तुलिकर्त्रामुक्तिश्चेतिषड्विधेत्यर्थः॥ तत्र समासे यथा॥ दीर्घः विद्रुमश्व्रंवेष्टि
द्रुतारसाजंदंदलुंभच्छायं मेदरधाडंकलं किंवासद्रूपात्मंडलशि अकलेरद्दविंदे॥ इह विद्रुमतामरि

यामः
३६

तिरुपमानानि सामान्यवचनैरिति समासः। उपमावाचकस्य समासान्तर्गतत्वात्प्रयोगः। अत्रोपमानधर्मयोः स
मासः। क्वचित्तु यान्तामपि यथा जितभृङ्गाञ्जनत्वे पायद्रस्याः सरित्वकुलावलिवल्लभासि जाता॥ परिणतवि
सकाण्डपाण्डुगुडधस्तनपरिणाहविलासवैजयंती॥ अत्र विसकाण्डमुपमानं पाण्डुत्वं साधारणो धर्मः स्तनमुप
मेयमिति त्रयाणां समासः॥ यत्र कोकिलालापिनीत्यत्र कोकिलावदालपतीत्यर्थे कर्तर्युपमान इति सूत्रेण णि
निप्रत्यये वाचकलुप्तमानिनिरिका तथाच विशेषे मीमांसायां वाचकलुप्तासंग्रहश्लोकः॥ यं पश्यन्ती परशी सपदि मनसि
जः कीटनाशंसनच्छः स्वान्ते येषां तःपुरीयत्पि भजनकृतस्ते कुमारीयति द्राक्॥ मूलस्तं भावतेयः स्त्रिभुवनभवने
कोकिलालापिनी द्राङ्गनामांगे कल्पवल्लीश्रयति कुवलयश्यामलं तं भजाम इति तत्र। उपपदमतिङिति समासस्य
तत्रापि सद्भावे न समासगणने नैव तत्कौशिकादीनां विभाजकतावच्छेदकधर्मानवच्छिन्नत्वस्य लघवाधिको द्भाव
यितुमुचितत्वात्॥ नचैवं वत्यादीनामपि तद्धितत्वादिना विभागे न्यूनत्वापत्तिरिति वाच्यं॥ उक्तापत्तेः। विभागस्ये
च्छिकत्वात् इयानेव हि विशेषः। तद्धितत्वे साक्षाद्विभाजकोपाधौ वर्तित्वाद्यस्तत्र परंपरया विभाजकः। वतित्वादि

नाविभागे नैव विभागे तु त एव विभाजकोपाधय इति किंतु समासत्वमेव विभाजकतावच्छेदकत्वं वदतां कथं
तदवच्छिन्नस्थल एवान्यत्रिभिरुद्भाव्यत इति नवीनमेतदुपवर्णयं पांडित्यं न विरुद्ध इति ॥ कर्मक्यचि यथा मम ॥ ध
र्मागमापगमकालसमुल्लसत्कांतौ द्युंसलीसपदि दंडकवर्हिदूनां ॥ कारं विनीयसि तनुरनुने दनस्य सौदा
मिनीयति मुदा जननेंदुकन्या ॥ अत्रोभयत्रोपमानादाचारे इति क्यच् ॥ क्यच् ॥ अधिकरणात् क्यचि यथा मम
भूधरीयति पयोधरद्वये चंद्रमस्यति मुखे वत वास्यहृत् ॥ विद्रुमीयति रदच्छदांतरे दर्पणीयति कपोलमंडले
इह सर्वत्राधिकरणाच्चेत्यधिकरणे क्यच् भूधरे इवाचरतीत्यादिरर्थः ॥ क्यङि यथा ॥ चंद्रश्चंद्रकरायते म
दुगति वीणापि वज्रायते माल्यं सूचिकुलायते मलयजालेपः स्फुलिंगायते ॥ आलोकस्तिमिरायते विधिव
शात्काकोलविभायते हाहंत प्रमदावियोगसमयः संहारकालायते ॥ अत्र कर्तुः क्यङ् सलोपश्चेत्यनेनो
पमानादाचारे क्यङ् भवति ॥ उपमानवाचकपदस्य सकारांतत्वे सति सकारलोपश्चेत्यर्थः केन सूत्रेणाक्य
ङ् ॥ अत्राचारः प्रत्ययार्थः ॥ अध्याहृतस्यैव पदस्य वनद्विः वत्ति त्वंतद्वः त्तिवं वार्थः ॥ तथा च मेघमित्रवद्वत्ति

येयरत्नि श्रीरामविषयकाचारानुकूलकृत्यप्रयत्नत्वं ।। चारुत्वं तस्य वार्थेरत्निरत्नेनत्व वाचारेप्र
त्वयाप्येऽन्वयइति पर्यवसितं । न च तद्गुणं प्रत्यर्थानन्वितस्य प्रकृत्यर्थस्यान्यत्रान्वयासंभवात् प्रकृ
त्यर्थप्रकृत्यर्थमिथः स्याऽन्वयविरहाद्वेति चेन्न । उक्तस्थले द्वेयमानादिति वचनसामर्थ्यादिहार्थवि
शेषशालिप्रत्ययस्य प्रकृत्यर्थस्याचारेऽन्वयाभ्युपगमात् । स्यारव्यातार्थे कृतौ तदर्थवर्तमानत्वान्वये नहि
तीयनियमाभावात् ।। अश्ववदंति । पौरं स्तुतीयतीत्यादौ कर्मतान्वितार्थत्वे स्तुतायन्विते आ
चारे पौरादि कर्मकत्वान्वयासंभवात् । न च स्तुतायनन्वितस्यैवाचारस्य पौराद्यन्वय इति वाच्यं । प्रकृत्य
नन्वितप्रत्ययार्थबोधानाम् । अन्यथा वेदो न पचतीति वाक्यधीसत्त्वे वेदं पचतीति वाक्यात् त्रैत्यः कृतिमा
नितिबोधापत्तेः । किं च स्मृत्यस्य गादिपरस्य कल्पनापेक्षया नाजादिशक्तिकल्पनमेव युक्तं । न च
गौरवं । तत्कृत्ययाद्येरपि छादिशक्तिविलोपापत्तेः । न चापीच्छतीत्यादेरध्याहारसंभवात् । अपतत्रान्
शासनवैलादि नाध्याहारं बोधाय शक्तिरिति चेत क्वजादावपि । अतः क्वचाचारजातीयार्थे
सुतं ११ पेरस्यार्थः । अतएव स्तुतीयतीत्यादिर्नप्रयोगः । तथा च पौरं स्तुतीयतीत्यादेः स्तुतमिव पौरं रत्नियर्थः

स्तुतावाचकजातीयावाचकस्तदनुकूलवृत्तिमानित्याहुरित्यर्थः॥ एवं च स्तुतपौयदेः साहृश्यविशेषस्य कबोधा
कत्वेऽलीपदृशोपमेवेयं न तु वाचकलुप्तेति॥ नन्वेस्तुतमिवाचरतीत्याहुर्विवरणानुरोधेनेवाहिकल्पनस्य
प्रामाणिकत्वात्॥ आचारे वाक्येऽपमानवाचकपदाध्याहारे लुप्तोपमा भवतीत्येवानुशासनार्थः स च इवाद्य
ध्याहारेपि अविरुद्धः॥ नहि सन्प्रत्ययस्येच्छायां विधानवत्क्यचोपि भेदादेशाक्तिः प्रत्ययोऽनुशासनेनाख्यायते
येन तत्र शक्तिः स्यात्॥ अतः श्रूताद्रेः साधारणधर्मस्याशाब्दत्वाद्द्योतकलुप्तत्वं दुर्वारमिति दिक्॥ यत्र यो
नरध्रीकृत्य वेडीयसादरयत्याहुः॥ नत्वेनारीयत इत्यादौ कर्मोपमाप्रतिपादकपदप्रयोगाभावः॥ क्यङादी
नामेव तदर्थे विहिततया तत्कर्मत्वसमत्वात्॥ अथैवं प्रत्ययत्वेनास्वतंत्रतया प्रयोगाभावे न वाचकसत्त्वमौप
म्यप्रतीतिरिति तर्हि वतिकल्पवादावपि तथैव प्रसत्त्येत॥ नहि प्रत्ययतया तद्भिन्नान्ययोः कश्चन विशेषः॥ कल्प
वाऽरय इवादितुल्यतयौपम्यस्य वाचकाः॥ क्यङादयस्तु द्योतकाः एवेत्यपि न इवादीनामपि वाचकत्वे सन्देहा
त्॥ अस्तु वा तेषां वाचकत्वं॥ तथापि समुदितमेव पदं वाचकं गच्छति प्रत्ययो स्वस्वार्थवाचकावितिमतद्व
येपि वत्याद्यिक्यङ्गोः साम्यमेवेति॥ सत्यमेवं तथापि प्राचीनोपरोधनियन्त्रितो यमाचार्यः॥ उपयेयोजन
र्वेय इति विद्वान्वयीहशानि कुचिशसःशंकुचि संकीर्णानि संकराणि प्रविशतीत्यत्र किं ब्रूमः॥ यत्नात्के नचि

दृष्टं वक्त्रादय इवार्थे न तु शिष्यन्ते सजातीयस्याचार इति वैधर्म्यमिति। एतदपि चिन्त्यतरं न हि समजातीयस्याचारमात्रा-
र्थः किं तु सदृशाचारार्थ इति तदप्युक्त एव पदप्रत्ययेन। सदृशाचारस्य समानधर्मत्वकल्पने प्रमाणाभावात्। अपि च। उप-
मानादाचारे इति ह्यधिकारः। उपमानार्थकपदोत्तरम् आचारेऽर्थे क्यच्प्रत्ययो भवतीति सूत्रोक्तैरेकवाक्यतया तदर्थः। न प-
वयवीभावयथाहारो न किं येन तदा प्रकृते रूपमानार्थकत्वमेव न स्यादिति क्यङादय एव तद्धितरं दुर्लभाः स्युरिति। क्य-
ङादीनामुपमानपदपरतानियमात् तेषां स्ववाच्यमात्रेणोपमेयस्य तद्वाचकस्यैवाक्षेपलभ्यत्वात्। अत एव
यं श्रौतत्वं क्यजादेरुपमानोत्तरत्वनियमादिति न्यायपञ्चाननाः। प्रकृत्यैव लक्षणया सादृश्यप्रतिपत्तिरिति म-
ते तेरे समुदायस्यैव तत्सादृश्यप्रयोजकाचरणकर्तृत्वं शक्यमिति नयेऽपि सादृश्यसादृश्यविशिष्टान्यतरमात्रवाच-
कपदाभावाद्वाचकक्लृप्तिरिति केचित्। तदसत्। किं चोपमेयत्वे सादृश्यवत्त्वानुपपत्तेः। तत्रापि प्रकृतेः सादृश्य-
लक्षणासंभवात्। अत एव तद्वाचकस्यैवाक्षेपलभ्यत्वादित्युक्तं न्यायपञ्चाननैः। क्यङादीनां
वाचकधर्ममात्रं तु मोहादीदृशाविरोधाद्वा। यथा हि सादृश्यमात्रवाचकत्वाभावान्न श्लोपस्तथाचारादिमा-
त्रवाचकत्वाभावान्न लोपवद्धर्मस्यापि लुप्तवचनत्वादिति ध्येयम्। उपमानोपमेयनिष्ठसदृशधर्मस्योपमाप्र-
योजकत्वात्। तत्रायोग्यस्योपमानोपमेययोः संबन्धस्य साम्यस्य ततोऽन्यत्वात्। तद्वाचकत्वे क्यङादीना

मितिवत्कुर्वतिनः। अत्रापि साधर्म्यमिति नियतः साम्यरूपः संवेद्योऽन्वयव्यतिरेकी यदति न्यायपञ्चाननाः उभयनिष्ठ
समानधर्मदृष्टिग्राह्यं सादृश्यं परामर्शेन तथा मितमिति प्राचेतावत्कुर्वन्ति नापि क्रियादि तितत्व। स कर्मधर्मकं हलियप
मम सोऽवतिकतीस्यात् स्मृति दर्शपर्यन्तेन सुधाकरं वा तो विदेहे तानि विधिनिधायन्तिरधाति स्तेनगतं न स्तोकं केते अ
योमयज्ञाग्नेयमानात्कर्मशिरेवेति सूत्रे तात्पर्य। तामनूपकृतिमन्तस्यैव धर्मान्तरख्यातां तस्य प्रयोगानुशासन
सामर्थ्यान्। पूर्ववदेव वेदेवदेदृशः पार्थादरः यत्नभेदः सजातीयधर्मस्वरूपमनुलोर्थः। भेदः साक्षर्मैक क्रियायोगे कर्म
णि। अत्र सजातीयक्रियाकर्तरि अन्वेति तथा च मध्ये निदानधर्मान्तरदर्शी पश्यतीति तथैवेदं त्वस्यनिदानधर्मान्त
मित्रेतत्कर्मकं यत्रिदानधर्मान्तरदर्शनं सजातीयदर्शनं तद्वत्परेदं त्वर्थः। सप्तनः पार्श्वसंचारं संचरत्यवनीपतिरिति तत्र
नु पार्श्वमित्रत्वे सति पार्श्वसंचारः सजातीयसंचारो वा नित्यर्थः। अतएव धर्मान्तरदर्शी धर्मान्तरं पश्यति पार्श्वसंचारं पा
र्श्वः संचरतीति न प्रयोगो नः पूर्णो यद्येवेयमिति। तत्र भेदादौ शास्त्रल शक्तिबोधकानुशासनाभावात्। किं च अ
न्वयितावच्छेदकावच्छिन्न प्रतियोगितावच्छेदकत्व संबन्धेन प्रकृत्यर्थस्य भेदान्वयो न नियतः देशकालादिकृतभे
दविवक्षया तथा प्रयोगस्यापि दृष्टत्वात्। तल्लेकादृशादतिनतां कुपितः फलीवनिर्गत्य यातु पतनापतिभिः परीतः श्री
हर्षो नैषधि ग्रासर्पिदशास्यः। सं.रघवाशारपि दर्शमहोदर्शी॥ इत्यादावनन्वयालंकारे भेदस्याप्रतीत्या नो

पेरेषिशक्तौ प्रमाणमस्ति। न चैतत्प्रमेदस्यानन्वयप्रवेशिता वाच्यम्। प्रत्ययार्थत्वे कल्पयित्वा तदन्व
यकल्पनायाः अनौचित्यात्। अन्यथाऽतीनक्तिकेवैवेवेचःपक्तीनिप्रयोगापत्तेः। वर्तमानत्वस्या
पिनक्तिवनन्वयात्याकोटक्क्तल क्तिमानिनिवोधसंभवात् शक्ततावर्यापिक्तरतानावच्छेदक
स्यैव शक्यत्वात्। अत एवक्षौतव्यः स्मृतिवाक्येप्यर्दत्यत्र क्षीतिपदस्य प्रमाणशब्दे
लक्षणा। अन्यथा तद्वर्टकपदार्थैकदेशान्वयो दुर्वारः शक्तौ प्रमाणशब्दस्य शक्तावेव तद्बोधसंभवे तद्विरोधात्। अन्यथापि
लक्षणैवास्तु को विरोध इति चेत् स्मृतौ नीत्वानुपपत्तिरिति दिक्॥ कर्मणामफलिप्रयत्नामम॥ त्वेहि प्रयोगव
हनेन्वरदहामानेयेयेगुणाहः दिवसंनिवेशमगाः स्या। तेवद्विमध्यविलसद्विसतंतुनाशंनष्टस्तुपाद्वति
विवेकमुखाः समस्ताः॥ अत्र प्राग्कृत्येचकारेणाकर्त्रन्तरकृतौ कर्तरिशामफले एवं त्रयोदशविधेकर्त
ताव्याख्याता॥ अपद्विलुमाव्याख्यायते॥ धर्मयोतकत्वपक्षिकस्मासयोरिति। नहीयं वाक्ये संभवति। अपि
चेद्वरत्यतः साहश्यप्रतीतेः॥ नाद्वितद्वितगावद्धारैवधर्मवाचकत्वेन तत्लोपाभावान तत्र किमपि पयपामम। वापि
वादिधारीः पवनाः पवयति वद्वर्ययति विद्युत। घनति घनाघनमालापथिकानां कामतन्त्राणाम्॥ सर्वप्रातिपदि

केऽस्य आचारे क्विब्वक्तव्य इति वार्त्तिककारवचनाद्वागादवाचरतीत्यादावर्थे क्विप् । तस्याचारार्थकतायाम
पि तस्य सर्वलोपित्वेनास्य प्रमाणात्वाद्वुक्तिलोपित्वव्यवहारः इवाद्यप्रयोगस्तु स्पष्ट एव । समासे यथा । अयं कद
वा १ त्यवनिर्दिष्टानां गिराविमुद्रितैर्विभुज्यकेऽयं दृशां दृष्टो विस्मयनिस्तरंगांसलं यितायामपि राजसिंहः ॥ अ
त्र राजा सिंह इवेत्युपमितसमासः । न चात्र समुद्रत्रपदे व्याघ्रादिगणवदृषभकुंजराः । सिंहशार्दूलनागाद्याः पुंसि श्रे
ष्ठार्थवाचकाइत्यमरोक्तेः सिंहपदं श्रेष्ठवाचकमिति वाच्यं । तत्र वक्रोक्त्यपस्यादेवलोकेनोपपन्नत्वे उपमितस
मासस्यैवात्र युक्तत्वात् । न चैवं सामान्यधर्मप्रयोगात्तत्समासानुपपत्तिरिति वाच्यम् तत्रोपमानमितिसामान्य
धर्मप्रयोग एव समासनिषेधात् । शौर्यादिद्वारा तत्र सिंहोपमायाः सिद्धायाः पश्चादेव तत्स्वभावस्य तत्र वर्णनात् ॥
कर्मणि समासे उक्तलुप्तत्वे उपमेयवाचकयोर्लोपे उपमानकर्मकत्वमेव वृत्तिर्यथा ॥ यथा । मासंभावय मां गिरा मधुरया
कुर्या न किं शिक्षितं लवं बालांतोल विलोलपंकजदलद्रोहस्पृशा वा दृशा ॥ आयाते मयि यद्बकारभवतीकृत्यादि
ती संभ्रमं तेनेवाद्य मयेन्दुसुन्दरमुखि स्वात्मा महेन्द्रीयति ॥ अत्र महेन्द्रमिवात्मानमाचरतीत्यर्थे क्यच् । यद्यप्या
त्मैवोपमेयस्तथापि कर्तृकर्मभूतयोरात्मनोरुपाधिभेदेन विवक्षया कर्मीभूतस्यात्मनोऽप्रयुक्तप्रमाणात्वादु
पमेयलोपव्यवहारः ॥ अत्र दीक्षिताः । धर्मवाचकलुप्तातद्धितेऽपि संभवति । यथा । रथांगं चे सेवमानानां संसारो

ष्यपवर्गेति । तं नगतं यमजन्मार्त्यमस्वं चावं दुकलाधरं ॥ अत्र हि वं चेव वं चेति द्वे प्रतिकृताविति करे लुप्यमानेषु यह इतित
स्यलोपः । लिंगं तु प्रकृतिवदेव । सर्वं वर्धिके व वर्धिके त्यादावपि । अत्र हि साधारणधर्मस्याचेतनत्वोदर्शवकस्य च लो
पः । स्थिष्ठश्वेत्यादौ । अन्येतु वं द्रमौलिमजनराहित्यरूपधर्मसंयोगात्र तल्लोपः । नवतस्यमर्त्यविशेषणत्वेनोपादानो
त्तस्योपमानभूतं वं चायामनेन वचनात्र साधारणमिति वाऽम यद्दुक्तो नो सुखमयः संसारो ष्यपवर्गेति । तं शंभुमभज अ
न्मर्त्यस्व चास्वात्महिताकृतेरित्यत्रापि धर्मलुप्तत्वप्रसंगेन तत्र धर्मस्य वर्णामिति त्वोक्तिविरोधापत्तेः ॥ उभयत्र शान्ता
यवोधं विनापि वस्तुत उभयवृत्तित्वमानेमेव साधारणोपनियामकमिति त्वत्रापि तन्न्यायम् । उपमेयतावच्छेदकत्वेनैवात्र वं
द्रमौलिमजनराहित्यं विवक्षितं साधारणधर्मः । स्वात्महिताकरणमेवेति तच्छायपमात्रे वे दूरवमुत्तरमणीयमि
त्यत्रापि धर्मान्तरप्रयुक्तसादृश्यं विवक्षितमिति शपथस्यापि संभवाद्धर्मलुप्तत्वापत्तेरिति प्राहुः ॥ धर्मोपमानलुप्ताव
तो वाक्ये इति धर्मोपमानलुप्ता समासे वाक्ये चेत्यर्थः । तद्धिते तु नेयं संभवति । उपमानपदोत्तरमेव तद्धिधानात् । अत एव
न श्रौत्यपि उपमानपदाप्रयोगे द्वावेव प्रयोगात् ॥ तत्र समासे यथा ॥ ढुंढुल्लंतो मरीहसि कंटअकलिआइं केअइव
णाइं ॥ मालइकुसुमसरिच्छं भमर भमंतो ण पाविहिसि ॥ अत्रापि मालतीकुसुमसदृशमित्यस्य लुप्तसमासे साहृदय
प्रतियोगिनमित्यर्थः । वाक्ये यथा । चंदुज्जलसरई जा अ असई ओसुह अयं अ सि ॥ नाकिंपु दृ उवीजं सुह समासो ऽद्य

म ११

अ॰कौ॰
४१

तास्थि॥ त्वन्निवृत्त्यर्थं स्यादिति योगविभागो नास्तीत्यर्थः। यद्वा समासे तु कृते यासममिति पाठे पूर्वं स्मो कृपाठे वा का सा वो ध्या
श्रयत्रीक्षिताः। वा च कोपमानं लुप्त स्वद्ध पतनवाते दाहृतास्समासे क्ति। तथा धर्मोपमानं लुप्तमाद्युक्तिवाक्ययोर्वो स्यात तद्धि
तेपि। तथाहि काकागमनमिव तालपतनमिव काकतालं। समासा वृत्तद्धिमयादिति समासानुवादे न प्रत्ययविधानात्। अप
कात्समासः। इवार्थविषयात्समासाच्छप्रत्ययः स्यादिति द्वितन्द्र्थं। नैवार्थे समासे विनात संभवतीति तस्मादेव तात्पर्य
त्साहकात्समासः। तत्र काकस्याव तरागमनेन तालस्याव स्तत्पतनेन वर्ण्यते। तत्र काकागमनं दैवदत्तागमनस्योपमानं ताल
पतनं दस्यूपनिपातस्य। तयोरिव शब्दस्य च काकतालशब्दे लोपः स्यात्। ततोपि काकतालमिव काकतालीयमिति समासा
त्तद्धिमयादिति छप्रत्ययः। तालपतनेन यथा काकवधस्तथा चौरेराद्देवदत्तस्येति छप्रत्ययार्थः। तथा च काकता
लीयो देवदत्तस्य वधः। यत्र तद्धिते उपमानस्य काकवधस्यानर्थकित्वोपतेनेव स्यसमानधर्मस्य च लोपो व्यक्तः। एवमि
त्रोच्यते। सत्यमेव काकतालेत्यत्र छप्रत्ययप्रकृतिभूते समासे वाचकोपमाने लोपोस्ति यद्वं तु न प्रकृते तन्द्वदुक्त्या स्तू
नत्वप्रसंगः। तत्समासस्यास्वातंत्र्येण प्रयोगाभावात। तथाहि छप्रत्ययविधानवले न समासस्मि द्याय त्र छप्रत्यय
प ९ स्तत्रैव समासो न तु छप्रत्ययं विनिर्गेत्यपि विभागस्यावस्वातंत्र्येण प्रयोगयोग्या नामेव कृत इति। वस्तुतस्तु। त
इवा च क लोपोपि समासस्यैवमाचकस्यैविधमानत्वात। इवार्थविषयात्समासादिवार्थे छप्रत्ययविधानवलेमे

राम:
४१

वार्थ एव समासस्य वाच्यत्वात्। तथा च कैयटेन व्याख्यातं। काकस्यागमनमिव वैरस्यागमनं ता-
लस्य पतनमिव दस्योरुपनिपात इत्येकः इवार्थः। तत्र समासः। तेन पतता तालेन यथा काकवधस्तथा
दस्युना चैत्रस्येति द्वितीय इवार्थः। तत्र च छप्रत्यय इति॥ एवं स्पष्टत्वं चोपगतं [illegible]। यथा इवा-
र्थे विहितत द्धितस्यापि तदवाचकत्वप्रसंगादिति तत्त्वम्। एवं तद्धितार्थस्तावद्धर्मोपमानत्वं तावत्या अ-
पि नाञोक्तिः। तद्धितोत्पत्तिर्दृश्या यो काकतालपदस्य रूपमात्रत्वेनोपमानत्वप्रत्याभावात्। न चालस्य त्या-
यां मानाभावः। उपमानपरत्वाभावेन तदुत्तरमिवार्थे तद्धितानुपपत्तेरेवमानत्वादिति कृतं पल्लवितेन॥ अथ
ह.सा.१ त्रिलुप्तमार्गो [illegible]मासलुप्त[illegible]ौ इति धर्मयोतकोपमानानां त्रयाणां लोपः समास एवेत्यर्थः। यथा। अरे सर-
सरेतमेऽलकवोल्लपरिमाणगर्भमञ्जरीण[illegible]तोऽसिन्दूरि अंसरवकरवतकरशीं वहे दवेद॥ अत्र मृगाक्षी
तीत्यत्र हि मृगस्याक्षिणी इवाक्षिणी यस्या इत्यर्थे समस्तमुपमानपूर्वपदो बहुव्रीहिरुत्तरपदलोपश्चेति वा-
र्त्तिकात्समासः। उपमानवाचकत्वेन पदस्य[illegible]लोपः। अत्रस्या बहुव्रीहि सप्तमीपूर्वपद उपमानपूर्वपदस्य च बहुव्र-
ीहिर्वाच्यः। उत्तरेषामिव पदोपमानार्थक मुखादिपदानां लोपः इत्यर्थवदंति। काव्यप्रदीपादयः। सर्वे मा

ण्योतारः। वक्त्रं तस्तत्पदशा[illegible]रस्य समासांतात्त्वावयवे स्थितत्वादिति वैयाकरणा मन्यन्ते यादुपमेयभूतमुख
पदस्यैवात्र लोपेन मा भूमिति सूरिभिर्विभावनीयं। अतो धर्मोपमानकोपमेयलुप्तैव यमुपमेति युक्तं। केयरस्य
ह अत्र योजयवात्र लोपश्चेन्नो अते तथा हि उक्ते मुखं समस्यैवैविग्रहः। न च प्रागसमासापन्तरावयवो भवतीति
उक्तश्चदस्यत मुखेवलक्ष्य रोति। अस्मिंस्तु पक्षे नानोपमानादिलोपप्रसंग इति पूर्वोक्तःपक्षः एवेदमुदाहरणं वो
ध्यं॥ अत्र केचित्। उपमानमात्रोपादानेपि विलोपासंभवति। यथा। अयमायःशूलिक इति। अत्र हि। अयःशूलमि
वतीक्ष्णा आचारस्तेनान्विच्छतीत्यायःशूलिकः। अत्र हि उपमेयधर्मवाचकानां त्रयाणामपि लोप इति अत्राहुः
क्रूरस्याचारस्यायःशूलतयाध्यवसानादिति शायोक्तेरेवाडविषयत्वादुपमात्वविरहात। अत एवमेहाभाष्यमपि। अ
यःशूलमिवायःशूलं यो मृदुनोपायेनान्वेष्टव्यानर्थान्रभसेनान्विच्छति स आयःशूलिक इति केयदस्माद
पपायःशूलं तीक्ष्णमेवमसोपि यत्तीक्ष्ण उपायो यःशूलं उपचारादिति एवं पार्श्वेनान्विच्छति पार्श्विक इत्यत्रापि
अतिशयोक्तिरेव। यथा पार्श्वतिर्यगवस्थानादनृजुतया योऽनृजुरुपायः पार्श्वमिति केयदस्माख्यानात्। एवमेको
नविंशतिभेदा लुप्ता॥ अत्र केचित्तु उपमाया भेदांतराणि लक्ष्यीकुर्वंति। ते च यद्यपि वैचित्र्याभावादुक्तभेदेष्वंतर्भ
वंति तथाप्यवांतरवैचित्र्यसत्वादाकरानुमतत्वात्सोदाहृयंते। तथा च भरतः। एकस्यैकेन साकार्या एकस्य बहुभि

स्तथा । एकेनैकेनांशेनैकेन बहूनां बहुभिस्तथेति तद्वत् । द्वितीयभेदमाह । मालोपमोपमेयैकस्मिन्नेव हूपमानसं
बंधः सा मालोपमा धर्मभेदाभेदाभ्यां सापि च द्विधा ॥ स्पष्टोर्थः । तत्र साधारणधर्मभेदे मालोपमा यथा ॥ गेहं वि
तरति स्फुटं ... सलिलस्तत्राविश्य गौरिहास्ते रति प्रविश्य गौहुतीरव स्फुटं तु हविषेर ॥ एवं हेतुनिमित्तत्वसं
शोपमानिमित्तं धर्मः सदाश्रितः स्फुटयमाला तत्र यथा । बाहिर्भवे रहितं अन रहितं स्फुरागेरवासो वरिष्ठं स्फुटं
सरांविस्फुरत्स हरिणि श्रोतुं हविषे ॥ अत्र द्विः सहत्वमेकोधर्मः स्फुटयमाला ॥ तद्वद्यथा ॥ मातेव रक्षति पितेव हिते नि
युंक्ते कांतेव चाभिरमयत्यपनीय दुःखम् । कीर्तिं च दिक्षु वितनोति तनोति लक्ष्मीं किं किं न साधयति कल्पलतेव वि
द्या ॥ अत्र रक्षणादयो धर्माः भिन्नाः । यथा वा । मलयवदवाताले विस्फुरद्दसे लोहरामवाताहिहतं रसति नल
र्धव स्फुरही स्फुहितं लेपेर माह श्रवणाद स्फुलं ॥ अत्र ज्वलनादयो भिन्ना धर्माः । एकत्रानेकेषां सादृश्यमितीयम्
पमा भरतेनोक्ता यथैनं वर्हिणाभासानां तुल्यार्थदर्शितया भवेत् । एकस्य बहुभिः सार्द्धं मुपमानादकान्यथा बहुध्व
कस्य सादृश्यरूपोपविभेदस्तत्रोक्तं । यथा चंद्रवत्संप्रकाशंते ज्योतिर्मांत्रोहिजो न माः । एकेनसात्वनेकेषामुपमा स
वकीर्तिता ॥ इयं च सा मालाधर्मैकः पृथक् संभवति उपमानस्यैकत्वादिति वोध्यं तद्वैव यथा । तुल्यंते शशिना वक्त्रमी
ति सैकवक्त्रमभवेत् । यमाह वगजायत्र बहूनां बहुभिस्तथा । हरिवंशोजलावलंबोतुरवंरकवींध नेघं नान्ये

अ॰ कौ॰
४३
५३

धयतीववापु॥ प्रवद्धवक्रोन्नपतिर्वनस्था-गजागजैः स्वैरिव वीर्यहृता नः॥ अत्रैव सामान्यधर्मभेदे यथा॥ गतागतकु
तूहलैः कुलवधूकटाक्षैरिव स्वस्थानं त्यजन्ति तल्लैः प्रायेकेलिकोपैरिव लुठन्ति मस्तरो वैतैर्मृगदृशामुरोजैरिव
लवेदीयतुरगो नैमेर्दूरशिखवक्रमाक्रम्यते॥ पूर्णोपमोपमेयधर्मस्तूपमानेषूपमायां स्यात्॥ दशानोपमेयमुख्याहेवि
धंप्राग्वदेवास्याः॥ प्रथमोपमायां वस्तूपमेयं तदेव नूतनोपमायामुपमाने भवति सा रशनोपमा॥ सा च द्विधा॥ सामान्य
धर्मस्यभेदे चाभेदे च॥ तद्भेदे यथा॥ अधरदर्शनोल्लसितमधुरातनुलक्ष्मीनूतनिवद्विशदवदना॥ ननु रिवमनोह
रा हृदयगिवमगास्याः सद्भूःसहोविरहः॥ अत्रमाधुर्यादिधर्माः प्रतिवाक्यं भिन्नाः॥ तदभेदे यथा मम वा॥ आतिता हृराय
विकाशाद्गनुरिव सविलं मंमाया वदना याः॥ ननु रिदृगिव गतिर्गतिरिव धीर्धीरिव गीर्गीरिवाति वक्रा॥ अत्र व
क्रत्वमेव सर्वत्र सामान्यधर्मः॥ भरतेन तु प्रशंसा निन्दयोरनुपमाभेदावुक्तः यथा॥ बालघ्नतां विशालाक्षीं नुतोमम
नुजाधिपः॥ प्रतिनिहिःसाधितोकृत्वा सिद्धिं मूर्तिमतीमिव॥ निन्दायां यथा॥ सा त्वं सर्वगुणैर्हीनं संश्रिताद्रुहं बाधमम्
नेकं रक्षिनेवहीवहिरवत्र्भिवहृमम्॥ यथा वा॥ सति मानदवा संख्या जातिमात्रो गृहे गृहे उत्पादकानवहव
कवयः शरमा इव॥ यथा॥ अन्यसति गृहे गृहे सकवयो पे वा नवमानुरीस्व हर्म्ये कुलकमकेवलभते जाता गु
णगौरवं॥ दुःप्राप सत्कोपिकोविदपतिर्यद्दाग्रसत्याहितीयरायस्त्रीवकलाकलापकुशालावेताक्षिहर्द्वै समा॥

राम:
४३

न्तस्याः स्वरूपकत्वेऽपि मेघैः संबंधीति तथा हि उपमादिविषया निरवयवा सावयवा च निरवयवादि द्विधा शुद्धा माला च
पा च निरवयवत्वं चैत्थं समप्रतियोग्यन्तरनिरपेक्षसादृश्यप्रयोजकत्वाभाववत्स्वरूपं निःसादृश्यकत्वं तत्र शुद्धैव शुद्धस्वभिन्नायो
स्यैः उदाहृतं तस्या एव बहुधा॥ तथा विधया॥ उन्मेदुरैर्नवविसंकुलवृत्तिराराद्धारब्धगाढमलिनो वसनांतलेखा॥ अत्र म-
गं इति लक्ष्मीनिमुख्यान्यमम्लानाङ्गी वरेण्यरवैनः सुरसेद्दरीदाम॥ माला तु यथा॥ भावनीयं वमेऽलीकृपयपक्षावेशाद्धू-
वाल्पंतिकाधाराः स्वर्धुनीपुलाविते कृतरलोलस्तंगास्तरंगा इव कंठे कामलशैवलावलिभिर्बाल्यमावहंतः सदा राजन्साहजिकीं
वहंति वधूधाम्नि सिंधोः स्थितिं सैंधवाः॥ द्वितीयापि द्विधा॥ समस्तवस्तुविषया एकदेशविवर्तिनी च॥ आद्या यथा॥ अहं रथांग-
नाम्नैव प्रियासहचरीव मे॥ अनुज्ञातसंपर्का धारिणी रजनीव नौ॥ अत्र आद्यमित्रमालविकयोर्मध्ये चक्रवाकसादृश्यसिद्धौ
तत्संगमप्रतिबंधकत्वेन धारिण्यां देव्यां रात्रिसादृश्यसिद्धिः॥ यथा वा॥ कश्मीरोत्तविभागेनेकपुरुषव्यापादिनी रक्षिताहंतं
राक्षीरिवार्जुनं बलवतीयाचेद्गुप्तमम्मया॥ साविद्योरिव विद्युद्गम्भस्तकस्याप्यतनिम्नाय से हेऽवेयमिवेत्यपर्वलन्नयंतद्ध्य-
मेवाभवत्॥ यथा वा॥ क्षिप्यद्भवममास्यापोहरीक्तताविधिनिग्रहैरहसिवपरित्यक्तः पौरैरयं जलजंतुभिः॥ इयमपि च
मांद्यैरभीवस्थलग्लपितांबुजव्यथितवदना नाव्यापन्नं रजहातिसरोजिनी॥ अत्रौपम्यांतरेसानलस्मरसोहृपमाधि-
ष्ठानसावयवत्वे उपमानोपमेययोरंशांशित्वात् समस्तवस्तुविषयत्वं॥ एकदेशविवर्तिनी सावयवा यथा॥ वर्षाद्रकस्तु

ड्रिरतास्तव यान्ति विलेपविनाकृतेन। एकस्तनो मा षष्ठि क्रोन्नपदरव यौवन रा मस्य:॥ अत्र हि कलशोकृष्टवोपमयुग
गम्यमान यावसंतसेनास्तनेनपस्तुतोपमासिद्धिः। सा चार्थगम्या कलशसाहश्यस्यार्थगम्यत्वादित्येकदेशविवर्ति
त्वं॥ यथा वा मम। निःश्वासा समलयानिला इव नपिकालापानुकारा गिरोऽरक्ताशोकलता प्रवालसहशौ पाणी हृदयं व
र्तते। हृदकं मोह्वा सविसंमितं स्तनते स्पंगमतानायते संप्रापासमसायकोपि भवती लोकत्रयीनायकः॥ अत्र शा
दीमिरूपमामिर्नायिकाया वसंतलक्ष्मीसाहश्यसिद्धिः। रक्तष्पदरपरितोपमयथा मम मृगमदपंकश्यामे प्रो
त्तुंगे तव पयोधरे तन्वि। हारमणिकांतिलेखा विलसति सौदामिनीवेयं॥ इह पयोधरपदवाच्ययोर्मेघस्तनयो रूपमया
कांतिलेखायां विद्युदोपम्यसिद्धिः॥ इयमेव मालारूपा यथा। स्लेखेव यथा चांद्रमसी कलानां रसस्य यापुष्परितीव
पूर्णा। निःकैतवस्यानमियंत्रहृदीनास्मानेदवङ्गातिसरोरहाक्षी॥ अत्र चतुःषष्टिकलाशृंगारकांतीनां षोडशकलाज
लेखासाहश्यं नायिकायाः ष्टुलेखासारसीरवसाहश्यनिःपन्नि हेतुः। इदं च परंपरितमेव हृदये रसगंगाधरानुरोधाद्नं
वस्तुतस्तु। एकपदोपस्थापितयोरपितयोरपिकण्ठपरस्परंमेदान्वयाविद्वन्मानसेत्यारोपनु मनःसरसीरम्येदान्वयः
सीकृतः। अतएव नेत्रेदिगोत्पलैःपदैर्हस्तेरिव सरःश्रियःपदे पदे विभांति स्म चक्रवाकैस्तनैरिव इत्यारोपएकदेशवि
१८।२ वर्तित्वमभ्रेषस्थलेउपमायाःस्वीकृतमप्रामाणिकं। कथं तर्हि इदाहृतश्लिष्टपरंपरितस्थलेतदुपमासिद्धिरितिचे

त्ततस्मिन्नेतानादेव धर्मभेदज्ञानस्य धर्म्मोपमायोनान्तर्भूतत्वं किं त्वभेदस्यैवेति चेत् नै प्रति ध्रिं व १
बिंबभावापन्नत्वभेदज्ञानस्य साधारणधर्मनियामकतायाः सर्वैरभ्युपगतत्वात् ॥ यदि चैतत्सोढव्यमु
क्तेव तपेत्याग्रहः क्रियेत तथापि तन्मानसस्य ताद्रूप्यज्ञानसंभवेप्यत्र सादृश्यशाब्दस्यानुपपत्ति
रेव ॥ अत्रेवादीनामुपस्थापकत्वाभावात्तत्प्रकारीभूतत्वेनापि नामार्थान्वयायोगादित्यादि सू
रिभिरेव विचारणीयं ॥ भेदे परंपरितं यथा ॥ नलिन्याइव तन्वंग्यास्तस्याः पद्ममिवाननं मया म
धुकरेणेव पायं पायमरम्यत ॥ अत्रोपमेयानामपि त्रयाणां परस्परं वाच्यत्वं ॥ यथा वा मम ॥ ज्योत्स्नायंते तव
गुणगणाः पूर्णचंद्रायसे त्वं धारायंते विशिखनिवहा वारिवाहायसे त्वं ध्वान्तायंते रिपुनिपतयो
हव्यवाहायसे त्वं भृंगायंते प्रवरविबुधा वीरपद्मायसे त्वं ॥ इदानीमुपमादोषाः पूर्वाचार्यैः प्रद
र्श्यंते ॥ तानाह वामनः ॥ हीनत्वाधिकत्वलिंगवचनभेदासादृश्यासंभवास्तद्दोषा इति भेदपदं लिंगे
वचने चान्वेति ॥ तेन लिंगभेदो वचनभेदश्चेत्यर्थः ॥ तत्र हीनत्वं त्रिधा ॥ जातितः प्रमाणतो हीनतश्च ॥ त
था च तत्सूत्रं जातिप्रमाणधर्मन्यूनत्वमुपमानस्य हीनत्वमिति ॥ आद्यं यथा ॥ चांडालैरिव युष्मा

थि: साहृसंपरमं कृतं ॥ तत्र चांशत्वे जातिरूपमानजातितोऽन्यूनाना च नित्यत्वे सत्यनेकव्यक्तिवृत्ति
त्वरूपाया जाते रूपकद्वीपकर्णानुपपद्येरिति तिर्यगं ॥ न पापि व्यक्ताभुत्कं दीपकर्षं सत्वेन हीनव्यक्तिवृत्ति
त्वरूपस्यैव न्यूनत्वस्य जातौ विवक्षितत्वात् एतेनोत्कर्षत्वमपि व्याख्यातं ॥ प्रमाणतोऽन्यूनत्वं यथा ॥ वह्निस्फु
लिंग इव भानुरयं विभाति ॥ इह स्फुलिंग उपमानं उपमेयसूर्यापेक्षया न्यूनपरिमाणं ॥ उपमेया
पेक्षयोपमानस्य न्यूनधर्मत्वं यथा ॥ स मुनिर्लोक्षितो मौर्व्या कृष्णाजिनपटं वहन् ॥ व्यराजन्नीलजीमू
तभागाश्लिष्ट इवांशुमान् ॥ अत्र मुनिसूर्ययोरुपमायां कृष्णाजिननीलमेघयोर्बिंबप्रतिबिंबभावः ॥
मुनेमौर्वीवल्कयोर्न तन्त्माणीयधर्मा तु पन्यासः ॥ न पारामापरो ॥ निद्राभरपरीताक्ष्या रावणस्यान्तमंहि
यः अन्वजग्मुः पतिं वीरं मेघं विद्युल्लता इव ॥ एवमधिकत्वमपि त्रेधा ॥ तत्र जात्याधिकत्वं यथा ॥ विशं तु व
प्पयः शीघ्रं हंसा इव महोजसः ॥ इह हंसानामेकादशत्वात् नैहृति रूढत्वं जातिः ॥ प्रमाणाधिकं यथा ॥ पाता
लमिव नाभिस्ते स्तनौ क्षितिधरोपमौ ॥ वेणीदंडः पुनरयं कालिंदीपातसन्निभः ॥ अत्र पातालादुपमा
नात् नाभ्यादिरुपमेयाद्यधिकपरिमाणं ॥ नचैवमप्यापि स्तनशैलदुर्गविषमे सीमंतिनीनां हृदि इत्यादौ

नाम न्तुपपत्तिरिति वा ऽप्रस्तुत ॥ नो गीहार्यारोपो तु ब्रह्मत्वभावादित्याहुः ॥ अभ्यर्थितं यथा ॥ स्वरश्मिवृंदे वलंवक्षदे
दहैर्वो यदराजत ॥ स वाडवाग्निः सांवर्तः स्रोतःस्वामिव नायकः ॥ अत्र वडवाग्नेरुपमेयं तोलं ॥ अत्र लिंगभेदो यथा
सैन्यानि नयद्दूव जगन्त्ररनिर्गलानि ॥ यथा वा ॥ चिंतारत्नमिव च्युतासि करतो धिङ् मंदभाग्यस्य मे ॥ अत्र च्युतमिति
पुंल्लिंगं रत्नेन पुंसके नान्वेतीति काव्यप्रदीपः ॥ च्युतासीति नायिकां प्रत्युक्तिरिति केचित् ॥ वचनभेदो यथा ॥ सक्त
वो भिक्षिता देव शुद्धाः कुलवधूरिव ॥ अत्र सक्तुशब्दस्य नित्यबहुवचनान्तत्वादुपमेये एकवचनांते नान्वेति ॥ वेदेपि
यथा ॥ अग्निर्नयेभ्राजसौ हव्यवर्चसः ॥ अयाग्निरिव ये भ्राजस्वंतो हव्यवर्चस इति निरुक्तं ॥ असादृश्यं यथा
मत्प्रामिककाव्यशशिनं विततार्थरश्मिं ॥ अत्र काव्यशशिनोः सादृश्यहेतुधर्मो न प्रसिद्धः ॥ न चार्थानां रश्मितुल्यत्वं
तादृतिवाच्यं ॥ काव्ये शशितुल्यत्वसिद्धावर्थानां रश्मितुल्यत्वं ॥ अर्थानां रश्मितुल्यत्वसिद्धौ काव्यस्य शशितु
ल्यत्वंसिद्धमितीतरेतराश्रयात् ॥ असंभवो यथा ॥ वकास्ति वदनस्यांतः स्मितच्छायाविकासिनः ॥ उन्निद्रस्यारविं
दस्य मध्ये मुग्धेव चंद्रिका ॥ अत्रोन्निद्रारविंदे चंद्रिकाया असंभव एव ॥ तदेते षडुपमादोषाः ॥ केचित्तु दोषा अप्येते
वंद्दद्वमनुरवमित्यत्र जातिप्रकर्षः ॥ मध्यंद्यपुच्छकमिवेत्यत्र परिमाणतो न्यूनत्वं न दोषः कविसंमतत्वात् ॥ तथाहि

क्वचानेकोपमानसंबंधे वाक्ये तु उपमेयेऽधिकमिति न दोषः। यथा। क्षीरोदवेलेव सफेनपुंजा पर्याप्तचंद्रेव शरत्त्रि-
यामा। नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पणमादधाना॥ अत्र वेलासादृश्ये फेनदुकूलयोः शरत्त्रियासादृ-
श्ये चंद्रदर्पणयोर्बिंबप्रतिबिंबभावः। तत्र वेलाप्रतियोगिकसादृश्ये दर्पणस्य शरत्त्रिप्रतियोगिकसादृश्ये वा दुकू-
लस्याधिक्येऽपि न दोषः। स्वस्वोपमायां तयोरुपपादकत्वात्। तथा साधारणधर्मवत्तासंपादनार्थत्वे आधिक्यमदोषः।
यथा इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः। क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः॥ अत्रेति विज्ञापित
इति विशेषणस्य ध्यानस्तिमितलोचन इत्यस्योपपादकत्वादुक्तं। तेन ह्रदे तादृशविशेषणाभावेऽप्यदोषः। बिंबप्रतिबिं-
बभावापन्नयोस्तिमितनेत्रसुप्तमीनयोरुपपादकत्वेनोक्तत्वादुपादानात्॥ क्वचिल्लिंगभेदेऽप्यदोषः। तदुक्तं। दृष्टः पुंन-
पुंसकयोः प्रायेणेति। काव्यादर्शेऽपि। न लिंगवचने भिन्ने न न्यूनाधिकतापि वा। उपमादूषणायालं यत्रोद्वेगो न धी-
मतां। चंद्र इव मुखमित्यादावित्यर्थः। एवं प्राणा इव प्रियोऽयमेतस्या इत्याद्युदाहरणीयं। अत्र मदुक्तं गमनेन लौकिकास-
मासाभिधायामुपमाप्रपंचे च। लौकिकानां समासगम्यायां चोपमायां। उपमाप्रपंचे प्रतिवस्तूपमादौ च लिंगभेदः
प्रायेण न दुष्टः। लौकिकानां यथा। छायेव पुरुषस्तस्याः। पुरुष इव स्त्रीति। छायापदे पुंस्त्वपदे च स्त्रीत्वस्य बाधितत्वात्

त्प्रतियोगिकसादृश्यवर्णनस्य तत्तदाप्रयोगेऽसंभवात् । न वांगने वांगनेपि गंतुमेव प्रकंपते । इयं सौराष्ट्र जाना-
री महाभट इवोद्भटा इत्यादावपि ज्ञेयं । समासाभिहितायां यथा । अनुभवन्नवदोलमृतुत्सवं पटुरपि प्रियकंठ-
जिघृक्षया । अनयदासनरज्जुपरिग्रहे भुजलतां जडतामबलाजनः । यथा च । निविष्टायां कोपाद्रुरसदृक्षिपं के-
रुहदृशः पदोपांते छायामुपनयति मर्त्यं प्रणयिनि । अयाचक्षुर्लीलाकमलरजसा दूषितमिति स्फुवं स्पृक्तामुक्ता-
फलपरिणतावाष्पकणिका । भुजलतापंकेरुहदृशः इत्युभयत्रापि लिंगभेदः । एवं साधारणधर्मसमासेपि
यथा । निर्मुक्तरोषधवलेरवलेंदुमेयविस्पष्टदुग्धमयसागरगर्भगौरैः । राजन्निरंवहलपक्षरल-मृगांकच्छेदै-
र्जले स्तवयशोभिरशोभि विश्वं । यथा । स्फुटं स्फुटक्तागोऽरभिदृक्षीरभिवांभैर्वापीषु तल्लीनमहानीलशिलासु । राक्षी-
स्याभिरंस्फुभिरास्फुरुत्तमभः छायामच्छामच्छति नीलीसलिलस्य । प्रायेणोत्तुंके हंसीवधवलेत्यादौ दुष्टलमेव । उप-
मा शब्दे यथा । शरद्भातदुर्लभमिदं वपुरास्ममवासि नो यदि जनस्य । दूरीकृता खलु गुणैरुद्यानलतावन-
लताभिः । अत्रात्मसमवासिजनवनलतयोर्लिंगभेदः । एवं वचनभेदेऽप्यदोषो ज्ञेयः । लौकिकं यथा । पश्या-
भिलो वनेनतस्याः फुल्लफुल्लिह्नौ यथा । इहोपमानोपमेययोर्भिन्नवचनत्वं । समासाभिहितायां यथा । सत्य

भः प्रसरः सनाथपरिमलप्रोद्दोधवद्धोत्सवो विम्लानो निवेशमर्हति नेत्युत्तरं सप्रसंगं रसमाध्वीकभरः। द्राक्षेव सन्निवे
शितः परपुष्टे स्तं गायमाना णामवैतामेरमयत्वविक्षु पुष्पमनघमायप्रसूनानां लि॥ अत्र न्यायद्रव प्रसूनानां लि
रं जल्पिस्थानि कुसुमानीत्युपायकारोक्तेर्वचनमेदः॥ उपमाप्रपंचे यथा॥ स्तुह्योतेत्या द्यावेव वनलतानां वह्नु व
चेनानां तत्वं जनेस्य कवचेनां तत्वमिति॥ तथा निदर्शयामेव तात्पर्यं उपमानेस्य जातिहीनत्वं न दोषः। यथा॥ तां प्र
लम्बवृद्दिदृक्षुद्धावेव सहशोभम॥ तां गलस्य न गृह्णाति दरिद्रो न प्रयच्छति॥ एवं उपमानपदेन तद्धर्मविशिष्टो
पमानबोधकतया तद्धर्मप्रतिपादने उपमेये धर्माधिक्यमदोषः। यथा॥ अमिहं तिहृत रूपमेषमाधवं सकु
मारकायमनवगृह स्मरः॥ अचिरेणावे वृतविपर्वतशाद्गाः कलमे कठोरद्रववकूटपाकलः॥ अत्र कलमपदे
नैव सकुमारस्य कायतामतीत्यातरं शेन तरपेक्ष्या। एवं न्यूनपरिमाणतानन्यायनताम्पर्ये परिमाणहीनत्वमु
पमानस्य बोध्यः। यथा॥ रिपुहरे रेमे खकुहरे विस्तीर्णोपर्णोति सोमः॥ अत्र परीस्योपमानस्य गगनापेक्षया
हीनपरिमाणत्वेपि नरसिंहस्य स्वपरिणामेव तात्पर्यं काव्यप्रकाशकारस्ता॥ उपमानस्य जातिप्रमाणगे न्यूनता
धिकत्वे अनुचितार्थतायामेवांतर्भावः॥ न तत्र पश्लोकनीयनिदर्शनकत्वस्यानुचितत्वलक्षणात्वोक्तेः कृप
मतद्दितिवा॥ सं। दोषांतरलक्षणानान्ततत्वसति औचित्याभाव एवानौचित्यमित्यमिप्रायेणातधोक्तेरितितद्दा

तारः। एवं धर्मिगते स्त्र न त्वाधिक्ये ऽपि दृष्टीन पदत्वाधिकपदत्वयोरेवांतर्भवतः। एवं उपमानोप
मेययोर्लिंगवचनभेदो ऽपि मन्तव्यः स्मत्वा न्नातिरिक्तः। तथाहि। तत्र साधारणधर्मस्य उपमानोप
मेययाः न्यतरलिंगत्वे तस्य समानलिंगे न सहैवान्वये न भावात्। तथा चैतस्य साधारणधर्मस्याभावा
त्कृपमुपमा। अथ तत्र प्रतीयमाने साधर्म्ये मानोपमा भविष्यतीति चेत्। न हि उपात्तेन धर्मेणा
पेक्षितस्योपमा रूपस्याप्यस्य स्फुरमाने वाहेत्म न्यक्रमत्वमेव। यत्र तु तदृशे उपमानोपमेययोर्भिन्न
साधारणधर्माभिधायिपदं तत्र न दोषः। पदुसंकाव्यजकिंसा। स्त्रेषम पर्यायेण यत्र पदं साधर्म्य
वाचकं। उभयान्वयिपदाभिधानास्य दोषस्य संस्थितिः। लिंगभेदे यथा। सुरोरन ह्यै प्रथितोरचैरि
व महार्णवः। ... न्यरगुरारन्नयोर्मिं न्वलिंगत्वेऽपि अनघैरितिरूपमेदामावादुभयत्रान्वययोग्यः। व
चनभेदे यथा। तद्वेषोसदृशोन्याभिर्स्त्रीभिर्मधुरतास्मृतः। दधतेस्मपरांशोभांतदीयाविभ्रमा इव
श्रवेणावि... शो एकव वचनवद्वचनांतो। तत्र सदृशाद्भिसदृशाशाच्छैक वचनांत। सदृशा
शाश्चान्यबहु... समानसहशाः सदृशिलमरः। मतइति। क्रमत्वयातस्यैकवचनांतत्वं धतद

श्री कौ.
५८
५८

तिरस्थधारस्याद् इति भाविकस्यैकवचनान्तं ॥ सुधारसधारस्याद् इति जुहोत्यादिपठितस्य बहुवचनान्तं क
प्रतिरूपमयश्रावणबोधसंभवात् ॥ एवं कालपुरुषविध्यादिभेदोपि मन्तक्रमस्वीकारे भवति तत्र काल
भेदो यथा ॥ अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती ॥ पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना ॥ इहैव
तनयमाप्नोतीत्यन्वेति न त्वापेत भूतकालः ॥ अत एवाप्तिप्रकृतकालेनोपमाया ॥ अनिर्वाहात्क्रमभंगः ॥
न च कृतीतामाप्राप्तेर्वेतनान्वयः संभवत्येवेति वाच्यं ॥ वैकालिकप्राप्तेरेव विवक्षितत्वादितीतत्वेन तात्पर्या
भावादिति वदंति ॥ पुरुषभेदो यथा ॥ प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः कौसुम्भरागरुचिरस्फुरदंशु
कान्ता । विभाति सेमकरकेतनमर्च्चयंती बालप्रवालविटपिप्रभवा लतेव ॥ अत्र वासवदत्ताया विभाति
सद् इति मध्यमपुरुषोन्वेति लतायां तु विभाजत इति प्रथमपुरुष ॥ विधिभेदो यथा ॥ गंगेव प्रवहतु ते स
देवकीर्तिरित्यत्र कीर्तौ प्रवहत्विति विध्यर्थः संभवति न तु गंगायां सिद्धत्वात् ॥ एवं पुत्रं लभस्वात्मगु
णानुरूपं भवंतमीड्यं भवतः पितेव ॥ चिरं जीवतु ते सूनुर्मार्कण्डेयो मुनिर्यथा इत्यादावपि बोध्यं ॥ न
चैवं दोषत्वमेव नास्ति कुतोतिरेकांतर्भावविचारः ॥ तथा हि ॥ कालादिविशेषान्वितधर्मातिदि

राम:
५८

केनेउमयान्वयिना ॥ उपात्तेन वाक्षिप्तेन सामान्यधर्मेणाउपमासंभवे कालविशेषावरुद्ध[illegible]स्यउ
पमानान्वयविरहेऽपि स्वभावात् ॥ यथा प्रत्यगमस्य नेत्यत्र विविक्तत्र निश्चिताद्विनाध[illegible]लतानापि
कचोद्दयमासिद्धौ विभ्राजमानस्य नाथिकायामेवान्वयसंभवेन लतायामनुपचरनमुपमाना ॥ न
तस्य ॥ साधारणधर्मप्रयोगस्थले इवपदेन तस्यैवोपस्थापनमिति प्रागुक्तं तथा विभ्राजेनेमिति धात्वर्थ
मात्रं तेनोपस्थाप्यते ननु भ्राजमानतायां धात्वर्थोपि तथा वलतानिष्ठान्योन्याभावप्रतियोगिता[illegible]दृशकसमानाधि
करणत्वे सति लतानिष्ठात्यंताभावप्रतियोगितावच्छिन्नभ्राजमानाद्दितद्वृत्तित्वमिति शाब्दबोधः ॥ न चानुपूर्व्याम्
दप्रतिकूले एवंविधिकालभेदस्थलेपि प्राप्तेः ॥ सामान्यधर्मत्वाभावेन तत्राक्षिप्तसामान्यधर्मद्वारकैवोप
मा ॥ अत एव तत्स्थाउपमानपदेऽन्वय एव ॥ अपि च यत्र कालोपावरुद्ध एवार्थः साधारणतया विवक्षितस्तत्र
कागतिः यथा युधिष्ठिर इवायं सत्यं वदतीति ॥ युधिष्ठिरे सत्यवादीहित्यत्वेति ननु वदतीति वेत्तलता ॥ तत्रापि यु
धिष्ठिर एव सत्यवादी अयं सत्यं वदतीति ॥ सत्यवादित्वस्य साक्षिधर्मेणोपमास्वीकारे यावदतीत्यस्य
युधिष्ठिरेन्वयानंगीकारात् ॥ न वाच्योन रूपापत्तिरिति वाच्यम् ॥ यथाधनेन पुष्मातीति वक्तैवोपुष्टैरा

मुख्यैरेवोक्तंपृष्टमालीत्यर्थानुप्रयोगेनयोगेनयोनत्वंतद्दृष्टान्तेऽपि॥ अयमत्रानुप्रयोगानुशासनवलात्तथा। अ
न्यत्तु न किमपि प्रमाणमस्तीति चेत् यथा युधिष्ठिरः। सत्यमवादीत्यत्र यथा यं सत्यं वदतीति कालमेव बाधक
भावात् न चात्र प्रमाणाभावः। उक्तोल्लसितंत्वे विप्रस्ते जायेव पशुश्चातीसृवासा इति मेधेमहाभाष्यनिरूक्ते
कोटान्यांतथापा। जायापत्ये कामयमानानां सुवासास्वमात्मानं विवृणुते। एवं वाग्वाग्भिरेव स्वमात्मानं विवृ
णुत इतिगमा दृश्यातत्वात। अत एव चेदृश्येव सुरवमित्यत्रोभयविशेष्यकर्गोधांगीकृतं मते यथा वेदृश
यासुरवमित्यादिप्रकारवाचि विधानत्वं प्रत्ययवशात्त्वे यत्रमानाभाव एवेत्यपि दूरदानेन पुनः म। मत्म
वदृशनामापिच्छेवपदेनोपस्थापनेनतादृशसत्यवदनानुकूलकृतिमानितिबोधेपि बाधकाभावा
दृश्यन्तांचेतिवेत। सत्यमेतत्। परंतु प्रस्तुतार्थप्रतीतिर्विघातस्य सहृदयानुभवसिद्धत्वाद्दोषविषयत्वमेव एवम
र्थानानुसंधानाद्दृष्टस्यार्थाविनतायामेवपर्यवस्यत। इत्याहेतिदिक्॥ यत्र॥ पदिरमामः किंस्यार्थश्रेहि
त्वाहस्यासेश्वयावप्यनुविनितार्थतायामेव पर्यवस्यतीक्षते मद्दिरेसयमा॥ अपदिरमामालंकारः। एषएव तथा
षयीविषयान्नना प्रसवेन दृगर्जेन वीक्षते मद्दिरे सयमा॥ अपदि॥ यामालंकारः। एषएव तथा
हि वीसयोवस्तु मायवव स्पष्टमेवकारस्यात्वं नत्वस्यैतिनिर्बाधा। दृगर्जोत्यवरूपकं स्वीकारे

त-वी ५२

बाध्यसाधारणाद्धीक्षत्वानुपपत्तेः। नवोपमेवास्त्विति वाच्यं। प्रसन्नत्वरूपसामान्यधर्मप्रयोगस्य बाध
कत्वात्। न च सारन्वस्य ह्गात्मनापरित्यागे प्रसक्तेतोपयोगाद्दलंकारांतरमेवेति। तत्रान्यायपंचानना
द्याः। उपमेवेयं भवितुमर्हतीति। न च प्रसन्नत्वरूपधर्मप्रयोगस्तद्बाधकः। न द्वितिरिक्तरमणीयत्वादिध
र्मनिमित्तकसादृश्यस्याविवक्षितत्वात्। उपमानिमित्तधर्मप्रयोगएवोपमितसमाससनिषेधस्यभाष्या
दिःकांतिगंभीरहृत्याघत्रशेषेण स्वीकाराच्चेत्याहुः। यत्तु रसगंगाधरे महर्षेर्व्यासशिष्यस्य श्रावं श्रावं व
चःसुधां। अभिमन्युसुतोराजा परां मुदमवाप्नवान्। इत्युदाहृतं। तच्चिंत्यं। अत्रोपमितसमासएवबाधका
याचतत्सामान्यधर्मप्रयोगाभावात्। एवं च क्विद्विषयमात्रस्य स्वरूपेणाप्रकृतानुपयोगात्तस्यारोप्य
माणाभिन्नत्वेनापरित्यागः। यथा वदनेनेंदुनातन्वी शिशिरीकुरुते दृशौ। अत्र वदनमात्रस्य शिशिरी
कारकत्वोपयुक्ताभिन्नत्वेनावस्थानं। यथा। वदनेनेंदुनां तोप स्मेरेण विलेपिति। अत्रेंदोः स्वरूपेणास्मरतापानपवा
रकत्वात् वदनाभिन्नत्वे ... र्निमितिरूपकमेदयवायं। विषयविषयितावच्छेदकान्यतररूपेणानि
र्धीयमानेतत्तदन्यतरक ... त्वरूपकत्वात्। न रूपमर्क ... मेदोयमुपमानोपमेययोरिति

केऽरीति वर्त्तते ॥ अत्र यद्यपि ... समासे विशेषणस्य प्रतियोगिकाभेदस्यैव संसर्गत्वात्तु शाब्दबोधे
इदं भिन्नत्वेन वदन्न स्वपदं ... ने संभवतीति तथापि समासेनैव विशेष्यप्रतियोगिकाभेदसंसर्ग
कबोधेन निर्वाहोऽत्र सेयं ॥ न चानन्न चंद्रो तत्र च द्वयपदस्याहार्यकत्वे लक्षणा तथा चाहार्यकेन मुखे
न विरहतापः शाम्यतीति बोध्यम् ॥ एवं चानेन कश्चिदलंकारः ॥ मुखस्य चन्द्रतादात्म्यापादकस्य लक्ष
णाहेतुभावात् ॥ वेदान्तेषु ख्यातिता तादात्म्यापत्त्या वर्णनीयमुखादरं तु ... रूपकापदिशाम स्यालंकारत्वात्
भवात् ॥ मुखचन्द्रे तातापः शाम्यतीत्युक्तौ च उपमितसमासस्यैव संभवान्नेति न्यायपंचाननोदयः ॥ एवं
च असारे संसारे विषमविषयारण्यसरणौ मम भ्रामं भ्रामं विगलितविरामं जडमतेः ॥ परिश्रान्तस्यायं त
रणितनयातीरनिलयः समन्तात्संतापं हरिनवतमालस्तिरयतु ॥ इत्यत्राप्युपमितसमासादुपमेव ॥ न च
नेतापहरणसामान्यधर्म इति वाच्यं ॥ तत्र धर्मान्तरेणासाहचर्यस्य सिद्धावेव तस्य विधेयत्वात्साधारणे ना
विवक्षितत्वात् ॥ दृष्टान्तरेपि तत्त्वेन तमालपत्रोपमायामेव चकत्वादिकस्यैव तन्निर्वाहकत्वाच्च ॥ यदपि
रसगंगाधरे ॥ अहीनचंद्रालसताननेन ज्योत्स्नावती नापि सुविस्मितेन इयं हि योषासितपक्षरा

घातो घायकेघांन महीतले स्मात् ॥ अत्र केघांतो घायनस्यारिस्तुत्स्याविरहिरणामपितोघजनकत्व
प्रतीतेः ॥ पूर्वोक्तपक्षरात्रेष्वतन्तोघजनकत्वाभावा अधिकमयातारात्स्यामस्याच्छुतद्दुपपत्तिरित्युक्तं ॥ तदप
सत्त्वे ॥ यो घारोघयोः समासाभावेपि स्वतिविरहेणा पूर्वोक्तपक्षराज्यभिज्ञायोषतिस्वपकेरोवतत्संभवा
त् ॥ यत्तु नरक्षितिहमहीपालकेवयेतववर्णानां ॥ अपिरा जानमाक्रम्यपशोयस्याविष्कृजं भतेइति विद्या
धरेणापरिणामध्वनावुदाहृतं ॥ तन्नोक्तं ॥ राजशब्दस्योभयार्थत्वात्तदुपस्थापितयोर्नृपचन्द्रयोरभेदा
ध्यवसायविधानेन त्याज्यविवसंभवेन परिणामस्य वाच्यत्वात् ॥ एतेनैतदसाधुत्वसाधुत्वविषये चि
त्रमीमांसासारसंगंगाधरयोः कलहो निरस्तः ॥ एतेन वार्थशक्तिमूलपरिणामध्वनिप्रकरणो ॥ मा थ
मंदमते किं वा संतापमनुविंदसि ॥ पयोधरं समाश्लिष्य येन शान्तिमवाप्स्यसि इत्युदाहरन् रसगंगाध
राधिपपराः स्तः ॥ तत्रापि पयोधरपदवाच्ययोर्मेघस्तनयोरभेदाध्यवसायसंभवाद्रूढित्वानौचित्यात् ॥ यद
पि विरहिविदहसंतापं विस्तृतिं तापरित्यजा ॥ नस्तिश्शीतलः शौरेः पराज्वनरवचंद्रमा इति चित्रमीमांसा

शाह्तं परिणामस्थूनित्वं रसगंगाधरे दूषितं। आरोप्यमाणस्य विषयात्मकत्वेन प्रकृतकार्योपयोगपरि-
णाम इति स्वयमेवोक्तं। तत्र प्रकृतकार्योपयोगमात्रे न परिणामशरीरमपि तु विषयिगतायाः प्रकृतकार्यो-
पयोगितायाः प्रवच्छेदकीभूतविषयिरूपविषयतारूप्यं एवं चात्र न खचेद्रुसद्भावप्रदर्शनेन तन्निषेधस्या-
दर्येतवतापशंकातिरेक्ष्यतीति प्रकृतोपयोगितायां व्यंग्यत्वेपि तदवच्छेदकीभूतस्य विषयिणो विषयतारूप्य-
रूपस्य परिणामस्य वाक्यवाच्यत्वाद्धर्मसंसर्गत्वाद्धा सर्वथैव न व्यंग्यत्वमिति। तदपि चिंत्यं। एकदेशस्य वा-
च्यत्वेप्यलंकारस्य व्यंग्यत्वानपायात्। अत एव। धन्यासि या कथयसि प्रियसंगमेपि विश्रब्धचाटुकशतानि
रतांतरेषु। नीविं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि॥ इत्यत्र व्यतिरेको
व्यंग्य इति काव्यप्रकाशव्याख्याने। धन्यासीत्यत्र धन्यासीति लक्षणया आवश्यकत्वात्। उत्तरार्द्धे अ-
तो६ हं धन्या तस्यैव व्यंग्यत्वं एवं च व्यतिरेकघटकस्य त्वमधन्येत्यंशस्य व्यंग्यत्वाभावेपि। अहं धन्या तस्यैव व्यंग्य-
त्वं। एवं च व्यतिरेकघटकस्य त्वमधन्येत्यंशस्य व्यंग्यत्वाभावेपि अहं धन्या। तस्य व्यंग्यतामात्रेण व्यतिरे-

कस्य चंद्रस्य त्वोत्कृष्टिरिति चंडीदासः ॥ तादृप्यस्योपयोगितावच्छेदकत्वे विपरिणामशरीरत्वे मानाभावाच्चे
त्यलमतिप्रसंगेन ॥ स्थानस्थानविकीर्णविचारमनुपमागतं सुखेन वा ॥ एकवद्भूत्वे यद्वाच्छिन्नतेन रूपमेयमेयत्वं ॥
इत्यलंकारकौस्तुभे सपरिकरमनुपमानिरूपणं ॥ अनन्वयमाह ॥ यद्येकावच्छिन्नं स्तामुपमानोपमेयत्वे
अनन्वयः सदृशं निषिद्धं तमनन्वयं संगमाचक्षते ॥ उपमानतावच्छेदकधर्मस्यैवोपमेयतावच्छेदकः सोऽनन्व
यइत्यर्थः ॥ यद्धर्मावच्छिन्नप्रतियोगिताकं सादृश्यं तद्धर्मावच्छिन्नतन्निरूपयोगिताकत्वमितियावत् ॥ अतउपमे
योपमायां नातिव्याप्तिः ॥ अनन्वयपदार्थमाह ॥ अन्वेति कर्मधारयो यं ॥ अभिन्नमनुपमानमित्यर्थः ॥ स्वपद
स्य सादृश्यप्रतियोगिपदत्वात् ॥ न विद्यते तद्भिन्नस्य सादृश्यप्रतियोगि वउपमान्वत्वेनान्वयो यत्रेत्यर्थः ॥
यथा ॥ आख्यारीति पक्ष्मलमक्षि पक्ष्मं ... इति श्वेतविनितास्तो ॥ अस्यादवास्या स्वलाद्दिं नीलगो
लामलश्यामलतारतारं ॥ अत्र मे मीने व मिव मे मीनेव मिति एकस्यैवोपमानोपमेयभावः ॥ ननु वयमु
पमातो नातिरिच्यते ॥ तथा हि किं तद्भेदको न तावद्द्वितार्थमेदस्य स्वास्मिन्नसंभवात् ॥ व्यासज्यवृत्तिधर्माव

च्छिन्नप्रतियोगिताकभेदस्य स्वावच्छिन्नविषयसंभवात् । देशकालादिभेदेन स्वावच्छिन्नविषयभेदस्य सत्वात् ॥ नापि प-
लभेदः । चंद्रद्रव्यमुखमित्यादौ मुख्ये चंद्रगतधर्मप्रतीतिः । चंद्रद्रव्यं चंद्रद्रव्यत्वेन तु अन्यादिकमस्य द्रव्यनिष्ठान्योन्याभावप्र-
तियोगित्वाभावो बुध्यते ननु चंद्रगतधर्मवत्वात् तस्य साधारणधर्मज्ञानकाले एव सिद्धत्वात् इति चेन्न ॥
चंद्रगतधर्मप्रतीतौ बाधकाभावात् । न चैवार्थमूलेः अन्योन्याभावे उपमेयप्रतियोगिकत्वस्याभानेन चंद्रप्र-
तियोगिकभेदस्य समानाधिकरणत्वभानेन संभवति । चंद्रनिष्ठान्योन्याभावो न चंद्रप्रतियोगिक इति बाधज्ञा-
नसत्वादिति वाच्यं । एतत्कालीनचंद्रसत्कालीनचंद्रसदृश इति बोधं प्रति चंद्रो न चंद्रभिन्न इति बाधज्ञानस्या-
प्रतिबंधकत्वात् । बाधबुद्धिप्रतिबध्यप्रतिबंधकभावे विशेष्यप्रकारत्वनिवेशस्यावश्यकत्वात् । भेदस्य वैको-
लिकाव्याप्यवृत्तितया तद्विरुद्धत्वादिति चेन्न । तथा सति चंद्रद्रव्यं चंद्रद्रव्यत एतत्कालीनं स्वं तत्कालीनचंद्रस-
दृश इति बोधापत्तेः ॥ अत एव संयोगसंसर्गकपर्वतविशेष्यकवह्निप्रकारकज्ञाने सत्येव न समवायसंसर्गक-
ज्ञानं दृश्यधीः ॥ तदयं फलितार्थः । यथोक्तरीत्या बोधोभ्युपगम्यते तदा तस्योपमात्वमस्माकमपीष्टं ॥ चंद्रसदृशं द्रव्यं

उप॰
५२

म १ तिधर्म प्राप्नोतीति बोध्योप्यनुभवसिद्धत्वादिहि त्वं द्वुरपद्दत्व एव नवतद्गेदमाने संभवति तत्र च भेदांशभा
नाभावेनान्वय इति व्यवस्था तस्माद्वस्तित्वं भेदस्यैवापेक्षितं वेदस्तीति धर्मवांछाद्वय इति बोधः उपमानान्तरव्या
वृत्तिफलकत्वमेवात्र यत्तु चित्रमीमांसायां स्वस्मिन्स्वसादृश्याप्रसंभवादुपमानान्तरव्यावृत्तिरिति तदसत्।
असंभवस्याभावात् तस्मात्तथाविवक्षैव शरणं अत एवासादृश्यविवक्षातस्तूक्तं प्राचीनैः अत एवानु
पमत्वसूतोल्केव विवक्षावेति न्यायपंचाननादयः अस्य च भेदास्तूपमावदेव अयन्तु विशेषः धर्मोऽनुगामि
मात्रं बिंबप्रतिबिंबभावादिना धर्मोक्तौ हि धर्मितावच्छिन्ने तु च धर्मान्तरावच्छिन्नतत्सामान्योक्तावुपमात्वमे
व स्यात् एवं तद्दोषा अयत्र केचिदेव हीनत्वादीनां स्वस्मिन्स्वापेक्षयान्यूनत्वाधिक्याद्यसंभवेनाभावात् अ
नुगामिधर्मस्यैव कविपातः कु विदग्धगम्यः आद्यमुदाहरति सत्येव जगति वहवोप्यर्थास्तेजस्वजात्यवधि
मः तदपि प्रसिद्धमेव ह्रीगविवेस्वानिव विवस्वान्॥ अस्य धुनिर्धारामायते त्वोद्भूत्वापरतोमन्येनन्ने
धातासलोके कृत नहि कृपाममाना स्यात्तवास्ति जगतीतले। अन्यात्वत्सदृशी नास्तीति भेदकधर्मसाद

स्य निषेधात्त एवं त्वत्सदृशी तिव्यंग्या ॥ यत्र सर्वथैवोपमानिषेधः स मालंकारः अयं चानन्वये व्यंग्यापि दी
पकादावुपमावत्सा एव स्फुट एवालंकारः ॥ अन्यथा दीपकादावपि सादृश्यव्यंग्यतासत्त्वादुपमान्तर्भावापत्तेः ॥
यथा भूमीनाथ सहाव दीनमवतस्तुल्यो गुणो नागरी रेतद्भूतभवत्प्रपंचविषये नास्तीति किं ब्रूमहे धातान्न
तनकारशौर्यरिपुनः स्फुटं न वा भावयन्नस्यादेवतया पितावकतुल्ये लेशो दधानो नरः ॥ तत्र अनन्वये धनि
नेवोपपत्तेः आरोपे सतीत्यादिन्यायाच्च अन्यथा व्यंग्योपमादीनामपि सर्वेषामलंकारान्तरत्वापत्तेः ॥ इतिदिक्
इत्यनन्वयः ॥ उपमेयोपमामाह उपमायां पूर्वस्यां प्रतिवाक्यनुयोगिनौ यौ स्तः तौ विपरीतौ परतस्त्वेदुपमे
योपमा त्वेवा ॥ पूर्वोपमायामुपमेयस्य द्वितीयोपमायामुपमानत्वं तथोपमेयस्योपमानत्वं यत्र सोपमेयो
पमेत्यर्थः ॥ यथा ॥ हासः प्रसूनमिव हास इव प्रसूनं पाणिः प्रवाल इव पाणिरिव प्रवालः केशा द्विरेफा इव
वी ८ केशा इव द्विरेफाः सा भाति ... दिवसे वत विभातिवीरुता ॥ ननु ... स्यादनो ... तेगजेभ्य घनसन्निभैः म
वस्त्रलमिव व्योमं कुर्वन्व्योमेव भूतलमिति परस्परोपमामामति व्याप्तिः न चैवं लक्ष्ये रेति वाच्यं तती
यस्य हृदयवद्दिदृक्षफलस्याभावात् तथाहि चंद्र इव मुखं ... मिति मुखे चंद्रसाम्यवर्णिते चंद्रेपि मुखव

साहृश्यमर्थतः सिद्ध्यति साधारणधर्मस्योभयानुगामित्वात् तत्र चंद्रमुखसाम्ये प्रकृते नोपमानेन तु चंद्रयोः परस्प-
रमेव साम्यं न त्वन्येनेति सहृदयान्तरङ्गं वदेहरफुल्लति इंजो व्याप्तत्वेन धर्मेण गगनेन भूतले साम्यं वर्णितं तु भूतले मे-
घतुल्यगजैर्गजान साम्यं नार्थतः सिद्ध्यति इंजो व्याप्तत्वमेघतुल्यगजव्याप्तत्वयोर्धर्मयोरुपमानोपमेयभिन्नत्वात् अ-
तः पूर्वोपमया सिद्धमेव गगनसाम्यं भूतलेवर्थत इति गगनभूतलयोः परस्परमेव साम्यमिति सहृदयान्तरव-
वदेहेन फुल्लतीति वेत्तमेव पूर्वोपमायां साधारणधर्मस्यैव द्वितीयोपमायां तादृशत्वे उपमेयोपमानाविमित-
मिश्रायात इह चोपमानोपमेययोरुत्तरोपमायां वैपरीत्यमित्येनेन लभ्यते तस्याहितोगानेव विशेषो न तु साधा-
रणधर्मवैपरीत्यकृतोपील्यर्थः धर्मस्यानुगामी बिंबप्रतिबिंबभावापन्नो वेत्यत्र नाग्रहः स्वच्छार्थमुदाहरणा-
नि अनुगामी यथा मम त्वन्नयनतुल्यमिव त्वन्नयनमिवोत्पलं कांते विद्रुममिव त्वदधरस्त्वदधर इव विद्रु-
मं शोणः ॥ एवंविधे अर्थे उत्तरार्धे शाब्द इति विशेषः बिंबप्रतिबिंबभावो यथा मम ॥ दृष्टिनिःसंगनिरर्गला-
मार्गणाः प्रविगलन्निरवग्रहवर्षिणाः वसुमतीतिलकत्वमिवांबुदैर्बुद इव त्वमुरेषि महीमुदे ॥ अत्रे-
रहितकारणानां बिंबप्रतिबिंबभावः उपचारो यथा मम अवलाइव विद्युत्सा विद्युत्सइवाचलाग्रुरवेः शास्त्र

श्री· कौ·

54

धितोयनिधिरतोयनिधिः शास्त्रवद्दूरगभीरः अगाधत्वगभीरत्वयोर्विदग्धोत्केषु प्रचारः ॥ समासभेदो
यथा मम ॥ उल्लसितकुसुमहसिता रमणीयस्तवककवक्षोजा वल्लिरिव वामनयना विभाति वल्लीव वामन
यनेव ॥ श्लेषो यथा ममैव ॥ विरहज्वाला समूहसंद्रुमपुष्पांकुरोल्लसितः आकाश इव समुद्रः समुद्र इव
सोपमाकाशः ॥ प्रथमपादे शब्दश्लेषो द्वितीये त्वर्थश्लेष इति विशेषः अत्रेदमवधेयम् रजोभिः स्यं
नोद्धूतैर्गजेभ्यश्च घनसन्निभैः भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलम् इत्यादावुपमेयोपमालं
कारस्य रसकाराशीनामभिमता [illegible] पकयोः पर्याययातस्मिन्नुपमेयोपमेति तदुक्तलक्षणाव्या
तत्प्राप्तिव्याप्तिप्रसंगात् [illegible] दः शब्दश्चार्थश्च आद्ये रजोभिरित्यादौ अत्र तर्हि [illegible] नेत्यादावि
नितव्याख्यातस्मिन्नसत्यात् [illegible] मीमांसा [illegible] गाधरादयः नात्रोपमानान्तरतिरस्कारः
प्रतीयते उपमेययोरेक [illegible] भावात् [illegible] अनुगामिधर्मप्रयोज्यत्वात् द्वितीयायां या
श्च बिंबप्रतिबिंबभावापन्नधर्मप्रयोज्यत्वात् इति [illegible] इत्र सामे [illegible] बिंबप्रतिबिंब
भावबिंबस्यायोबाधकाभावात् [illegible] परस्परसदृशयो [illegible] बिंबप्रतिबिंबभावे इति वाच्यम् बाधका

रामः

५४

भावात् न च परस्परसदृशयोरेव रजोगजानामपि सादृश्यसत्त्वात् त्वन्मते प्यनुगामित्वप्रयोजकरज
सादृश्यस्यावश्यकत्वात् वाच्यत्वात् यत्किंचिद्रजोयोगेन पृथिवीसादृश्यासिद्धेरिति तदाशयघटि
कृतेव हृद्यता ॥ इत्युपमेयोपमा ॥ अथोत्प्रेक्षां निरूपयति संभाव्यते सदृयदा साम्यप्रतियोगिना तदुपमेयं
तामुत्प्रेक्षामाहुर्मिश्रा हेत्वादिविषयत्वात् उपमेये उत्कटोपमानकोटिकः संशय उत्प्रेक्षेत्यर्थः संभावनपद
स्योत्कटकोटिकसंदेहार्थकत्वात् उत्कटाप्रकृष्टस्योपमानस्यधिष्ठानमावेति श्रुत्यतः संदेहालंकारेऽतिव्या
प्तिवारणाय उत्कटेति कोटिविशेषणं तत्र तु अन्यकोटिकत्वमेवेति नातिव्याप्तिः संभावितो यस्य तादृशासंभविव
स्तुरूपतया संभावनमुत्प्रेक्षेति काव्यप्रदीपः तत्र हेतूत्प्रेक्षा नाम प्रकृतकारणस्याप्रकृतकारणेन समेन संभा
वनं ॥ यथा दृष्टा हृष्टा सर्वगुरोर्ध्वंसेऽस्या मेघ्याः पदं श्रीः सम्भविष्णे इंगीते ध्रुवं सतामवच्छलयद्यतः साम्यशाहृतो
तस्यदमाद्भिमाति ॥ इहहि मेमीवरदायोदारूदयसंबंधः प्रकृतः तत्कारणं चादृष्टविशेषः तत्समेन च छलेनेन
संभावने संभावनाविषयस्य चाप्रयोगादध्यवसाने अदृष्टविशेषछलेनयोः साम्यं चारूदयचरणासंबंध
नेनकृतयेति बोध्यम् यद्वा स्वाभाविक आरूदयसंबंधः उत्कछलेन हेतुकसंबंधत्वेन संभाव्यत इति बोध्यम् ॥ स

ना

रूपोत्प्रेक्षानुप्रकृतस्याप्रकृतेन समेन संभावनं यथा वहइ इव महिहिअअलं भरिउं सोहो इ धरेइ इव पुरदो पेल्लेइ इव
पाअलगअं जहू आइ वडवौ संठिहितमैशिावहो अत्र गंधकारस्य सर्वदेशव्यापित्वं प्रकृतं तद्गो देशव्यापित्वे प्रकृ
तेन स्वस्याधिष्ठितवस्तुतिरोधायकत्वसाधर्म्येण वहनस्वरूपतया पृथ्वीदेशव्यापित्वे प्रकृतेन तत्संयोगप्रतिबंध
कत्वेन साम्येन धारणत्वेन पार्श्वदेशव्यापित्वे प्रकृतेति दिक्संयोगप्रतिबंधकत्वसाधर्म्येण नोदनत्वेन ऊर्ध्व
देशव्यापित्वे प्रकृते शिरोनमनहेतुत्वसाधर्म्येण गुरुकार्यमानत्वेन संभावनं एवं लिंपतीव तमोंगानि व
र्षतीवांजनं नभ इत्यपि बोध्यम्॥ न नियमश्चैवमेवकृतो न भवति इवपदस्य साहश्यार्थकत्वे बाधकाभावात्।
यत्तु उपमायामिवेन नित्यसमासानुशासनात् प्रकृते समासस्यासंभवात् नाम्नां समासो युक्तार्थ इत्युक्तेराख्या
तस्य च नामत्वाभावात् अतो चन साहश्यमिवार्थ इति तच्चिंत्यम् इवेन सह समासस्यानित्यत्वाभावस्योपमाप्र
करण एव दर्शितत्वात् अन्यथा इवपदस्य संभावनापरत्वेपि समासानुपपत्तेः न हि इवेन समासः सा
दृश्यपर एवेत्यत्र प्रमाणमस्ति इवेन समास इति सामान्यत एवोक्तेः अप्यत्र समासप्राप्तिस्तत्रैव नियमः आख्या
तेन सह तु समासप्रसंग एव नास्तीति विनैव समासमप्रयोगः इति चेत् तर्हि साहश्यार्थतायामपि समा

स्यात्प्रसंगेन विनैव समासमिव पदस्य योगे बाधकाभावादिति चेत् मैवं उपमानाभावात् सैवोपमाबाधकत्वात् तथाहि भि
न्नत्वोपमानं न तावत्कर्तृ वैयाकरणमते आख्यातार्थस्य कर्तुर्भावनायां विशेषणीभूतत्वेन तस्यैवार्थसादृश्यस्य प्रति
योगिकत्वसंबंधेनान्वयासंभवात् अन्यविशेषणतायास्तत्रान्वयायोगात् तदेतदुक्तमाचार्यदण्डिना कर्तायदुपमा
स्यात् अस्यमूलोसौ क्रियापदे स्वक्रियासाधनव्यग्रो नालमन्यदपेक्षितुं न च यथा पृथिव्यामेव गंधः इत्यादौ सप्तम्यर्थविशे
षणतायाः पृथिव्यादेरेवकारार्थेऽन्योन्याभावेऽन्वयाद्व्युत्पत्तिवैचित्र्येण पृथिव्यादेः सप्तम्यर्थैवकारार्थैकदेशे
ऽन्वयः यद्वा एवकारस्य समभिव्याहृतपदार्थतावच्छेदकावच्छिन्नान्यत्वबोधकत्वस्वीकारेण पृथिवीत्वावच्छिन्नान्य
त्वबोधकत्वमिति स्वीक्रियते तथाख्यातार्थस्य कर्तुर्भावनायां सादृश्ये चान्वयः यद्वा इवपदस्य कर्तृप्रतियोगिकसादृ
श्यपरत्वमिति नानुपपत्तिरिति वाच्यम् उक्तरीत्या कर्तुः सादृश्याविशेषणत्वेऽपि वहनकर्तृसदृशोऽतमइति बोधासंभ
वात् वैयाकरणानां भावनाविशेष्यकबोधाभ्युपगमात् न च वहनकर्तृतमः सदृशावहनक्रियेति बोधोऽस्त्विति वा
च्यम् तन्मते धात्वर्थस्याख्यातार्थप्रकारतयान्वयाभावात् आख्यातार्थकर्तृप्रकारकबोधं प्रति धातुजन्योपस्थि
तिः कारणमिति तत्कार्यकारणभावात् अत एव कर्तुः सादृश्यान्वयोऽपि निरस्तः अत्रैव भिन्नकार्यकारणभावकल्प

ननु गौरवं प्रमाणाभावश्च अपि नैयायिकमते कृतिसाध्यतार्थः तस्याश्च स्वाश्रयप्रतियोगिकत्वसंबंधेन साह
श्येऽन्वयोक्तौ तण्डुलं वहनं कृत्याश्रयप्रतियोगिकसादृश्यवत्तमदिति बोध इति चेन्न तन्मते आख्यातार्थप्रकारकबो
धं प्रति अन्याविशेषणीभूतप्रथमान्तपदजन्योपस्थितेः कारणतया इवार्थसादृश्ये उक्तसंबंधेन कृतेरन्वयासंभ
वात् न चैवं चैत्रपचतीत्यत्र कृतेरपि प्रतियोगितासंबंधेन न तस्यैवाभावेऽन्वयदर्शनात् अस्य स्थले तादृशकार्यका
रणाभावसंकोचावश्यकत्वेन प्रकृतेऽपि निरुक्तसंसर्गेण इवार्थसादृश्ये कृतेरन्वयः स्यादेवेति वाच्यम् इवपदसम
भिव्याहृतपदार्थस्य प्रतियोगित्वसंबंधेनैवान्वयस्य व्युत्पन्नतया प्रकृते स्वाश्रयप्रतियोगित्वसंबंधेनान्वया
नौचित्यात् सादृश्यप्रतियोगिनियतान्वयित्वमिवशब्दस्येति सिद्धान्तभंगप्रसंगाच्च किंचेत्यादावुक्तरीत्या वह
नकृत्याश्रयेत्यादिरेव बोधः स्यात् न चेष्टापत्तिः वहनकर्तृसादृश्यस्यैव विवक्षितत्वात् न च वहनकृत्याश्रयप्र
तियोगिकान्योन्याभाववत्यादिरेव बोधोऽस्त्विति वाच्यम् आश्रयत्वस्य संसर्गकोटिप्रविष्टतया तस्यापदार्थत्वा
त् न चैतादृशस्थले समभिव्याहृतपदार्थाश्रयप्रतियोगिकः एवान्योन्याभावो व्युत्पत्तिवैचित्र्यादुपास्यत इति वा
च्यम् गौरवप्रसंगात् ननु लेपनमेवोपमानमस्त्विति चेत् न लेपनक्रियातमसोः साधारणधर्माभावात्

लोपमेयस्य च तत्तुल्यत्वासंभवात् धर्मधर्मिभावस्य भेदनियतत्वात् तदिदमुक्तं यदि लेयनमेवैषं लिंपतिर्नाम
कोपदः सहृदयधर्मो धर्मीत्येतदुक्तौ नभावः तस्मादुपमानस्य दुर्लभतया नाशोपमासंभवति तदुक्तं केषां
चिदुपमानं तिरिवक्लृप्त्येह जायते नोपमानं तिङन्तेनेत्यतिक्रम्यामभाषितं तथाहि धातोः कर्मणः इति सूत्रे
अस्माज्जुगुप्सिषते कूलं पिपतिषतीत्यचावेतन स्वपादाशंकादिच्छायाः असंभवात् प्रत्ययोनस्यादिति वि
रेजुगुप्सिषतेऽवजुगुप्सिषते इति प्रयोगसमाधानमाशंक्य भाष्यकारेणोक्तं नवैतिङन्तेनोपमानमस्तीति व्या
ख्यातं चैकैयटेन तिङन्तेनेति तिङन्तार्थेनेत्यर्थः क्रियायाः साध्यैकस्वभावत्वादनिःपन्नरूपत्वादिदं न त्विति
परामर्शगोचरत्वस्याविषयत्वादुपमानोपमेयभावस्येदं तदिति परामर्शाभावादिति भावः इवशब्दप्रयोगे
तु अध्यारोपस्याविद्यते रोदितीव गायतीव नृत्यतीव गच्छतीवेव दन्त इति परिपूर्णेन च न्यूनस्योपमा भवति कि
याचसर्वा स्वाश्रये समाप्तेति न्यूनत्वासंभवस्तस्यां तदुक्तं येनैव हेतुना हंसः पततीत्यभिधीयते अतोतस्यस
मानमत्वादुपमार्थो न विद्यते इति मिलनातीयानां च क्रियाणां साहश्यं नास्ति मन्दं क्रामदिव इव गच्छतीति तथा चैत

अ·कौ·
५८
57

द्राक्ष्वविरोध इत्याचार्यदीक्षितोभिप्रायः अतो न संभावनेऽपि इवार्थ इति सिद्धं तदयं निःकर्षः वहतीवतमः इत्यत्र धा
तोर्वहनक्रियायां शक्तिः अधोदेशव्यापने लक्षणा आधारत्वाताऽर्थे लक्षणायां हि घटत्वं संभावनमिवार्थः त
था च तमः कर्तृकाधोदेशव्यापने वहनप्रकारकसंभावनाविषयत्वमिति बोधः यद्वा वहनप्रकारकसंभाव
नाविषयाधोदेशव्यापनाश्रयस्तम इति बोधः प्रथमबोधे इवार्थसंभावनाया विशेष्यतया ख्यातार्थे तमस
श्चकर्तृत्वसंबंधेनान्वयात् लक्ष्याधोदेशव्यापनेऽन्वया तु शब्दवहनस्य प्रकारतासंबंधेन संभावनायामन्व
व्याप यः द्वितीये तु शब्दवहनस्य प्रकारतया संभावनायां तस्याश्च निरूपितत्वसंबंधेन विषयत्वे तस्य लक्ष्याधो
देशव्यापने तस्याश्रयतया तमसीति विशेषः इदमिहावधेयम् एवमपि उत्पत्तिभंगसाम्यं किमर्थमु
पमेवेयं नोक्ता तथा हि लिंपधातोर्लेपने शक्तिरधोदेशव्यापने लक्षणेति युगपद्वृत्तिद्वयनिबंधनो दोषः
ततो लेपनक्रियाया इवार्थसंभावनेऽन्वय इति प्रत्ययानां प्रकृत्यर्थान्वयनियमव्युत्पत्तिभंगः तस्य हि प्रक
त्यर्थप्रकारकबोधे प्रत्ययजन्योपस्थितिर्हेतुरिति शरीरं अपि च इवार्थसंभावनाया विषयतासंबंधेन व्या

राम:
५८

पनान्वयोक्तौ धात्वर्थनामार्थयोः साक्षाद्भेदान्वयस्याव्युत्पन्नतया तदतिक्रमः न च निपातातिरिक्तनामार्थयोः स्थल
इव साव्युत्पत्तिः न कृतं तेमस्त्वयेत्यत्र नञर्थस्य विशेष्यसंबंधेन धात्वर्थान्वयस्वीकारादिति वाच्यं चैत्रो
न पचतीत्यादौ कृतेरप्यभावान्वयदर्शनेन कृतेः प्रथमान्तपदोपस्थाप्यस्यैवान्वय इति नियमस्याप्यवश्यं
संकोचनीयतया त्वन्मतरीत्या कृतेरपीवार्थसादृश्यान्वये बाधकाभावात् यत्तु अन्यत्र सादृश्यप्रतियोगितयान्व
यः अत्र तु साम्यप्रतियोगितयेति गौरवमिति तन्न उक्तं लक्षणादिकृतगौरवापेक्षया तस्याकिंचित्करत्वा
त् किं च संसर्गांशगौरवापेक्षया पदार्थांशगौरवमेव बलवदिति विपरीतं गौरवम् अपकृतेरुक्तसंबंधे
न सादृश्यान्वये भावनाविशेष्यसंख्यान्वय इति नियमभंग इति चेन्न चैत्रो न पचतीत्यादौ तस्यापि स्वीकृत
त्वात् तस्मादाख्यातसमभिव्याहृते वादिस्थले उपमा दुर्वारेति विज्ञैर्विभावनीयम् न च महाभाष्यव
चनविरोधः तेन क्रियायामुपमेयत्वस्यैव निषेधस्याभिमतत्वात् एवं च मन्येशंके ध्रुवं प्रायो नूनमि
त्येवमादिभिः उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोपि तादृश इत्यत्रेवशब्दोपादानमपियोपमानसंभव

तित ओत्प्रेक्षात्वमित्यभिप्रायेणेति नन्वाख्यातसमभिव्याहृते वा दिस्थले उत्प्रेक्षैवेति नियमाभिप्रायेणेति ॥ यथा ॥ बालें
दुवक्राण्यविकाशभावाद्बभुः पलाशान्यतिलोहितानि सद्यो वसंतेन समागतानां नखक्षतानीव वनस्थलीनां ॥ इत्यौ
लौहित्य उपमांगीकारे अन्यदीयनखक्षतेरपि सादृश्यसंभवेन वसंतसमागमविशिष्टवनस्थलीसंबंधित्वेन तद्वि
शेषणं व्यर्थं स्यात् संभावनापक्षे तु अन्यत्रस्थितानां नखक्षतानां वनस्थलीषु संभावनानुपपत्त्या तद्विशिष्टत्वेनाप्य
नखक्षतानां यत्संबंधित्वेनेति वसंतेनेत्यादिविशेषणं सार्थकं भवति एवं च मौलिरत्नस्फुरिताभिसरघजे वृढी पस्व
रुधिखिलितेध्रुवमिंदिंभाति शोणायितेन वहुनाभव भीतिकेभ्रः केदर्पलोकदूरख्यात्यतितस्फुटित्वा इत्यादौ व
धुमायां स्वस्या नारकत्वेनापि कामलोकेन सादृश्यसंभवात् तस्याविशेषणस्य व्यर्थताप्रसंगात् संभावनोप
योगादित्यलं पल्लवेन ॥ अत्र प्राचामयं सिद्धांतः सर्वत्र विषये विषयिणो ऽभेदेनैव संसर्गेणोत्प्रेक्षणं ननु सं
वंधांतरेण तथा च काव्यप्रकाशे संभावनमथोत्प्रेक्षा प्रकृतस्य परेण यत् तत्र लिंपतीव तमोंगानि
वर्षतीवांजनं नभः इत्युदाहृतस्य अत्र व्यापनादिलेपनादिरूपतया संभावितमिति व्याख्यातं नूनं मुखं चंद्र

इत्यादौ नामार्थयोरभेदान्वयात्स्पष्टमेव तथा नतरां स्यांकुनीनामधिमोहमूहे भृगुर्महान्वकुर्वशे स्त्रशीली नानार
दाङ्करिमुखविश्रितोरुख्योसोमहाभारतस्सर्गयोग इत्यादौ भेमा मोहस्वरूपस्य धर्मस्य भेदसंबंधेनैवोत्प्रेक्षायां
वाधे नियम इति वाच्यम् तत्रापि नमेयो विषयता संबंधेन मुनिनिष्ठमोहस्योत्प्रेक्षा किंतु मुनिसंबंधिनिधर्मा
तरे विषयम्र तेऽभेदेन मोहस्सैवेति वाच्यत्वात् संभावनाविषयस्य वनिगीर्णत्वात्साध्यवसानतयानुपपादाने ॥
एवं चैरस्य पद्मीति पलायितस्य मालत्वेचंकं ट किनो वनीताः अत्रापि किं वानुभविष्यतीति व्यपादयन्स्कुमिवा
क्षराशिरित्यत्रापि फलोत्प्रेक्षायां वनांते कुम्भालविपाटनहेतुलल्लायाक्षरदर्शनमेव नोत्प्रेक्ष्यते किंतु तदक्षरदर्शि
नहेतुकत्वस्वविपाटनकेटकज्ञविपाटनेऽत्प्रेक्ष्यत इति ॥ अत्रनवीनाः ॥ अभेदेनैवोत्प्रेक्षा सराम्भिति नियमेमानाभा
वः अस्यां कुनीनामधिमोहमूहे इत्यादौ भेदेनापि संसर्गेण तद्दर्शनात् न च तत्रापि कृतकरीत्या अयशोननिर्वाहः शं
क्यः ताहशनियमस्यैव प्रमाणाविरहादेतादृशाङ्गुराग्रहस्य निर्मूलत्वात् एवं लिंपतीव तमोंगानि इत्यत्रापि लेपनक
र्तृत्वं तमस्याविषयतोत्प्रेक्ष्यं अनुकूलव्यापारस्याख्यातार्थस्याश्रयत्वसंबंधेन प्रथमान्तार्थेऽन्वयात् भावप्रधान

माख्यातमित्यस्य व्यापारार्थकं तदित्यर्थात् तेन लिंपतीत्यादौ भेदेनाभेदेन वा तिङर्थस्य प्रथमान्तार्थे एवोत्प्रेक्ष-
णा ननु धात्वर्थस्य स्वनिगीर्णव्यापनादौ एवं सैषा स्खलीयत्वविच्छित्तिर्मया नूपुरमेकमुर्व्याम् इत्यत्र स्खलत्त्वस्य
रणितेऽध्यवसेयस्य स्वाश्रयवृत्तिमौनं इत्यत्रापि निःस्खलत्वनिमित्तकं निःशब्दत्वविषये विश्लेषदुःखहेतुकमौनम- तां स्तु पं २
भेदेन नोत्प्रेक्ष्यते किंतु मौनहेतुत्वेन नूपुरे विश्लेषदुःखमेव उत्प्रेक्षायामिव शब्दान्वयिन एवोत्प्रेक्ष्यत्वस्य सर्व-
सिद्धत्वात् विषयस्यानिगीर्णतया विषयविशेषणत्वानुपपत्तेश्च निःशब्दत्वमौनयोः संभावनानिमित्तभूतधर्मा-
न्तरगवेषणाय तेन्य एककालीनत्वादिधर्मस्य चमत्कारानाधायकत्वेनोपमावदुत्प्रेक्षायामप्यप्रयोजकत्वा-
त् न च नूपुरविषयमौनोत्प्रेक्षायामपि कोऽधर्म इति वाच्यम् निःस्खलत्वनिमित्तकं यन्निःशब्दत्वं तादृश्यस्याध्यवसि-
तस्य मौनस्यैव तत्त्वात् तस्य विश्लेषदुःखसमानाधिकरणत्वात् नूपुरवर्तित्वाच्च तस्मात्तद्भिन्नत्वेन प्रमितस्य
दार्थस्य रमणीयतद्वृत्तिधर्मनिमित्तकं तादात्म्येन संभावनं धर्मिस्वरूपोत्प्रेक्षायाः तदभाववत्त्वेन प्रमितस्य
पदार्थस्य तत्समानाधिकरणधर्मनिमित्तकं तद्वत्त्वेन संभावनं धर्मस्वरूपोत्प्रेक्षाया लक्षणमित्याहुः॥ इत्थ

त्कोऽस्या॥ प्रकृते तदन्यविषया सादृश्यज्ञानजन्याया बुद्धिर्निश्चयभिन्नता मानरव्युं ससंदेह मा॥उपमेयेऽप
मानविषयकः संशयः ससंदेह इत्यर्थः॥ मांनिमद इति व्याप्तिवारणाय निश्चयभिन्नेति स्थाणुर्न वेत्यादिवारणाय
यप्रकृतेति रसानुकूलत्वेन प्रकृतेत्यर्थकं अस्तु घाधीरस्यजयाय सादृश्येतरारवेलन्यां विशिष्टैः सनायपन
निश्चये यामासयशांसि संशयस्मरः स्त्रीलोकी विजयार्जितान्यपि इत्यादि संशयनिषेधाय सादृश्येति अस्य
भेदद्वयमाह॥ उक्तौ विशेषधर्मे प्रकृतस्य भेदनुक्तौ चा॥ प्रथमे हि धा निश्चयान्तनिश्चयगर्भताभेदात् यत्र
प्रकृतेऽन्यसंशये जाते प्रकृतनिष्ठविशेषधर्मदर्शनेन प्रकृतनिर्णयस्तत्र निश्चयान्तत्वं॥ यथा॥ किं ताव
त्सरसि सरोजमेतदाराद्दाहोस्वित् मुखमवभासते युवत्याः संशय्य क्षणमयि निश्चिकाय कश्चिद्विब्बोकै
र्बकसहवासिनां परोक्षैः॥ अत्र हि विब्बोकाभावविशेषोऽचेतने सरोजे नास्तीति मुखव्याप्यतया तद्बोध
तरं मुखनिश्चये सति तदनन्तरं न त्वेदं त्वादिना संदेहः॥ यत्र तूपमाननिष्ठो विशेषधर्म उच्यते न तत्रोपमेय
प्रकारान्तरेण संदेहो भवत्येव स निश्चयगर्भः॥ यथा मम॥ इयं विद्युद्दृश्मी किमु नभस्विरस्याभिरतं

अ·कौ·
६
60

लता किं वा हैमी नहि भवति तस्यां कृतितति: इति: साक्षात्किं वा रंभजनितेदृशो: सा विषयतामिति त्वोपशंतः
प्रविरधति संदेहनिकरान्॥ अत्र नायिकायामियं विद्युन्न वेति संशये जाते क्षणमावस्थायित्वं विरुद्धधर्म उक्तः।
तेन च तत्संशयनिवृत्तौपि द्युल्लतादीनां संशय इति निश्चयगर्भोसौ परं तु निश्चयांते स एवायमेव अत्र तु
वैधर्म्यमात्रोक्तौ निश्चयगर्भ इति चमत्कारानुरोधेन केचिन्निश्चयगर्भमेवाद्रियंत इति विशेषः। विशेषध
र्मानुक्तौ तु यथा अस्याः सर्गविधौ प्रजापतिरभूच्चंद्रो नु कांतिप्रदः शृंगारैकरसः स्वयं नु मदनो मासो नु पु
ष्पाकरः वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥
अत्र हि चंद्राद्वा वेतन्निर्मातृत्वसंशये पूर्वपूर्वसंदेहव्यावर्तकविशेषधर्मानोक्तः। अत्रास्या निर्माता चंद्रो
वा वसंतो वा मदनो वेति स्थाणुर्वा पुरुषो वेति विरुद्धनानाभावकोटिकः संशय इति केचित्। चंद्रो मदनो
वसंतो वास्याः स्रष्टेति एककोटिकनानाधर्मिकः संशय इति दीक्षिताः। अन्ये तु भावाभावकोटिकज्ञा
-ना-ना- नमेव संशयो न तु विरुद्धकोटिकमपि तस्य संशयलक्षणेऽलक्ष्यत्वोक्तेः स्थाणुर्वा पुरुषो वेति ज्ञाने

रामः
६

सति न तु तर्कः स्यात्पुनर्नायद्रूपो न वेति संशयानुत्पत्ते रुभयव सिद्धत्वात् तस्य संशयत्वे तु संश
यात्मकेनानस्यामतिवंध्यकतयानतु तर्कसंशयोत्पत्तिः स्यात् अतएव द्रोस्यानिर्मातानवामर्दनोनि
र्मातानवावसंतोनिर्मातानवारत्येवसंशयः निर्मातत्वोपपादकस्य कांतिग्रहत्वादेवं द्रारिद्
निर्दशारित्याहुः पुलकेतत् अन्यथा एकसंशयत्वपक्षे विशेषधर्मानुसंधानरहत्वात्पप
तेः॥ केचित्तु वितर्कालंकारमप्यतिरिक्तं वदंति संशयोत्तरमनिर्णये ऊहो वितर्कः तु शब्दादि
स्वतंत्रेजेक इति आहुः वितर्कहेतुत्वेन संशयस्यावश्यंगीकार्यतया संशयएवालंकारः न
वसंशये सति व्यापरिनिर्माता स्यान्निर्माणसामग्री मा स्यादिति तर्कस्यापाद्यं निर्माणसामग्री
सत्वे वेदाभ्यासजन्यइत्यादिना निषिध्यत इति वितर्कोपि पृथगितिवाच्यं सर्वस्य तर्कसत्वेकप
ल्पितं किंतु त्वेतत्पनास्तीत्याशंकामपनेतुं वेदाभ्यासजेत्याहुर्कैः एवं अयं मार्तंडः किं इत्याशंकापि
ययमार्तंडः स्यादिति तर्कोपाद्यं समनुरगत्वे सत्वेनु इत्यादिना न निषिध्यते किंतु मार्तंडत्वा

अ·को·
६१

रिष्ठकारकसंदेहे सति कथंचन शान्तत्वादिप्रकारकसंशय इति मार्तंडत्वप्रकारकसंशयनिवृत्यर्थमेव
तहिति द्वहन मयशिरः कलिंगव द्वासमरकुरेव करहाटवद्वृत्तं वा इत्यादौ तु यवेवी श्रीहिर्निर्णय इतै
तिव हारवृस्थितविकल्पार्थो वाशब्दो न तु संशयार्थ इति एतेन सश्रीक्रियतां करदानायशस्त्रमन्द्रणा
यवा गर्हेतां हिरण्यमर्पणाविना न संतु शिरो धनूंषि वा कर्णपूरीक्रियतां मा ग्रामो भोज्यो वा इत्यादयो
व्याख्याताः एवमेव सिंहवल्गोत रंगच्छदंहंसेव सेवाम्सवत् इत्यादावप्युपधेयम् सिंदूरैः परिपूरितं
किमथवा लाक्षारसैः क्षालितं लिप्तं वा किमु कुंकुमद्रवभरै रक्तं महीमंडलम् संदेहं जनयन्नृणामिति
परिज्ञातत्रिलोकस्त्विषां प्रातःप्रातरुपातनोतु भवतां भव्यानि भास्वानिधे रित्यत्र तु जगन्मंडलविशेष्य
कः सिंदूरपरिपूरितत्वादिकोटिकः संशयः अत्र किमिति संदेहः रजो वा लाक्षारसो वा इत्यादि
स्वयं किरणधर्मिकसंशयान्तर्गतां पदं भाति तत्रारोप्यारोपविषययोः समानविभक्तिकत्वाभावाद्द्विविकि
रणरूपस्य धर्मिणोऽवसानमिति मोचः रक्तांगाम्बरे तु सूर्यकिरणधर्मिकसंशयस्वगुणा न

राम:
६१

स्यश्वं जनागम्यत्वाद्धि षर्यविषयिणोरारोपानुकूलविमर्शत्वात् न हि नैवारोपसंभवात्राध्यवसा
नमिति तुल्ले. तद्वित्सम्मानससंशयेपि धर्मिणाह्दत्वेनैवोपस्थिते: सूर्यकिरणत्वस्य संशयेविशेष्यताव
च्छेदकत्वेनाभानात् सूर्यकिरणत्वं धर्मितावच्छेदकीकृत्याभेदसंसर्गकसिंदूराद्दिप्रकारकसंदेहस्या
संभवात् तथा च स्पष्टा चमत्कृतिरमणीयैव ॥ इति अलंकारकौस्तुभे ससंदेहालंकारनिरूपणम् ॥ रूपक
माह तद्रूपकं त्वभेदः स्यादुपमानोपमेययोरिव सत्यामेव भेदप्रतीतावतिसादृश्यवशेन यत्राभेदम
ह्यत्योपमानेन सममुपमेयस्याभेदः सारोपलक्षणया प्रतीयते तद्रूपकमित्यर्थः अत्राभेद एव रूप
कं तस्य प्रतीतिराहार्यी भ्रांतिमतित्वनाहार्येवेति केचित् अभेदारोप एव रूपकमिति काव्यप्रदीपः
अन्ये तु उपमेयवतिरोभूत रूपामेदारूपकमिष्यते इति प्राचीनोक्तिविरुद्धमेतत् उपमा हि साध
र्म्यं रूपामेदांशविनिर्मुक्तं साधर्म्यमेव रूपकमिति तदर्थलाभात् तस्माद्यदोपमानशब्दानां गौणा
वृत्तिर्यथाश्रयात् उपमेयमेवेहविक्तस्यात् तद्रूपकं भवेदित्युक्तदिशा सारोपलक्षणालभ्यं साम्यमेव

रूपकमित्याहुः ननु मुखं चंद्र इत्यत्रैव चंद्रपदस्य मुखत्वेन मुखलक्षणायां पो॰ न॰ तस्य चंद्रगतलावण्यादि
गुणेन लक्षणायामन्यगुणस्यान्यत्रवृत्तिनिमित्तत्वानुपपत्तिः मुखगतलावण्यादिगुणेन लक्षणायां मु
ख्या पंक्षं वंधरहिते गुणेन तदनुपपत्तिरिति चेत् अत्राहुः मुखं चंद्रो मयानुगतलावण्यादिसाम्यान्मुखे न
लक्षणेति केचित्तु रूपकस्थले न लक्षणा चंद्रत्वस्यैवाव्यधिकरणधर्मेण चंद्रशब्देन शक्त्यैव मुखबो
धसंभवात् नामार्थयोरभेदान्वयव्युत्पत्तेरित्याहुः ॥ ननु मुखं न चंद्र इति बाधनिर्णयसत्त्वे योग्यताज्ञा
नाभावात्कथं मुखं चंद्र इत्यादावभेदान्वयबोधः इति चेत् अत्र नैयायिकाः आहार्यज्ञाने बाधबुद्धेर
ज्ञा॰ न॰ २ प्रतिबंधकतया आहार्ययोग्यताज्ञानादेव तत्रान्वयबोधः न चाहार्यात्मकः शाब्दबोध एवास्तु किमा
हार्ययोग्यताकल्पनयेति वाच्यं तथा सति परोक्षज्ञानमनाहार्यमेवेति सिद्धांतभंगापत्तेः एवं च सेको
नवह्निकरणक इत्ययोग्यताज्ञानसत्त्वेपि आहार्ययोग्यताज्ञानाद्वह्निना सिंचतीत्यादावपि शाब्दबो
धो भवत्येवेत्याहुः यत्तु शाब्दबोधस्याप्याहार्यत्वमस्तु बाधकाभावादिति तन्तुच्छं तथा सत्यनुमित्या

दावनाहार्यस्यैव परामर्शस्य हेतुत्वाद्बुद्धिव्याप्यधूमवान्पर्वत इत्यादिशाब्दबोधकपरामर्शस्य हेतोपि कारणा
तावच्छेदककोटावनाहार्यत्वनिवेशे गौरवप्रसंगात् एवमन्यत्रापि बोध्यं केचित्तु मुखं चंद्र इत्यादौ मुखं
न चंद्र इत्याद्ययोग्यतानिर्णयसत्वेऽभेदान्वयो न जायते किंतु चंद्रपदस्य चंद्रसादृश्यविशिष्टे लक्षणाया
चंद्रसादृश्यविशिष्टाभिन्नं मुखमित्येव बोध इत्याहुः अत एवोपमानरूपकयोरभेदापत्तिः सादृश्य
प्रत्ययस्योभयत्रापि विशिष्टत्वात् न चोपमायां सादृश्यमुपमेयविशेषणं रूपके तु तद्वानिति भेद
इति वाच्यम् बोधवैलक्षण्येऽपि विच्छित्तिसाम्येन पार्थक्यानुपपत्तेः अत एव चंद्र इव मुखं चंद्रसदृ
शं मुखमित्यादौ न पृथगलंकारः सादृश्यनदृश्ययोरुपमेयविशेषणतायाः सत्वादिति चेत् अ
त्राहुः सादृश्यप्रतीतिरुभयत्राविशेषेऽपि लक्षणायाः फलीभूतताद्रूप्यज्ञानमारोपरूपकस्योप
मातो भेदः चंद्र इवेत्यादौ च लक्षणाविरहान्न ताद्रूप्यप्रतीतिरिति नोक्तदोषः ताद्रूप्यज्ञानं च वि
षयितावच्छेदकस्य चंद्रत्वादेः स्फुरणादेव बोधः न च लक्षणाजन्योपितत्सादृश्यबोधे कथं ताद्रूप्यप्रत्य

इति वाच्यम् मुखे चाह्लादकपदोपादानेनाप्यापितत्वेनैवैतत्संभवात् नचैवमपि चंद्रसादृश्यवि
शिष्टस्य च चंद्रतादात्म्यप्रत्ययः स्यात् तयोरेवैकरूपोपादानत्वात् इष्यते च मुखत्वविशिष्टे मुखे चंद्र
तादात्म्यप्रत्यय इति वाच्यम् ॥ चंद्रसादृश्यविशिष्टे चंद्रतादात्म्यप्रत्यये जाते चंद्रसादृश्यविशिष्टेऽपि मु
खे मुखत्वेऽपि चंद्रतादात्म्यप्रत्ययसंभवादिति केचित्तु चंद्रसदृशोल्लसल्लावण्यामपि न तेन रूपेण मुखत्वादि
भिरभेदान्वयः किंतु चंद्रत्वेनैव तत्र त्वदल्लसल्लावण्यज्ञानस्य तत्तत्पदवाच्यतावच्छेदकप्रकारकत्वे
स्य विशेष्यकशाब्दत्वमेव कार्यतावच्छेदकं कल्प्यते शाब्दपदार्थोपस्थित्योः समानप्रकारकत्व
नियमोऽप्येत इति दिक् स्थलमात्रपरः प्रकृते लाक्षणिकबोधवैलक्षण्यस्यानुभवसिद्धत्वाच्च न चोरवा
दिदोषः मुखे चंद्रत्वादिप्रतिपत्तेश्च चंद्रगतधर्मप्रतिपत्तिः फलं तां विना चंद्रत्वनियतगुणानां मु
खे प्रतीत्यनुपपत्तेरिति वदंति तत्र चंद्रत्वावच्छिन्नप्रकारताकाभेदसंसर्गकमुखविशेष्यक
ज्ञानं प्रति बाधबुद्धेरत्र प्रतिबंधकत्वाविशेषात् ईदृशज्ञाने बाधबुद्धेरप्रतिबंधकत्वाविशे

बाधिकल्पनेपि शक्तिजन्यैतादृशबोधस्यवाप्रतिबंधकत्वस्य कल्पयितुमुचितत्वात् चंद्रत्वावच्छि
न्नप्रकारताकमुख्यविशेष्यकज्ञानेनचचंद्रसदृशेलक्षणांविनापिशक्त्यैवतद्बोधोपपत्त्याभावादेव
नात्रप्रमाणाभवितुमर्हति अतएवगंगायांघोषइत्यादावपिगंगात्वेनैवतदुपस्थानेपि गंगात्वेन
प्रकारेणप्रवाहेघोषबाधबुद्धौतेनैवप्रकारेणतीरेपितदन्वयानुपपत्तेः नचगंगात्वेनप्रवाहे
घोषबाधबुद्धेःगंगात्वप्रकारकप्रवाहविशेष्यकघोषान्वयबुद्धित्वमेवप्रतिबध्यतावच्छेदकंतुगंगा
त्वप्रकारकतीरविशेष्यकबुद्धित्वेनेतिवाच्यं समानप्रकारकत्वेनैवबाधबुद्धीनांप्रतिबंधकत्वात्
अन्यथापर्वतत्वधर्मितावच्छेदकीकृत्यपर्वतेवह्न्यभाववत्ताज्ञानेपर्वतत्वमेवधर्मितावच्छेदकीकृ
त्यमहानसविशेष्यकवह्निमत्ताज्ञानप्रसंगात् अतस्तत्रापिलाक्षणिकशाब्दबोधोत्तरंयोजनयैवगंगा
पदेतद्बुद्धिरितिन्यायपंचाननाशयः एवंप्रकृतेपिचंद्रत्वेनबाधबुद्धौसत्यांकल्पतेनैवरूपेणालाक्ष
णिकोप्यन्वयबोधःस्यादितिदिक् ॥ अन्येत्वेमेरुगर्भसादृश्यरूपकेप्रतीयतेउपमायांतुमेरुगर्भमेव

ब० कौ०
६४
65

ति विशेषः मतांतरे तु भेदगर्भसादृश्यज्ञानात्कथमभेदप्रतीतिरित्यनुपपत्तिः स्यादित्याहुः वस्तुतो मुखं च-
न्द्र इत्येतादृशबाधबुद्धिप्रतिबंधकतायां सादृश्यातिशयप्रतीतेरुत्तेजकत्वमंगीकार्यम् बाधबुद्धिप्रतिब-
ध्यप्रतिबंधकभावानां तत्तद्विशेष्यतावच्छेदकप्रकारतावच्छेदकान्तर्भावेनैव वाच्यतया तेषां भिन्नभिन्नत्वा-
त्॥ तथा चोक्तसादृश्यज्ञानाभावविशिष्टमेव मुखं चंद्र इत्येतादृशबाधज्ञानं प्रतिबंधकं यत्र सादृश्य-
ज्ञानं नास्ति तत्रोक्तबाधनिर्णयसत्त्वे भेदान्वयबोधो न भवत्येव न चैवं मुखं न चंद्रसदृशं किंतु चंद्र एव सिं-
हेन सदृशो नायं किंतु सिंहो महीपतिरित्यादावभेदान्वयबोधो न स्यात् सादृश्यज्ञानाभावादिति वाच्यं त-
त्रापि चंद्रसादृश्यज्ञानाभावेन भेदाभावज्ञानपर्यवसितेन भेदज्ञानस्यैव प्रतिबंधात् तथा च प्रतिबंध-
काभावादेव तत्र कार्योत्पत्तिः एतावांस्तु भेदः कुत्रचिद्विशेषणाभावाद्विशिष्टाभावः क्वचित्तु विशे-
ष्याभावादेवेति नहि चंद्रसदृशं नेति ज्ञानस्य साक्षात्ताधर्मेवज्ञानिषेधकत्वं संभवति तथा सति रूप-
कमेवेदं न स्यात् भेदगर्भसादृश्यस्यैव रूपकशरीरत्वेन सर्वसंमतत्वादित्यलं बहुना ॥ तद्भेदानाह

राम:
६४

आरोप्याः शाब्दाः सर्वेत्वयं ति समस्तवस्तुविषयं तत्र आरोप्या इति बहुवचनमतंत्रं अतो बहुत्वे द्वि-
त्वे वा न दोषः यत्रारोपविषयविषयिणोः शब्देनोपादानं तद्रूपकं समस्तवस्तुविषयमित्यर्थः॥ यथा सो
ढ इ विसृङ्खलकिरणो रासमूहस्मिरश्मिशिवेला लज्जो तारामो मापः प्ररोहः उविश्लिष्ट अमेह शिशिरस
पृष्ठको॥ अत्र गगनादेः समुद्रत्वादिकमारोप्यमाणं सर्वं शब्दोपात्तं॥ नन्विदं रूपकमेवेत्युपमानाम
वः तारामुक्ता इवेत्यादि रूपोपमितसमासस्यापि संभवात् संदेहसंकरादिति चेन्न विशृङ्खलकिरणा इति
सामान्यधर्मप्रयोगसत्त्वादुपमितसमासासंभवात् तथा च पाणिनिसूत्रं उपमितं व्याघ्रादिभिः सा श्री ६
मान्याप्रयोगे इति अस्यार्थस्तु उपमितमुपमेयं व्याघ्रादिभिरुपमानैः सह समस्यते सामान्यस्या
धारणधर्मस्याप्रयोगे सतीति पुरुषोयं व्याघ्र इव पुरुषव्याघ्र इत्युदाहरणं सामान्याप्रयोगे इति किं पुरुषो
यं व्याघ्र इव शूर इत्यत्र पुरुषव्याघ्रः शूर इति मा भूत् अतस्तारा इव मुक्ता इति मयूरव्यंसकादेरयस्य
ति रूपकेण समासः॥ एकदेशविवर्त्यन्यः श्रौतार्थत्वे तु संगे हि॥ यत्र केचिदारोप्यमाणाः शब्दोपात्ताः के

विस्तारोऽङ्गस्याङ्गस्यैकदेशो विशेषणावर्जं तदन्यैकदेशविवर्ति विशेषकस्य सामर्थ्यादन्यापेक्षयाप्येक
न्यद्रूपः। पूर्वोक्तं समस्तवस्तुविषयमेकदेशविवर्ति चेति द्विविधमपि रूपकं सांगं सावयवमित्यर्थः॥
यथा पीतापत्रं हरलुगाह्निसासापव सेतजले अमसम अविशं सोऽहंगामठमहूह्लप धाम्नः सरस्या
हयश्रेईदहह्लं॥ अत्रैव धनुषो नरवपदत्वेन रूपणात् दिशां नायिकात्वमाक्षिप्यते कथमिति चेत् नव
सतं नायिकानायकान्तराधिकरणत्वव्याप्यमिति जलदसमयविनीतत्वे तन्नायिकाधिकरणत्वबा
धेन नायिकाधिकरणत्वसिद्धेः न रक्षते वानुरागपूर्वकत्वविशेषणम् अतो न किंचिदारोपयामिति शं
शंका॥ निरवयवे तु तदुक्तं यद्येकारोपसाधकं नान्यत्॥ यत्र कश्चित् किंचिदारोप्यत इत्येतावन्मात्रेण तु तद्रु
पपादकमारोपान्तरं तद्रूपकं निरवयवं शुद्धमित्यर्थः॥ यथा॥ दैवात्पश्येर्जगति विचरन्न[illegible]यां मालतीं
दामस्वामाश्वास्य तदनु कथयेर्माधवीयामवस्थां आशातन्तुर्न च कथयतात्यन्तमुच्छेदनीयः प्राणत्राणां सप
दि सकरोत्यायताक्ष्याः स एकः॥ अत्राशायास्तन्तुत्वेन रूपणमात्रं॥ मालारूपकमुक्तं त्वेकस्मिन्नूप

सामस्त्यारोपः ॥ यत्र परस्परनिरपेक्षस्य कस्मिंश्चिदनेकेषामारोपास्तत्सामस्त्यारोपः ॥ यथा मममह धरा-
शिरोज्योतिःकमलं वरालिकावलि आलोकोत्सरोतुरसंहितोत्सवाद्केलिहेतुरवो महे अरेवा हितरागिणिरापि-
संलीनो ॥ अत्रैकस्मिन्केलिहेतरवे मन्मथतुनिर्योगमानेकारोपः अनेकपदार्थकर्मित्वपरं ॥
यथानेनरक्तेलेकालेमुत्रेगीकोपानलवहलेहमलेता अत्रापि वध्यमानोवध्यः कोनेछातिशिरखामि ॥
अत्रारोपाभावप्रयोजकस्य त्वभावस्य प्रतियोगीपरकीयारोपायस्तत्परंपरितम् ॥ यत्र पुरोरोपे विना-
न्यत्रान्यारोपानसंभवति तत्परंपरितं नाम रूपकं ॥ परंपरारूपकारोपद्या न्यारोपहेतुत्वमित्येवं रूपासंज्ञा
तात्रेतितारकारेटाकृतिगया त्वारितजित्यर्थः तस्यैव विधमाह तत्र श्लेषमेदान्यायामारोपानिमित्तस्य
रस्य अन्यत्रान्यारोपहेतुर्यदारोपस्तत्रूपं रूपकस्य श्लेषसामग्र्यादारोप्यारोपाधिकरणवाचकत्वे
आरोप्यारोपविषयवाचकपरयोर्मध्ये रेवपरंपरितं संभवतीति हि विधं नदितर्थः ॥ आद्यं यथा पातु सल-
लीपर्डुहरेहिपाडिपालिञ्जूविंसो उनहेतुनातिरा ॥ कुररामंचपसाइ आइ अंगाइ ॥ अत्राहित तरागा कुरेरुपुरो

मांचत्वारोपः पयोधरो मेघ इव पयोधरः स्तन इति मेघस्तनत्वारोपं विना नु संभवतीति मेघालिंगनेन रोमां
चोनुपपन्न इति मेघस्तनत्वारोपो न च तत्तरांकुरेषु रोमांचत्वारोपे निमित्तमिति पयोधरपदोपस्थाप्ययो
र्मेघस्तनयोरभेदसंबंधेनान्वयाद् श्लेषोपि गौणः॥ यथा वा भुवि भ्रमित्वा नवलेवमेव वैरं विहर्तुमभ्यासप
रंपरया परा अहो महावराह महानुभाव समाकर्णिता सकौतुकेन त्वयाति कीर्तीर्नर्तकी॥ अत्र राज्ञि महावराहमहानु
भावे संभवस्य [illegible] त्वं शौर्यमिति वा त्वारोपः कीर्तौ नर्तकीत्वारोपे निमित्तमुभयत्र पयोधरमहा
वराहपदयोः श्लिष्टत्वं॥ भेदे यथा॥ एतेन यो हारकपटकालिकेव भूवकेशा [illegible] विद्युद्देवसाम्राज्ये
संबंधवशादि [illegible] स्थिरत्वमत्रेति पतं तदायुधः॥ इह केशेषु मेघत्वारोपः सुवर्णापट्टिकायां वि
द्युत्वारोपे निमित्तं केशांबुधरयोर्मिश्रत्वं च॥ वा [illegible] परंपरितं यथा विद्रुमानसरा
जहंसकमलासंकोचदीप्तप्रद्युते दुर्गामार्गणानीललोहित समित्स्वीकारवैश्वानर सत्यप्रीतिवि
धानदक्षविजयप्राग्भावभीमप्रभो साम्राज्यं वरवीरवत्सर शतं वैरिंचमुच्चैः क्रियाः॥ अत्र विद्रु

थं मानसमन्यदेव मानसं सरः इति श्लेषमूलकामेराध्यवसायलम्भं मानसवासित्वं राजहंसत्वा
रोपनिमित्तं नवहृदयस्य सरस्त्वेनाध्यवसायो राजहंसत्वेन रूपेणास्य संभवति तन्निमित्तसाधारण
धर्मस्य तु स्वे कमलत्वाद्यारोपनिमित्तधर्मस्येव श्लेषसिद्धस्याभावात् अत्र मानसेत्यत्रार्थश्लेष
कमलोसंकोचेत्यादौ शब्दश्लेष इति विशेषः यद्यपि मानसादिपदानामत्र परिवृत्त्यसहत्वेन हि
श्लिष्टादिपदरोपादानेनोक्तार्थः प्रत्याययितुं शक्यते हंसादिपदानि च तत्सहानि पर्यायान्तरोपादाने
प्युक्तार्थसिद्धेरिति शब्दार्थोभयश्लेषोयं तथाप्यलंकारसर्वस्वकारादीनां प्राचीनानां प्रसिद्धि
मनुसृत्यार्थालंकारमध्ये पाठः केचित्त्विदमेकदेशविवर्तीति व्यवह्रियते तथा हि यथा
रोपान्तःपुरत्वारोपे वकुलतादिपुसेनयोर्नायिकाप्रतिनायिकात्वारोपः सामर्थ्यात् तथा म
नसि सरस्त्वारोपे तद्गताद्राजहंसत्वारोप इति नवीनास्तु रसाज्ञान्तःपुरत्वं तु स्वसंगारास्पद
त्वादपि श्लिष्टलतादेर्नायिकात्वाद्यारोपो लिंगविशेषकरग्रहादिनायिकारोपादपि संभ धर्म १

वर्ति विहन्मानसे सत्यादौ तु मनःसरोवराजेयत्वं विना राजहंसत्वारोपनिमित्तसाधर्म्यान्तरविरहेरा
हृदये सरस्त्वारोपं विना राजहंसत्वारोपो न संभवति इतीदं परंपरितमेव न त्वेकदेशविवर्तित्याहु॥
यात्वकर्मेरे मालारूपकं परंपरितं यथा वल्लभसा अरइयउँ सोत्तोसगईदसारिकु संदवलायऊ वंधो॥
कहकहविहासरहिसाजअकेसरिपनरोगउँ घनसमऊँ॥ अत्र हि व्यवसायादौ रवित्वाद्यारोपवि
ना घनसमये सुप्रदोषत्वाद्यारोपो न संभवतीति परंपरितं द्विप्रदोषयोरारोप्यारोपविषययोर्भिन्नपद
वाच्यत्वं वा॥ यथा वा मा गाउ मयइ रूसपवरास्समाभिसद्धंगालिहुइकरस्स उअअजे हगस्समहद्द इगा
उअपुरं गस्सा॥ मान रत्नो दुमनाटकाभेदारोपो उपगूहेन पवनपूर्वरंगाभेदारोपनिमित्तं अ
प्रविरोधिता संबंधेनानुग्राह्यानुग्राहकभाव इति विशेषः अभेदारोपस्य संसर्गारोपानुग्राहकत्वं
यथा मम दृशौ नीलांभोजे वरतनुकुचौ कोकतरुणौ चकास्ती यं रोमावलिरंपि च शैवाललति
का॥ प्रवाहो लावण्यं त्रिवलिरियमाभाति लहरी कवीन्द्राणामंतः स्फुरति सरसी त्वं त्वयि ततः॥ स

संसर्गारोपस्याभेदारोपानुग्राहकत्वं यथा मुखमेव मन्दाकिनीत्यत्र हि मौक्तिकमन्दाकिन्योः स्थूलेन्दुनीलगुलिका
स्तवकावलम्ब्यम्॥ धान्तत्वमुन्नतमार्गीमदकरिमेत्रवक्षोरुहः स्तनतुंगपनीयशैलः॥ एवमभेदेपिभेदाः स्वय
मूह्याः इति॥ अत्रासिद्धेति समासगतपदं परितरूपकस्य लेतत्पुरुषावयवभूते कर्मधारये पूर्वपदार्थ नर
स्याभेदसंसर्गारोत्तरपदार्थविशेषणत्वे नोपमेयेउपमानाभेदसमर्थकत्वं न संभवति यत्संबंधि
नियतत्वं च भेदस्तन्नियतभेदइति कुत्यते: सौजन्यचंद्रिकाचन्द्रइत्यादौ हि चंद्रिकायां सौजन्याभेदो राज्ञि
चन्द्राभेदसमर्थक इत्यभिमतं तत्र सौजन्यविशेष्यकाभेदसंसर्गकाचंद्रिकाप्रकारीकारोपायासिद्ध
ति न तु चंद्रिकायां सौजन्याभेदेन तथा सौजन्यं ते धराधीश चंद्रिकात्वं सुधानिधिः अत्र हि राजसं
बंधिनि सौजन्ये चन्द्रसंबंधिचंद्रिकातादात्म्यसिद्धावपि चन्द्रतादात्म्यमुपपन्नं न तु चंद्रिकायां सौज
न्याभेद[illegible]बोधे सौजन्ये तदभेदोपि भासते समानवित्तिवेद्यत्वात् स्वस्य स्वामि त्वामि त्वाद्धीति
वाच्यम् प्रत्यक्षे सामग्रीसाम्यादेकवित्तिवेद्यत्वं शाब्दे तु व्युत्पत्तिविशेषनियत एव बोध इति अ

अ·कौ·
६८
68

तिरिक्तस्याभानात् एवं मुखचंद्र इत्यादि समासेपि कथं मुखविशेष्यकचंद्राभेदारोप इति॥ तत्र केचित् कर्मधार
ये ह्यभेदो विशेषणस्य संसर्गः मुखचंद्र इति वाक्ये चंद्रप्रतियोगिकाभेदवन्मुखमिति प्रतियोगित्वं मुखः मुख
चंद्र इत्यादि समासे तु मुखानुयोगिकाभेदप्रतियोगी चंद्र इत्यनुयोगित्वं मुखः तदुभयत्रापि चंद्राभेदस्य सं
सर्गः वाक्ये प्रतियोगित्वं मुखः समासे त्वनुयोगित्वं मुखः इत्येव विशेषः मुखचंद्र इत्यत्र मुखाभेदस्तु न संस
र्गः चंद्रस्य कानापत्तेः विशेषणप्रतियोगिक एवाभेदः संसर्गो न तु तदनुयोगिक इति तु दुराग्रहः निर्वीज
त्वादिति तथा च सोऽजन्यनिष्ठाभेदप्रतियोगिनी चंद्रिकेति भंग्यंतरेणासोऽजन्ये चंद्रिकातादात्म्यसिद्धौ राज्ञि
चंद्राभेदसिद्धिरिति अत्रोच्यते नीलघट इति कर्मधारये नीलप्रकारकाभेदसंसर्गकघटविशेष्यक
ज्ञानोदयात् विशेषणप्रतियोगिक एवाभेदः संसर्गः न तु विशेष्यप्रतियोगिक इति संसर्गमात्रे बाध
मेव नियमः प्रकारप्रतियोगिक एव संसर्गो न तु विशेष्यप्रतियोगिक इति पर्वतो वह्निमानित्यादौ प
र्वतानुयोगिकत्वेन वह्निप्रतियोगिकत्वेनैव तस्याभानात् यत्तु दुराग्रहमात्रमेतदिति तदेव दुराग्रहः
भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं भासमानवैशिष्ट्यानुयोगित्वं च विशेष्यत्वमिति सिद्धां

रामः
६८

नात् संसर्गस्य विशेषणतानुयोगिकत्वस्वीकारे च तद्विरोधस्य स्फुटत्वात् किंच सो ऽन्यविशेष्यकाभेदसंस
र्गकचंद्रिकाप्रकारकबोधः शाब्दस्तस्मान्नास्ति एतावता का नाम हानिर्भवतः येनात्र विशेषणतानुयोगिकत्वं
भासत इत्यंगीक्रियते ननु शब्दे चंद्राभेदसमर्थकत्वानुपपत्तिरेवात्र मानमिति चेत् न तदुत्तरकालीनसो
ऽन्यविशेष्यकाभेदसंसर्गकचंद्रिकाप्रकारकमानसबोधत एव संभवात् अपशाब्दस्यैव तादृशाभेदज्ञा
नस्य तत्समर्थकत्वमिति चेत् तर्हि सो ऽन्यनिष्ठाभेदप्रतियोगिनी चंद्रिकेति बोधः शाब्द इति त्वदभिमतं
मिति चेत् भ्रांतभाषितमेवैतत् सो ऽन्यः प्रकारः अभेदः संसर्गः चंद्रिका च विशेष्यं ततश्च सो ऽन्याभिन्ना
चंद्रिकेत्येव शाब्दबोधः प्रतियोगित्वानुयोगित्वयोः पदार्थतत्संसर्गोभयभिन्नत्वेन शाब्दबोधाविष
यत्वात् न च समूहालंबनाद्विशिष्टज्ञानस्याभेदान्यथानुपपत्त्या संबंधसंबंधांगीकृतं मते तज्ज्ञानसंभवद्
तिवाच्यम् तन्मते विशेषणताप्रतियोगिकत्वविशेष्यानुयोगिकत्वे च संसर्गस्य भासत इत्येवांगीकारात्
तथा चैकस्मिन्नंशे तन्मतमनुसरन्नपरत्र च वैपरीत्यमाश्रयन्कथं नालज्जिष्ठाः वस्तुतो विशिष्टज्ञान
स्य समूहालंबनाद्भेदो ऽन्यथैव न तु संबंधसंबंधसंबंधभानेनेति सिद्धांतानुसारिणां नेयं शंकामवितुमर्ह

तीत्यन्यदेतत् तथाच सोऽजन्याभिन्नाचंद्रे इति शाब्दबोधे जाते तदुत्तरभाविना सोऽजन्यनिष्ठाभेदप्रतियो
गिनीचंद्रिकेति बोधे राज्ञिचंद्राभेदारोपः समर्थ्यत इत्यवश्यं वक्तव्यं तदपेक्षया तदुत्तरभाविना चंद्रिकाप्र
तियोगिकाभेद एव सोऽजन्यमिति बोधेनैव तत्समर्थ्यतामलमसादृष्टिकार्यकल्पनया भंग्यंतरेण ला
घवकल्पनया वेति अपि च बिंबप्रतिबिंबभावस्थलेऽभिन्नानां धर्माणां परस्पराभेदस्य शाब्दबोधविषय
त्वाभावेपि मानसाभेदारोपमात्रेण साधारण्यसंपत्त्योपमानुकूलत्वं तावदालंकारिकत्वावच्छेदे
नस्वीकृतम्॥ एवं तं जगत्यभजन्नत्यस्य वा चंद्रकलाधरमित्यादौ चंद्रमौलिमभजनराहित्यस्य साधा
रणधर्मस्य तं वायां शाब्दान्वयाभावेपि मानसतद्धीत्वज्ञानेन [illegible] साधारण्यमपि सर्वसंमतम्॥
अत्र तु शाब्दस्यैव सोऽजन्यचंद्रिकाभेदारोपस्य राज्ञिचंद्राभेदारोपसमर्थकत्वमिति दुराग्रहो नातीव मव
तो हि तद्धेतुः अपरराज्ञिचंद्राभेदारोपोपपादकः सोऽजन्यचंद्रिकाप्रतियोगिकाभेद एव साक्षादुच्यता
मलं तदारोपकचंद्रिकाविशेष्यकसोऽजन्याभेदारोपेणेति चेत् सत्यं वाक्ये तथैव प्रयोगात् समासे तु
एवं निपातनियमवशाद् इन्द्रमुखमिति प्रयोगानसंभवतीत्यत्र किंक्रमः अन्यथा वाक्य इव चंद्रप्रतियो

ज्जिकामेदवन्तु खमिति बोधजनकमुखचंद्र इति समासेपि कथं न प्रयोग इति प्रतिप्रश्नेन तत्रापि क्लि
ष्टत्वमिति दिक्॥ अथैकदेशवृत्तिकं वदंति॥ यावाक्यार्थविषये वाक्यार्थ्यामतारोपविषये वाक्यार्थरूपकं
यथा विशिष्टोपमायां विशेषणानामुपमानोपमेयभावोपगमस्तथात्रापि वाक्यार्थघटकपदार्थानां रू
पकमर्थगम्यम्। तद्यथा। आत्मनोस्य तपोदानैर्निर्मलीकरणं हियत् क्षालनं भास्करस्येदं सरसैः सलि
लोत्करैः। न चयोरिवादिशब्दप्रयोगे उपमानोपमेयभावस्तयोरेकत्रारोपे रूपकमिति नियमादिदं रू
पकमिति वाच्यम्। अत्रापीवादिशब्दप्रयोगे उपमासंभवात्। त्वयि कोपो महीपाले सुधांशाविव पावकः। इ
त्यत्रोपमावत्त्वयि कोपो महीपाले सुधांशौ हव्यवाहन इत्यत्र रूपकस्यापि स्वीकर्तुमुचितत्वात्। न चात्र व्य
ज्यमानोत्प्रेक्षेति वाच्यम्। अस्येदमिति निश्चयात्। उत्प्रेक्षायां च निश्चयायोगात्। अन्यथा मुखं चंद्र इत्यत्रापि तदा
पत्त्या रूपकविलयप्रसंगादिति॥ प्राचीनास्त्वीदृशस्थले निदर्शनामेव स्वीकुर्वंति न तु रूपकं। तथा च सर्व
स्वकारादयः। त्वत्पादनखरत्नानां यदलक्तकमार्जनं। इदं श्रीखंडलेपेन पांडुरीकरणं विधोरिति निदर्श
नामुदाहरंतः। अत्राप्याक्षिपंति। यद्यत्राप्यभेदारोपश्रोतमपि रूपकसाधकमनादृत्य निदर्शनेत्व

नेतर्हि मुखं चंद्र इत्यादावपि निदर्शनैव स्यात् क्रियतामस्तु रूपकेण किं वद्दयं पदार्थनिदर्शना वाक्यार्थनिद-
र्शना वा नाद्यः विशिष्टार्थयोरेवाभेदप्रतीतेः धर्म्यंतरे पदार्थतत्सदृशधर्म्यंतरे पदधर्मस्यारोपविरहा-
च्च त्वेत्रत्र पुंगलं धत्ते लीलां नीलांबुजन्मनो इत्यादिवत् न द्वितीयः वाक्यार्थरूपकोदाहरणादेः न चेष्टापत्तिः
वाक्यार्थनिदर्शनोदाहरणीष्टापत्तेः कर्तुं शक्यतया विनिगमनाविरहात् त्वेत्याह नेत्याह नानियोरंजयति याव-
केः इंदुं चंदनलेपेन यो पांडुरीकुरुते हि सदृतिनिर्मांगो वाक्यार्थनिदर्शनाविषयस्त्वोक्त न च रूपके बिंबप्रति-
बिंबभावो नास्तीति वाच्यम् मानाभावात् कंदर्पद्विपकर्णकंबुमलिनैर्दानांबुभिर्लांछितं संलग्नांजनपुं-
जकालिमकलं गंडोपधानं रतेः व्योमानोकहपुष्पगुच्छमलिनैः संछाद्यमानोदरं पश्यैतच्छशिनः सुधा-
सद्वरं बिंबं कलंकांकितमित्युदाहरणे जलादिकलंकादीनां बिंबप्रतिबिंबभावस्वीकारादिति अत्रेदं प्रति-
भाति उपमेयतावच्छेदकपुरस्कारेणोपमेये शब्दान्निश्चीयमानमुपमानतादात्म्यं रूपकमिति लक्षणं
तावदुपवर्ततेवौ कं तत्रोपमानोपमेययोर्वाभेदगर्भ एवावश्यं वाच्यः अन्यथा चंद्रश्चंद्र इत्यादेरपि रूपकता-
पत्तेः तथा चात्मनोस्य तयोरादाने रितिश्लोके निर्मलीकरणाक्षालनयोरभेदारोपेन रूपकं भवितुमर्हतीति न

योर्भेदाभावात् मलशैवदृष्टान्तासिद्धेर्न शैवमात्रे क्षालनपदशक्तेः न च तयोरानन्त्यस्य सलिलजन्यस्य
वशैवलस्य भेद एवेति वाच्यं विशेष्याभेदे विशिष्टभेदस्य विशेषणाभेद एव पर्यवसानात् उपमानतावच्छेदक
धर्मस्योपमेयतावच्छेदकधर्माभेदस्य च रूपकौपयिकत्वात् किंच तत्त्वे पादनखरत्नानामित्यत्रापि न रूपकसं
भवः तथाहि नखानां खलत एव नैर्मल्यादिगुणयोगान्नत्र यावकसंबंधो निरर्थक इत्याशयस्तात्पर्यम् न चाल
क्तककरणकत्वन्नखकर्मकमार्जनं चंदनकरणकचंद्रकर्मकपांडुरीकरणाभिन्नमिति बोधेन नसिद्धेति मार्ज
नस्य निषेधप्रतियोगितयाविवक्षितत्वेऽपि न तस्योपमेयत्वासंभवाच्च एतादृशाभेदारोपस्य सादृश्यामूल
कतयालंकारकत्वाभावाच्च यत्किंचिद्धर्मघटितसादृश्यस्यालंकारतायामप्रयोजकत्वाच्च तस्मादनन्यतासं
वंध संबंधे यावकाभावो नखशोभायां प्रतिपाद्यः तथा तेनैव संबंधेन श्रीखंडलेपाभावश्चंद्रनिष्ठपांडुरतायां ते
न च निदर्शनायां सर्वत्राभेदप्रतियोग्यनुयोगिनोर्वाक्यार्थप्रसिद्धत्वनियमस्य योर्मध्ये ऽभेदप्रतियो
गिनोर्वाक्यार्थस्याप्रसिद्धत्वनियम एव रूपके तु न तथा यत्र यथा यदा तु सौम्यतासेयं पूर्वोदितोरकलंकता॥
क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं सोयं कुरंगैः कचग्रहैः कै

अ॰ कौ॰
७१

सरित्ताः मेघैः करपातैः कालसर्पस्य वत्सकैर्वैदीग्रहो व्याघ्रस्य अलंगरैर्गलाक्षेपो गरुडस्य दाहः स्मिर्दीह्रादेशो
दहनस्य तिमिरैस्तिरस्कारो रवेः यो मे खद्योतानां मालिवैः परिभव इत्यादौ च नन्वत्र नायं नियमः प्रदीपज्वालो मिश्रि
व सकरनीराजनविधिः सुधासूते सुव्रीपल्लजल्ललवैरर्घघटना स्वकीयैरंभोभिः सलिलनिधि सोऽहि त्वकर
रोत्वदीयाभिर्वाग्भिः स्तवजननि वाचां स्तुतिरियं॥ वियोगेऽङ्गनारीनां योगेऽस्तलेपाङ्गिमा अहस्यतं सरवजू
दीमंजरीगर्भरेणुः॥ इत्यादौ चैतदभावादितिचेत् किं ततः न ह्यत्र भेदारोपमात्रेणास्य रूपकालंकारत्वं निर्वह
तीत्युक्तत्वात् अन्यथा घटः पट इत्यादेरपि तत्त्वापत्तेः अपतत्वाप्यहृद्ये नापि धर्मेणात्र भेदारोपः कथमिति
चेत् न हि वयं तत्राभेदारोपो न संभवतीति ब्रूमः अपितु तस्यालंकारत्वाभावमात्रमिति दोषाभावात् त
नन्वत्राभेदारोपमात्रस्य चमत्कारजनकत्वाभावात् किंचिद्वैधर्म्यमाश्रयपर्यवसाने कश्चिदन्यथैत्यन्यदेतत्
तत स्वपाण्डुनरवमार्जने पाण्डुरीकरणाभेदारोपस्य नखोत्कर्षपर्यवसानस्य त्वाभेदस्यालंकारत्वमुचितं कि
चत्वत्पादनखरत्नानि यो रंजयति यावकैरितिपाठेऽपि कथं न रूपकं कर्त्रोरभेदस्य तत्रापि प्रतीतेः यत्तु क्रियये
रभेदस्य शाब्दत्वात्तस्यैव सर्वभरसहिष्णुत्वात् निर्दिष्टी नैवेति तदसत् कर्त्रोरभेदे न रूपकत्वापत्तेः रपरिह

रामः
७१

रात् यद्यपि मुखं चन्द्र इत्यादौ श्रौताभेदारोपस्य रूपकजीवातुत्वस्योक्तत्वादिहापि तथा अभेदारोपस्य
निदर्शनायां जीवातुत्वेन संभवति। इदं शोभां वहत्यास्यमिति निदर्शनायामभेदारोपाभावादिति न वाच्यं
७२ ते अभेदारोपमात्रस्य रूपककल्पकत्वाभावाभावात् कथमन्यथा सादृश्यामूलकस्यापि कार्यकारण्या
दीनां कल्पितस्य ताद्रूप्यस्य रूपकत्वाभ्युपगमे तदमूलकानां सरत्यादीनामपि रूपकत्वापत्तिरिति रूपकद
घरांसंबंधांतरउक्ततादात्म्यविवक्षायामपि रूपकमिति रत्नाकरमधिकृत्य स्वयमेवाभ्यधायि किंच रूपक
त्वावच्छेदेन श्रौताभेदरूपजीव्यः अभेदस्य विशेष्यतायां तदभावात् तथा च भवदीयमेवोदाहरणं केशोरव
यसि केमस्तातनुतामायाति तस्याः स्तनाभोगाभिन्यविलेश्वरे रतिपतौ गन्धेभमन्वीचति आसिद्धूर्गोशशां
कतानयनयोः सादात्म्यमम्भोरुहां किं वासीदम्रतस्य मे दृढिगमः साधिकमिति तात्विकः। अवांतरधर्मावच्छे
देन तदुपजीवकत्वं तु निदर्शनायामपि समानं अथाभेदारोपपदेनाभेदसंसर्गकाभेदविशेष्यकोभयारो
पसंग्रहाद्रूपकत्वावच्छेदेन तदुपजीवकत्वमस्तमिति चेत् तथापि निदर्शनात्वसामानाधिकरण्येन रूपक

र.कौ.
७२
७२

त्वावच्छेदेन चाभेदारोपोपजीवकत्वमिति विशेषस्यात्र प्रयोजकत्वात् मुखं चन्द्रतादात्म्यवदित्यादौ च तदभावात्
अभेदविषयकारोपत्वेन तदनुगमयितुमसाधारणधर्मविषयकारोपोपजीवकत्वं निदर्शनात्वावच्छेदेना-
स्तीत्यप्यनुगमनस्य कर्तुमशक्यत्वात् यद्यपि निदर्शनायां तादृशपदार्थयोः परस्पराभेदभानं शरीरं रूपकस्य
रूपमेयगतउपमानाभेद इति तन्मुखं तथापि त्वन्मते विशिष्टवाक्यार्थरूपके तद्घटकपदार्थानामभेदस्या-
भिगम्यतयात्र रूपकत्वानापत्तेः तत्राभेदस्य मानसगम्यतया परस्परप्रतियोगिकत्वेन च विषयीकरणे बाध-
काभावात् मुखं चन्द्र इत्यादौ तु शाब्दबोधस्योत्पत्तिनियंत्रितत्वेनोपमानप्रतियोगिक एवाभेदो विषय इत्युक्तं
तत्र तु परस्पराभेदावगाहने न किंचिदस्ति बाधकं नाप्युपमानप्रतियोगिकाभेदभानं रूपकनियतं मुखं चं-
द्र इत्यादिसमासस्थले तदभावात् न च तत्रापि मुखनिष्ठाभेद एव संसर्ग इति वाच्यं तस्य प्रथममेव निरस्तत्वात्
किंच शाब्दबोधे चन्द्रप्रतियोगिकाभेदावगाहनेऽपि मानसगम्यपरस्पराभेदमादायतत्रापि रूपकत्वं न स्यात् नहि
शाब्द एवाभेदबोधोऽलंकारत्वप्रयोजक इति शक्यते वक्तुम् निदर्शनास्थलेऽप्यार्थाभेदबोधस्यालंकारत्वप्रयोज-
कतायास्त्वयैव स्वीकारात् एवं च मानसाभेदबोधस्योभयत्रैव सम्भवान्निर्णायकदर्शना रूपकं वेति दुःप्रतिक्ष

राम: ७२

रर्थश्लेषः स्यात् तस्मात्त्वन्यादन्यत्रत्ता नाभिन्नादेति निदर्शनैवेति वाक्यार्थरूपकं निरूढमिति दि
क् ॥ इत्यलंकारकौस्तुभे रूपकनिरूपणम् ॥ अपह्नुतिं लक्षयति प्रकृतं निषिध्याभिन्नात्मतया प्रोक्ता
त्वपह्नुतिः कथिता यत्र प्रकृतमुपमेयं कथंचिद्धेतोर्यत्तो वा निषिध्य तत्सदृशाप्रकृतार्थताद्रूप्येण वर्ण्य
का॰ ४ ते साऽपह्नुतिरित्यर्थः रूपयति आनिवारणाय निषिध्यते तत्र तु मुखचन्द्रताद्रूप्यवर्णनेपि नैकरवनि
षेध एवं रूपकं तद्भिन्नमिति न दोषः अत्र केचित् सादृश्यमूलैवापह्नुतिः न पुनः स्मरणास्य सदृशं परि
रागपत इत्यादौ तु नापह्नुतिः किंतु प्रस्तुतस्य पदस्य त्वमित्येवं रूपातिशयोक्तिरित्याहुः ॥ अन्ये तु गोपनी
यं केनाप्यर्थं कथयित्वा कथंचन यदि श्लेषेणान्यथा वा प्रापयेत्सा त्वपह्नुतिरिति साहित्यदर्पणोक्तरी
त्या किंचिदपह्नुत्य कस्यचिद्दूरीकरणमपह्नुतिः केसेसुवलामोडि अतेरासमरम्मि जअसिरी गहिआ ॥
जह कंधराहि विहुरा तस्साहिं ठं कंठं अमिहसंठविआ इत्यत्र सादृश्याभावेपि नपलाप्यगतास्तीति चोऽ
पित्ततः परामर्शं संभाव्य केदराफवतान्नत्यजंतीत्यपह्नुतिर्ध्वनत इति काव्यप्रकाशकारेणातरप्युपगमा

द्वित्याद्युः ॥ तद्रुक्षाक्षेप्रकृतनिषेधे यथा मम ॥ नेयं मेघघटा परं तु विरहोद्दामाग्निधूमावलीनभ्य
हि सकंठिकावलिरसौ वंधलक्षणपाथालनं ॥ नेतानि स्तनितानि किं तु मदनस्याध्मानिर्घर्षणाः केतक्या
न रजांसि दग्धपथिकप्राणीयमस्मानि तु ॥ इह प्रकृतान्मेघघटादीन् निषिध्य धूमादि रेव तत्स्याने भि
षिक्तः ॥ व्याक्षिके यथा ॥ विनिद्रुद्ध्यालिगतालिकैतवान्मेगांकदूरमलिकावर्जनाविश्लितं द्रुधानमा
शास्त्रवरिस्फुरद्युर्थशः स कौतुकीतर ददर्शी कैतकेम ॥ अत्र हि भ्रमरव्याजत्वोक्त्या नैते भ्रमराः किं तु दुर्य
शा इति भ्रमरनिषेधप्रतीतिरर्थात् नहि भ्रमराणां सत्यत्वे विवक्षायां कैतवत्वोक्तिर्घटते ॥ सावयवाय
था मम ॥ नेन्दुः कुंजितमल्लिकामुकुकुलं किं तूर्जितं गर्जितं नैवाजिह्मगराजिराजिवरनै किं तु रुग्धारात
तिः ॥ नेयं साधकुंजरेनस्तुतिपदसोराश्मिनी किं त्वसौ नायं वीरकुलाग्रणीरुद्रयते किं त्वेष आराधय[:] ॥
अथापह्नवांतराणां वीरापह्नवान्तर्माहकवीसावयवत्वं केचिदपह्नुतेरन्तर्गृहीतस्यापह्नवस्यापह्नवां
तरान्तर्माहकत्वं यथा क्षिप्तं नैवलिकिंतु प्रकृतिरमणीयं विकसितं मुखं त्वं फुल्ले मूठः रकुसमभिरं मन्यते

रिमलं स्तनद्वन्द्वं मिथ्याकनककनिभमेतत्कलयुगं लतासेयं रम्या भ्रमरकुलनम्यानरमणी ॥ अत्र स्मिता
पह्नवो मुखवापह्नवान्न्यग्राहकः मुखं स्तनापह्नवो तु नायिकापह्नवे ग्राहकाविति त्यभिप्रायः सावयवापह्नुता ॥ उदा
हरणमवसेयः ॥ मालापह्नुतिर्यथा ॥ क्वापि श्रीरुन्निद्रे द्युतिलोके विरहेपि प्रोन्मुक्तवक्त्रे दघल्लोके गापी दुर्गजघन्ये
र्थे विरहेपि प्राले यरश्मिद्युलोते कंसापि स्मरवैरिदेहमिषतः कंसापि शेषद्युलोडेलोकं हिमनुल्यकीर्तिर
इति श्रीवाग्भटालंकारभोजः ॥ इह बहूनिषिद्धैकस्यारोपः एकनिषिद्धे बहूनामारोपो यथा ॥ नारीणामनुरञ्जना
र्थं नयनानां वा सङ्गमस्यास्य गान्धर्वं रागमवधीरयाय करणव्यापारितः पातवान् कामानामनपूरणात्स्य
रतेः भीतान्ते संजीवनाः प्रायाणां धारितां यं विभ्रमं निर्भवतः पञ्चाङ्गुलीव्याजतः ॥ अत्र वागजं वेद्गुलिनिषेध
पूर्वकं तत्र कामबाणाद्यभेदारोपः ॥ यत्तु अन्यत्र तत्स्यारोपार्थपर्यस्तापह्नुतिः सा नायं सुधांशुः किं तर्हि
सुधांशुः प्रेयसीमुखमिति अत्राहुः प्रकृतं यन्निषिद्धान्यत्साध्यते सात्वपह्नुतिरित्यपह्नुतिसामान्यलक्षणा
नाक्रान्तत्वाच्चायमपह्नुतिभेदः किं तु पर्यायोपमानतान्वेदकयोः सामानाधिकरण्यस्यभासमानत्वद्रूपकमे

ही. को.
७४
74

वदनारोपमेतत् न विंबं विषमित्याहुर्ब्रं शसंवि विषम् च्यते इत्यादौ तदंगीकारादित्याहुः यत्तु कविनिषेधपूर्वकआ
रोपः कविनारोपपूर्वको निषेध इति भेदवर्णनं तत्र चमत्कारविशेषानुपलंभादिहोपेक्षितं ॥ अपह्नुतिध्वनिर्यथा
मम॥ त्वत्प्रत्यनीकनरनायकनायिकानां हृद्दि वियोगदहनज्वरदह्यमानैः प्राणावसाननिमिलिते इति किं विरहं
शधीयूषमिंदुमबुधाः सकलंकमाहुः॥ अत्र नायं कलंकः किंतु तन्मनोयोगदग्धपीयूषच्छिद्रमिति प्रतीतिः वि
चमीमांसायां तु त्वद्दालेख्यकौतूहलतरलतन्वीविरचितेविलिख्यैकावकेविलिखितिसुपर्णासुतमपि अपि
लिख्यत्याशिशिल्पिरितमपमन्येतदपराकरेयोध्यायंमकरमपरिष्कृत्रलिखति॥ अत्र नायं साधारणः प्रस
षः किंतु नायकस्य शाट्यमिति वचनादिलिखनेन व्यज्यते अन्यथा तु तस्यापि तादृशरूपविरहेणानायं नायकशाः किंतु
कापह्नुतियोग्यतायलिखनेन व्यंजितमित्युदाहृतं रसगंगाधरकृता तत्र उपमेयनिषेध उपमानारोपश्चे
त्यपह्नुतेर्भागद्वयं तत्र वचनादिलिखनेन पुंडरीकारोपमित्यारोपभाग एव व्यंजयितुं शक्यते न तु नायं
साधारणः कामी पुरुष इत्युपमेयनिषेधभागोऽपि वचनादिलिखनस्य पुंडरीकारोपमात्रव्यंजकतया निषे

राम:
७४

ध्वनिव्यंजने सामर्थ्याभावात् न च पुरुषमादात्म्यनिषेधं विना नारायणतादात्म्यारोपानुपपत्त्या निषेधोपि
व्यज्यत इति वाच्यम् मुखं चन्द्र इत्यादावपि मुखत्वनिषेधमंतरेण चंद्राभेदारोपानुपपत्त्या तत्र मुखत्वनिषे
धाभ्युपगमे रूपकोच्छेदप्रसंगात् न च तत्र मुखत्वसामानाधिकरण्येन चंद्राभेदानुभवान्न मुखत्वनिषेध इ
ति वाच्यम् अत्रापि साधारणपुरुषत्वसामानाधिकरण्येन पुंडरीकाक्षतादात्म्यारोपसंभवात् रूपकध्वनि
त्वस्यैव स्वीकर्तुमुचितत्वात् न च पुरुषोहमित्यस्यापह्नुतिः तथापि च काहं दूरीकरणेन नायं पुंडरीकाक्ष इति
निषेधस्य पुरुष्यवाचकत्वेन नायं काम इत्यारोपस्य च व्यंजयितुं शक्यतयोत्तरार्द्धे त्वपह्नुतिध्वनिरस्ती
ति वाच्यम् पुंडरीकाक्षस्य वर्ण्यत्वाभावेन तन्निषेधस्यापह्नुत्यघटकत्वात् प्रकृतपदस्यारोपविषय
परतायास्त्वयैव व्याख्यानात् प्रसक्तयत्किंचिद्वस्तुनिषेधसामानाधिकरण्येन क्रियमाणावस्त्वे तदारो
पत्वमेवापह्नुतित्वमिति लक्षणाकरणात् युक्तमेवापह्नुतिध्वनित्वमित्याहुः यत्कृतस्तु मुखं चन्द्र इत्यादौ मु
खत्वं धर्मितावच्छेदकीकृत्य चंद्रतादात्म्यारोपस्यानुभवसाक्षिकत्वादभ्युपगमे प्रकृते पुंडरीकाक्षभेद

व्याप्यत्वकल्पनमात्रस्य साधारणगुणरूपधर्मस्य चत्वचकादिभिरपसारणे साधारणगुणरूपनिषेधमंतरेणापुं-
डरीकाक्षतादात्म्यस्य व्यंजयितुमशक्यत्वात्तन्निषेध आवश्यक इति दीक्षिताशयः॥ साहित्यदर्पणकारास्तु
अयं निषिद्धप्रकृतस्यापनयेन निश्चयः पुनः आरोप्यमाणं निषिद्ध प्रकृतस्योपमेयस्य स्थापनेन निश्चयालंका-
रः॥ यथा वदनमिदं न सरोजं नयने नेन्दीवरे एते इह सविधे मुग्धदृशो मधुकर न मुधा परिभ्राम्य॥ यथा वा
हृद्वि विसलताहारो नायं भुजंगमनायकः कुवलयदलश्रेणी कंठे न सा गरलद्युतिः मलयजरजो नेदं भस्म
प्रियारहिते मयि प्रहर न हरभ्रांत्यानंग क्रुधा किमु धावसि॥ नन्वयं निश्चयांतः संदेहः तत्र संशयनिश्च-
ययोः सामानाधिकरण्यात् इह तु भ्रमरादेर्भ्रांतिर्नायिकादेर्निश्चय इति वैयधिकरण्यात् अपाक पं चिदेव
संशयनिश्चययोः सामानाधिकरण्यं विवक्षितं तथा च भ्रमरनिष्ठसंशयज्ञानाज्ञायकेऽपि संशयोऽस्त्येव
ज्ञानज्ञानस्याबाधकं विना तद्विषयविषयकत्वनियमादिति चेन्न तथापि नात्र भ्रमरादेरपि संदेहः समको-
टिकज्ञानस्यैव संशयत्वात् अयं च तथात्वे मुखसमीपगमनानुपपत्तेः तर्हि भ्रांतिमानेवास्त्विति वाच्।

भ्रमरादेर्भ्रान्तिसत्त्वेपि इह चमत्कारानाधायकतयाऽनलंकारत्वात् भ्रमरभ्रान्तेरविवक्षायामपि न
यिकाप्रतीत्यर्थं मयैतादृशोक्तिसंभवाच्च न च रूपकध्वनिः मुखस्य कमलत्वेनानिर्धारणात् ना
प्यपह्नुतिः प्रस्तुतस्य निषेधाभावात् अतः एवगेवा चिरंतनैर्नालंकारस्य इत्याहुः॥ जय
देवस्तु भ्रान्तापह्नुतिरन्यस्य शंकायां भ्रान्तिवारणे। तापं करोति सोत्कंपं ज्वरः किं न सखि स्मर इ
तत्त्वोक्त्या भ्रान्तिवारणोक्तेर्भ्रान्तापह्नुतिरित्याह॥ दीक्षिता अपि संभवन्तीं भ्रान्तिपूर्विकायामपह्नुता
विरहकृशहृदयां कल्पितभ्रान्तिपूर्विकां यान्तु नयनेयं वेशीकृतकचकलापा नगरलंगगलेक
स्तूरीयं शिरसि शशिरेखा न कुसुमं इयं भूतिर्नाङ्गे प्रियविरहजन्मा धवलिमा पुरारातिभ्रा
न्त्या कुसुमशर किं मां प्रहरसि॥ अत्र कल्पितभ्रान्तिर्नयनेयमित्यादिनिषेधमात्रेण ज्ञेया पूर्वव
त्प्रश्नाभावादित्याहुः॥ इत्यपह्नुतिः॥ श्लेषमाह उभयविशेष्यान्वितयोरेकेन प्रोक्तिरर्थयोः श्ले
षः॥ उभयपदमेकभिन्नपरं॥ तत्र द्वयोरपि विशेष्ययोः प्रकृतत्वे यथा गते कुसैन्ये कुसुशर्म

अ.को.
७६
76

हृतोःसलब्धसिद्धिः स्तनयोर्नरक्षोः हरेस्तनूजः प्रतियन्नकालं नृपप्रियान्वेषणातत्परोऽभूत्॥ अत्र हृत
मदङ्गनयोहरभयोरप्युभयकथायां प्रकृतत्वं॥ यथा वा॥ देवः पतिर्विदुषि नैषधराजगत्या निर्णीय
ते न किमु न व्रियते भवत्या॥ नायं नलः खलु तवातिमहान् लाभो यद्येनमुज्झसि वरः कतरः
ल५ परस्ते॥ अत्रैव द्वादीनांऽनेकस्य च प्रकृतत्वं॥ यथा वा॥ हिमकृतकं चन्द्रकलं शिरः स यत्न कोमलदयामृत नाक्ष
नितमीनकेतनः॥ अभवत्प्रसाधितसुरो महोत्सवः प्रमदाजनस्य स चिराय माधवः॥ अत्र भ
गवतो वसंतादेश्च प्रकृतत्वात्प्रकृतत्वे अयं च श्लेषो द्विधा सभंगोऽभंगश्च॥ भिन्नानुपूर्वीक
शब्दप्रतिसंधानबोध्यानार्थकत्वं सभंगत्वं समानानुपूर्वीकशब्दप्रतिसंधानबोध्यानार्थ
कत्वमभंगत्वं॥ आद्यश्चाष्टधा वर्णपदलिंगभाषाप्रकृतिप्रत्ययविभक्तिवचनभेदात्॥
तत्र वर्णश्लेषो यथा॥ प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता॥ अवलंब
नाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि॥ अत्र विधिविधुशब्दयोर्विभावितिस

रामः
७६

प्रातिपदिकारोकारयोः श्लेषः॥ पदश्लेषो यथा॥ संनद्धे भगदत्तशंखनिनदत्रस्यत्त्रिलोकोल्लेप्रोन्नाम्यत्क
रिकुंभकर्णाहतनाग्राप्रधकोलाहले तीक्ष्णाग्रोरापतद्विपीतरुधिरप्राग्भारघोरोद्यमं प्रावर्ति
छरिवेतिथीकृतमहायोधं महायोधनम्॥ अत्र रामायणपक्षे संनद्धे इभगाहस्याऽरोहा
स्तैर्दैतेयः शंखनिनद इति भारतपक्षे तु संनद्धे इति वलविशेषणं भगदत्तो राजविशेषो भारत
प्रसिद्धस्त्वं खेत्यादिपदानां श्लेषः॥ लिंगश्लेषो यथा मम॥ उन्निद्राब्जपरिस्फुरत्प्रवरदोः प्रह्वी
भवद्दैवतश्रेणीमौलितटावघट्टितमणिज्योत्स्नासमुल्लासिपात्॥ उन्मीलद्घनसारसंहतिहृकू स८
कृस्मारविंदाभहृद्रूपं केटभमोदिनो मदनजिह्माचंडिकावावतु॥ अत्र दोरित्यादिरूपं क्लीबस्त्री
पुंलिंगेषु समानं लिंगमपि प्रातिपदिकार्थ इति पक्षे दोरनुकं माया श्लेषो यथा ममैव॥ कं
वाहराविद्रूरेकांमंमेसुरहितारेद्र सरसाविदुरेहालीकरशेसविदुद्रासहसा॥ अत्र संस्कृ
तपक्षे इति लक्ष्मीसंबुद्धिः अंबेति तद्विशेषणं सुरासांहिते विषये अरे शीघ्र इत्यपि तथा॥ क्ली

अ.को
७७
77

वेशीमायसत्वेष्या त्रिविधा मेयगामि यदित्यमरादरणादस्याशेषश्च वत्परस्य स्त्रीत्वं अविदूरे सन्निहि
तमेव मम काममभिलाषमाहर संपादयेत्यर्थः विदुराणां पंडितानां मीहा लीइच्छा परंपरा तत्कर
रोसरसास प्रीतिः॥ सुष्ठु विदंतत्वस्वरूपं जानंतीति तत्त्वस्वरूपसुविदस्तानुद्धरति संसारादिति तथा दूरं चल
मित्यस्याविशेषणं प्राकृतपक्षे तु कस्याविद्विराहिणाइ यमुक्तिः॥ नाम्नाधरा विदूरे काममेसुरमिस्सार
यति सरसापि हृिरेफालीकरणोप्यपि दुर्द्धरास हसा॥ ताडयति वर्द्धयति सरसासशरा स्वा उद्दीपकत्वेन
अमरशब्दानां क्षोतुमशक्यत्वादित्यर्थः॥ प्रकृति श्लेषो यथा ममैव॥ गारयति वल्लयादीनिंद्रिया
णां स्वस्वर्वान्द्रवयति हि मरणमिं जीवितनाशं च सद्यः॥ नयनमपि मुहूर्तं वर्षयत्यं जस्रायं दृषि
ततमवियोगः स्मरपंके हृहाख्याः॥ अन्नग्गुरुत्वं करोति गरवत्करोतीत्यर्थः हृदये पि जरयतीति द्र
ववत्करोति द्रवयतीत्यर्थः हृदये च द्रवयतीति वृष्टिवत्करोति वर्षवत्करोतीत्यर्थः हृदये च वर्षयतीति
रूपं समानं॥ प्रत्ययश्लेषो यथा ममैव॥ मानभारमवलव्यपुरा यागंविभि निविडिता किल

राम:
७७

तस्यो॥ जयसीक्ष्ण राघवं गतमात्रसोल्लासमरविन्दिनीविरहं च॥ अत्र लिङ्गि प्रथमपुरुषबोद्धमपुरु
षैकवचनयोस्तुल्यत्वाद्विविभक्तितुल्यं रूपं॥ विभक्तिश्लेषो यथा मम मेव॥ दशना मौक्तिकविशदा अध
रा विदिविंविसंकाशौ॥ तन्वि तव कासति वदने तव नासा वंशसोदर्या॥ अत्र वकासतीति तिङि वहुव
चनांतं शतृप्रत्ययसप्तम्येकवचने च तुल्यं रूपं॥ वचनश्लेषो यथा॥ अपि लोकयुगं दृशावपि श्रुत
दृष्टा रमणीगुणा अपि॥ श्रुतिगामितया दमस्व सुध्येति मा ते स्तवरोधरायते॥ अत्र व्यति मा ते इ
ति वचनत्रयेपि तुल्यं अत्राष्टानां मध्ये यस्य यस्य यत्रांतर्भावः संभवति तत्र तत्र तद्भिन्नत्वं विवक्षणीयम् अ
तो न दोष इति ध्येयं अमीषामष्टविधानां वेदकः द्विविधोप्ययं श्लेषोर्थालंकार एव अर्थांतरस्य वाक्यार्थ
तन्त्वेन नानार्थकपदसत्वेपि श्लेषव्यवहारस्थिरत्वात्॥ तथा हि स्फुरितादिग्गजमेदेन मिश्रानां शब्दानां
मित्रप्रयत्नोच्चारणयोग्यत्वेपि श्लेषोपपत्तये स्वरभेदमवधूयैकप्रयत्नोच्चारणशब्दश्लेषः यथा॥

श्री·कौ·
७२
74

एषु कार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव विलसत्करेणुगहनं संप्रतिसममावयोः सदनं इत्यादौ
समासभेदेन स्वरभेदयुतद्वंद्वेन शब्दभेदावश्यकत्वात् तत्र जतुकाष्ठन्यायेन शब्दयोरश्लिष्टत्वात्॥
यत्र तु स्वरभेदो नास्ति तत्रैकप्रयत्नोच्चार्यत्वेपि न शब्दभेदाभावादर्थश्लेषः॥ एकवृंतगतफलद्वयेना
र्थयोरेवाश्लिष्टत्वादिति सर्वस्वकारादयः काव्यप्रकाशकारस्तु दोषगुणालंकाराणां शब्दार्थवृत्तित्वं
तावदन्वयव्यतिरेकगम्यं शब्दानां परिवृत्त्यसहत्वे शब्दवृत्तित्वं तत्सहत्वे चार्थवृत्तित्वं कष्टत्वादिदोषा
गाढत्वादिगुणा अनुप्रासाद्यलंकाराश्च शब्दनिष्ठाः तादृशानुपूर्वीकशब्दोपादानादेव तदवभासात्
व्यर्थत्वादिदोषाः प्रौढ्यादि दोषा गुणा उपमाद्यलंकाराश्चार्थनिष्ठाः तदर्थकशब्दांतरोपादानेपि तदवभा व१
सात॥ व्यर्थत्वादिदोषाः प्रौढ्यादिगुणा उपमाद्यलंकाराश्चार्थनिष्ठाः तदर्थकशब्दांतरोपादानेपि यथोभया
नुगतार्थप्रतीतिसंभवस्तत्र तद्विषयत्वात् यथा स्तोके नोन्नतिमायाति स्तोके नायात्यधोगतिं अहो सुस
दृशी वृत्तिस्तुलाकोटेः खलस्य च॥ इत्यादौ अत्राल्पेनोन्नतिमायातीत्यादिप्रयोगेपि श्लेषनिर्वाहात्॥ किंच

राम:
७२

शब्दश्लेषोऽर्थालंकार इति परस्य ब्याहतं श्लेषस्य शब्दानाश्रितत्वे शब्दश्लेष इति व्यपदेशानौचित्यात्॥ तथात्वे
चार्थालंकारानौचित्यात् तथात्वे चार्था कविसंरंभगोचरस्यैव वैचित्र्यास्पदत्वेनालंकारत्वात्॥ प्रकृते च शब्द
एव कवेस्तात्पर्यविश्रमात् यत्त्वर्थमुखप्रेक्षित्वं शब्दानामिति॥ तन्न॥ एवं सत्यनुप्रासादीनामपि अर्थालंका
रत्वापत्तेः रसादिव्यंजकवाच्यार्थापेक्षत्वेनैवानुप्रासादेरलंकारत्वात्॥ एवं सति शब्दत्वाभिमतगुणदोषा
दीनामपि अर्थत्वापत्तेश्च॥ अर्थापेक्षयैव तथात्वात्॥ यदप्येकप्रयत्नोच्चार्यत्वं धर्म्यः श्लेषत्वमिति॥ तदपि न
विद्यावित्यादिवर्णश्लेषस्याप्यर्थश्लेषत्वापत्तेरित्याह॥ इदं वा ऽविचार्यम्॥ अयं श्लेषस्तावदलंकारान्तर
स्य विषये निविशमानो दृश्यते॥ यथा सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिंबमिवेत्यत्रोपमायाः॥ सद्वंशमु
क्तामणिरित्यत्र रूपकस्य॥ नाल्पः कविरिव स्वल्पश्लोको देव महान् भवानिति व्यतिरेकस्य॥ अनुरागवती स
न्ध्या दिवसस्तत्पुरःसरः अहो दैवगतिश्चित्रा तथापि न समागमः इति समासोक्तेः॥ आदाय चापमचलं कृत्वा
हीनं गुणं विषमदृष्टिः यश्चित्रमच्युतशरो लक्ष्यमभांक्षीन्नमस्तस्मै इति विरोधस्य॥ कवीनां संतापो भ्रम

मत्या ममितो दुर्गतिरिति यथाशांपवत्वे रसयत्विन तत्तु चमत्कृतमधिकं॥ यथा यांगां वेदानां च्यवरसिन्नवता वीरभवता हि विष
त्सेनालीनामद्भुतमपि लक्ष्यं यदद्भुतपाः॥ इत्यत्र मानस्येत्यादि॥ तत्र किं श्लेषस्तेषां वा धर्मकोवा छयोवा संकीर्णो वाइ
ति॥ अत्र केचित्॥ श्लेषस्यालंकारांतरनिर्मुक्तविषयाभावात् निरवकाशत्वेन सर्वालंकारापवादकत्वं यत्र हि
द्वयोरेवाप्रकृतत्वे प्रकृतत्वे वा तत्तुल्ययोगितायाएव संभवात्॥ न च देवत्वमेव यातालमाश्रानंत्वं निवंधने
त्वे वामरमरुद्भूतिलोकालोकत्रयात्मकः॥ इति विविक्तोस्य विषय इति वाच्यम् तत्रापि श्लेषस्यापितायां
रमेदारोपं विना लोकत्रयात्मकत्वस्यानुपपत्त्या रूपकसंभवात् अत एव विद्वन्मारनसेत्यादौ मनसिमा
नसत्वारोपे रासवहत्वस्य राजहंसत्वारोपे रागादहरत्वादेश्च प्रतीते रूपकस्वीकारः॥ अत्र तु राज्ञि पाता
लत्वादि रूपरोप्रयोजनाभावात्॥ श्लेष एव केवलस्तात्पर्यमिति निरस्तं॥ अत एव तत्र व्यंग्यत्वेपि रूपकस्य
वाच्यतदपेक्षयैव विविक्तविषयगवेषणादित्यपि न युक्तं नचैवं तत्र कथमनुपमारूपकादीनां प्रतीतिः तत्तत
त्तत्तेषामभावादिति वाच्यं॥ तेषां प्रतिभानमात्रस्वीकारात् श्वेत्येन शङ्करजतप्रतिपत्तिवत् वास्तवस्तत्र

श्लेषएव तस्मादीदृशस्य श्लेषस्याशेषालंकारबाधको युक्त इति । अन्ये त्वाहुः विषयांतराभावे
हि बाध्यबाधकभावो युक्तो न त्वत्र यावत्किंचित् श्लेषस्यालंकारांतरानिर्मुक्तविषयसत्वात् यथा येन ध्वस्तम
नोभवेन बलिजित्कायः पुरा स्त्रीकृतो यश्चोद्वृत्तभुजंगहारवलयो गंगां च योऽधारयत् यस्याहुः शशिम
च्छिरोहर इति स्तुत्यं च नामामराः पायात्स स्वयमंधकक्षयकरस्त्वां सर्वदो माधवः ॥ न ह्यत्रापि तुल्य
योगिता संभवति हरिहरयोरेकस्य प्राधान्यानभिसंधानात् एवं च विविक्तविषयसद्भावात्कथमस्यालं
कारांतरबाधकत्वमिति किंच विविक्तविषयासत्वादलंकारापवादकत्वमित्ययुक्तं ॥ विषयसद्भा
वमात्रेणोपपत्तौ विविक्तविषयापेक्षायां प्रमाणाभावात् ॥ लोके ह्यपरं ब्राह्मणानां निरवकाशतया तदाश्रयस्य
बलीयस्यालंकारत्वबाधापत्तेः ॥ मीमांसादावपि पदे जुहोतीत्यादिविहितराहुँ जुहोतीत्यादीनामाहवनीये
जुहोतीत्यादिविविक्तविषयाभावेपि सविषयत्वमात्रेणावस्थानात् ॥ प्रकृतशास्त्रेपि सहोक्त्यादीनामति
शयोक्त्यादिविविक्तविषयाभावेपि तदभावेनालंकारांतरत्वव्यवहारात् ॥ यदप्युक्तं उपमाप्रतिभोत्पत्तिः

श्रीकौ.
८.

श्लेषोयमिति तदपि न उपमाया एव श्लेषप्रतिभोत्पत्तिहेतुत्वात् नगरवरानिष्क्रमे इत्यादिशब्दप्रयोगाभावे
सकलं कलेति विशेषणादाने पि द्वितीयार्थप्रतिपत्तेरभावात् नन्वियं कथमुपमा सामान्यधर्माभावात् न च
सकलकलत्वमेव तथेति वाच्यं कलासाकल्यकोलाहलसाहित्ययोर्भेदादिति चेत् मैवं तयोरभेदाध्यवसाये
नैसाधारण्यनिर्वाहात् बिंबप्रतिबिंबभावाद्दिस्थलेवस्तुतउभयानुगतानामपि धर्माणां साधारण्यस्वी
कारे तात्मुख्यसाधारण्यस्याप्रयोजकत्वात्॥ यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा तथैव सोभूदन्वर्थो रा
जाप्रकृतिरंजनात् इत्यादावन्वर्थसंख्यावत्वस्य साधारणधर्मत्वाच्च साधर्म्यमात्रस्योपमात्वेनार्थसाम्य इव
शब्दसाम्येपि तदसंभवाच्च स्फुटालंकारावेतावुपमासमुच्चयौ किंतु आक्षिप्त्यशब्दमात्रं सामान्यमिहापि
दि २ संभवतु इति रुद्रभट्टाभिः शब्दसाम्यस्याप्युपमाप्रयोजकत्वोक्तौ अनुपगमात्॥ प्रकृतोपमैव श्लेषस्य बाधिके
ति वक्तुं सहेम पूर्णोपमा हि साधारणधर्मप्रयोग एव संभवति न लुप्ता तत्र चार्थश्लेषादेरावश्यकत्वात् तद्वि
षयनिर्दिष्टोपमाविषयाभावेन तया श्लेषबाधस्य युक्तत्वात् एवं समसरार्चितोप्यमरार्चित इत्यादावपि वि

राम:
८

रोधादिस्यैकेश्लेषस्य प्रतिभानमात्रं ॥ न तु वस्तुस्थितिः ॥ द्वितीयार्धस्यानन्वयप्ररोहात् ॥ एवं च बिंदुसुंदरीनि
८२ त्यंगलक्षीरवच्छन्नाहिंदुका इत्यादावपि ॥ न ह्यत्र बिंदुभावेन सुंदरीति प्रतीयमानोऽपि द्वितीयोऽर्थः प्रकृतोपयोगी
नैकेकारविरोधस्यापि पारमार्थिकस्यानित्योऽनित्यस्येत्यादेरनलंकारत्वं ॥ यथा ॥ अपर्यवसन्न एव विरो
धोऽलंकार इत्यभ्युपगम्यते एवमप्रतिष्ठितोपि श्लेषोऽलंकारत्वेन स्वीक्रियतामिति चेन्न ॥ विरोधाभासस्य
विरोधत्ववत् श्लेषाभासस्य श्लेषत्वेन केनचिदनभ्युपगमात् ॥ एवं सहृदरीत्यादौ रूपकं प्रधानं श्लेषस्त
द्रूपकांगमेवेति तत एव व्यपदेशो न्याय्यः ॥ नालंकारिर्वेत्यादावपि व्यतिरेकादिरेव प्रधानं ॥ श्लेषस्त
त्तन्निर्वाहकमात्रमिति ॥ एवं च गुणीभूतत्वेन श्लेषस्यालंकारत्वायोगाद्वाच्यप्रायत्वमेवेत्यपि केचिदिति
दिक् ॥ अनुकूलत्याऽनंदे अत्र प्यादीक्षिता आनंदप्याहुः ॥ प्रकृताप्रकृतश्लेषोदाहरणे शक्तिमूलध्वनि
स्तावत्प्राचीनैर्विवक्षितः ॥ यथा यद्रात्म नो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य य
स्यानुपप्लवगतेः परवारणस्य दानांबुसेकसुभगः सततं करोऽभूत् ॥ असावुदयमारूढः कांतिमान्रक्त

मंडलः। रागमाह्वयति लोकस्य हृदयं मृदुभिः करैः इत्यादौ॥ अत्र गजशंद्रादिस्थलेऽप्रकृतार्थाव्यंजनयोगस्फुर-
तिर्न तेषामभिप्रायः। किंतु प्रकृताप्रकृतार्थाभिधानमूलकउपमाद्यलंकारो व्यंग्य इत्येव॥ अप्रकृतार्थ-
स्यापि शब्दशक्तिप्रतिपाद्यत्वेन व्यंजनेनैपेक्षत्वात्। यद्यपि प्रकरणवलेन प्रकृतार्थस्यैव झटिति प्रतीतिविष-
यत्वे सति पश्चादुपतितवृत्तिसंघनादिवाचकानां राजकरादिशब्दानां परस्परसमभिव्याहारवलात्त-
द्विषयकशब्दांतरेणैषपूर्वकमप्रकृतार्थः। स्फुरतीति नैतावता तस्य व्यंग्यत्वसंभवः। शब्दप्रतिपाद्यमाने
सर्वपैवतरत्र नैपेक्षराणात्॥ पर्यवसिते प्रकृतार्थे पश्चात्स्फुरतीति चेत्। तर्हि गूढश्लेषोऽस्तु। अस्ति चान्य-
त्रापि गूढश्लेषः॥ अयमतिजरठाः प्रकामगुर्वीरलघुविलंबिपयोधरोपरुद्धाः॥ सततमसुमतामगम्य-
रूपाः परिणतदिक्करिकास्तटीर्बिभर्ति॥ मंदरमद्रिमधुरर्यमोपलादर्शितश्वपथुः साभवत्तमः। दृष-
दस्मिभिरजंस्रिघविरोधभोधपतेरसन्निधौ॥ अत्र समासोक्त्युदाहरणयोः प्राकरणिकार्थवो-
धानंतरं विशेषणसाम्यादप्रकृतोऽपि व्यवहारः प्रतीयते॥ न च वाभंगश्लेष इति सर्वा-

मिमतस्य: एवं रम्या इति साम्यक्ती: पताकया गंगिविक्राइति वर्द्धयंती: यस्य समसेवंतनेमहल्लीका:
समं वधूभिर्वल्लभीर्युवानः॥ इत्यादावपि गूढश्लेष एव अत्र हि तीर्थान्तादि विशेषणोपस्थापिता
नामर्थान्तराणां विभक्तिभेदे न वधूभिरनन्वयात् नापि एतस्मिन्नाधिकपदः श्रियं वहंत्यः ससोमं
पवनस्तुवाजेवेननीता: वाल्मीकेररहितरामलक्ष्मणानां साधर्म्यमधेदेति गिरां महासरस्य:॥
इत्यादि वहिर्भक्तिभेदेपि उभयत्र तदाऽन्वयाक्षेपकं साधर्म्यमिह निवद्धमस्ति येनाक्षेपमश्ले
षोपि स्यात् समभिति तृतीयाविशेषणां सहार्थत्वेनाप्युपमानं वधूभिः श्लिष्टविशेषणान्वयात्
प्रागप्रतीतं साधर्म्यं नालंबते तस्मादर्थसौंदर्यबलादेव तदन्वयानुसंधानमिति गूढश्लेषः त
स्तेन तल्लादेव समशब्दस्य साधर्म्यार्थकत्वे न मित्युपमाऽसमयश्लेष इति अत्र रसगंगाधरकृतः
यत्तावदुक्तं सम्प्रकृतार्थस्य श्लेषत्वं न प्राचामभिमतं किंतु उपमादेरेवेति तदयुक्तं अनेकार्थस्य श
ब्दस्यैकार्थकत्वनियमिते संयोगाद्यैर्वा कार्थधीकृदाप्रतिरंजनं इत्यापि तत्कृष्यविरोधात॥ अ

प्रकृतार्थान्वयजनकत्वं च जनतायापि वेत्येतदर्थात्॥ न ह्येकार्थस्यापि शब्दस्योपस्थापकत्वं येन तन्नियंत्रणा
र्थसंयोगाद्यनुसारः स्यात् अर्थद्वयस्य वाच्यतयाप्युपस्थितेरन्यतरानपायात्॥ यदप्युक्तं द्वितीयार्थस्या
पि शब्दस्य प्रतीतिरित्यादि तदप्यसत् द्वितीयार्थस्य विषयशंकेरेव नियंत्रणास्पदत्वेन शब्दस्मात् तद्बोधासं
भवात् न च नियंत्रणां प्राथमिकबोधजननमात्रं तथा च प्रथमं द्वितीयार्थबोधाभावेपि प्रकृतार्थबोधा
नंतरं शब्दात् द्वितीयार्थबोधे बाधकाभाव इति वाच्यम् एवं हि प्रथममपि न कुतो द्वितीयार्थबोधः प्रकरणज्ञा
नस्य तत्प्रतिबंधकत्वादिति चेत् तर्हि चरममपि कथं तद्बोधः प्रतिबंधकस्य सत्वात् न च ज्ञानस्य क्षणि
कत्वात् स्थापितयाप्रकरणज्ञानेन नष्टे तदुत्तरं प्रतिबंधकाभावात् शब्दादेव द्वितीयार्थबोध इति वाच्यं तत
थापि द्वितीयप्रतिबंधकज्ञानसंभवात् न हि प्रकृतार्थपूर्वकालीनप्रकरणज्ञानस्यापि तद्व्यक्तित्वे
न प्रतिबंधकत्वं॥ प्रतिबध्यप्रतिबंधकभाववाहुल्यप्रसंगात् किंतु प्रकरणज्ञानत्वेनैव एवं च
प्रकृतार्थबोधोत्तरकालीनप्रकरणादिज्ञानस्यापि प्रकरणादिज्ञानत्वरूपप्रतिबंधकतावच्छे

दकधर्मावच्छिन्नतयाद्वुर्वारमेव प्रतिबंधकत्वमिति एवं च हितीर्थार्थबोधार्थं अत्र च लक्षणामं
नैव स्वीकर्तुमुचिता जैमिनीयमलंर्थं तेरसनायामहामतिः इत्यादौ बाधितार्थबोधस्य शक्त्या दु
रुपपादकत्वाच्च कथंचिदुपपत्तावपि देवदत्ते नष्ठत्वे प्रतिता दृशप्रयोगे सम्भ्यार्थानुपस्थितिः शा
लेकादिना प्रयोजनानुपस्थितिरित्यपि नियमो न स्यात् वह्नेर्बोद्धव्यादि[illegible]स्य व्यंग्यप्रतिभासमा
वहेतुत्वादिति अत एवायमतिजरठा इत्यादिवदत्र विग्रहे ठात्रूघट देत्यधिपरास्तम् समासोत्त्वा
वपि व्यंजनयैवायमकृतार्थप्रतीत्यभ्युपगमात् अत एव च निकारेणा समासोक्ते गीरीभूतत्वं गंधात
र्भावः स्वीकृतः पूर्वप्रकरणे समासोक्तावाप्त्ले बोवाध्यत इत्युद्दशनायाहीष्टिभिरप्युक्तं तत्र स्वे घत्वेच
तद्वाध्यत्वोक्तानुपपत्तेरिति किंच अनेकार्थस्थले कथंचिदप्रकृतार्थस्य शक्त्याबोधोक्तौ योगरू
स्थले तु न तदुक्तिसंभवः यथा नांवन्मयोगिनयनं तवजलजानां श्रियं हरते विपिने तिवे वलीना
मपि चमृगीणां कथं नु तां हरति अत्र नांवल्मारहितानां यत्मानां श्रीहरणासंभवेपि तद्वतां हरिणा

नातद्वाच्यार्थमिति वा आर्थे पर्यवसानेऽपि केवलयोगमर्यादया मूर्खगवाक्षाणां धानहरतां नेतृमिच्योरैः सुशंकं॥
ननु गवेषकाणामिति जलजन्मगशादेभ्यः प्रतीयमानस्यार्थस्याविनाभंजनानुपपादयितुमशक्यत्वात्॥
योगरूढत्वानियमेनार्थांतरबोधासामर्थ्यात् अत एव पंकजादिपदेभ्यः पंकजनिकर्तृत्वप्रकारककुमु
दादिविशेष्यकबोधो लक्षणयैवेति नैयायिकाः न चाच्योपि॰ तत्संयोगविनिवेतिनायं योरव्यवहारैकवत्सा
त्यर्थमिति ज्ञानेस्योपायाभावेन तात्पर्यस्यैवाग्रहाद्धोजनाग्र एव तदर्थग्राहकत्वादित्याहुः इति श्लेषः॥
समासोक्तिं लक्षयति यत्र प्रकारतावच्छेदकपदमात्रं वाच्यसामान्ये तदुक्तेरप्रकृतार्थोक्तिः सोक्ता समासोक्तिः॥
यत्र प्रस्तुतार्थघातानां यथावाच्ये विशेषणपदानि वाच्यसंयोगमयानुगामीनि न त्वेकार्थानीति नियमः तत्रोभ
यानुगतविशेषणानां सामर्थ्यात्प्रकृते न अप्रकृतार्थप्रत्यायनं समासोक्तिः समासेन संक्षेपेणार्थद्वय
स्योक्तिः प्रत्यायनादित्यर्थः एवं च विशेषणार्थकपदमात्रवृत्तिश्लेषसामर्थ्यादप्रस्तुतार्थबोधः सेति फ
लितं धूमपदाद्याभिज्ञानादिना वह्निबोधादिव्यापिवारणाय सामर्थ्यादित्यंतांशः उल्लासकालकरवालमहो

कुवाहं देवे नये न जरठोऽर्जितगर्जितेन निर्वापितः सकलेश्वरदोरिपूणां धाधराजल्लेहि जति ज्वलितः प्रतापः
इत्यादौ विशेषणविशेष्योभयश्लेषलक्ष्य उपमाध्वनावतिव्याप्तिनिषेधाय मात्रेति तथा च यत्र विशेषणसाम्यं श्ले-
षस्तत्र समासोक्तिः विशेष्यस्यापि श्लेषे तूपमाध्वनिरेवेति फलितार्थः अत्र विशेषणसामर्थ्यमेतदेव यत् प्रकृ-
ते प्रसिद्धधर्मस्य प्रकृते समारोपात् व्यवहारावच्छेदकतयालक्षितयोगिनोऽप्रकृतार्थस्य प्रतीतिरिति ध्येयम्
यथाप्रकृतेन प्रकृतार्थबोधनं तथाप्रस्तुतप्रशंसा प्रकृतेनाप्रकृतार्थबोधनं तु समासोक्तिरिति विवेकः ॥
यथा मम उत्साय यत्पल्लकमेऽरिमं जनाभ्यां वक्षोजकुम्भवसनांचलमुद्धुनोति किं वाधरं किमपि चुंबति पं-
कजाक्ष्याः लोलः कपोलतलयोर्विचरन् समीरः इहालकापसारणात्तनवसनापकरणादयो धर्मा मारु-
तनायकयोः साधारणधर्माः समीरपदं तु मारुतस्यैव शक्तं अतो नायकप्रसिद्धधर्माणां नायके समा-
रोपात् व्यवहारावच्छेदकतया अप्रस्तुतस्य नायकस्य प्रतीतिः अतः समीरे नायकव्यवहारारोपणाच्चमत्कारः य-
द्युक्तं धर्माणां मारुतेऽपि सत्वेन नायकप्रसिद्धानां तेषां मारुते आरोप इति न युक्तं तथापि मारुते स्तन-

अ.कौ.
८४
84

रसनालकादिचालनं विशेषतो न प्रसिद्धं चलनहेतुत्वस्यैव तत्र प्रसिद्धेः नायकस्य तु स्तनावस्नापसारणादि
धर्मो स्वविशेषतः प्रसिद्धा इति हेतुत्वेन नायकनिष्ठानां धर्माणां मारुते आरोप इत्युक्तं अत एवात्र मारुतेन ना
यकत्वारोपः शब्दानुपात्तस्य नायकत्वस्यारोपानुपपत्तेः तद्व्यवहारस्तु शरोपान्तेयात आरोप्यत इत्युक्तं न चै न२
वं मल्लीफलतामित्यादौ नायिकात्वारोपोऽपि न स्यादिति वाच्यं तत्रातः पुरेरणात्वारोपसामर्थ्येन तत्पात्वात्
अत्र तु अलकोत्सारणादीनामुभयसाधारण्येन नायकाक्षेपकत्वासंभवात् न चात्र मारुतेन नायकस्यानि
गरणादितिशयोक्तिरेवेति वाच्यं उक्तधर्माणां नायकस्यैव विशेषप्रसिद्धेरुक्तत्वेन तद्धर्माश्रयस्य नायकस्यै
वोपमानत्वेन मारुतस्योपमानाभावात् किं च अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः इत्यादौ चन्द्रमसो न
नायकोपमानत्वसंभवः चन्द्रपक्षे चुम्बनस्य लाक्षणिकत्वान्नायकपक्षे च मुख्यत्वात् लाक्षणिकचुम्बन
स्यैव सामान्यधर्मत्वे तु नायकस्यापि कान्तानुयोगिकः स्वकीयपत्निं विदधत प्रतियोगिक एव स योग
उक्तस्यान्वनु मुखप्रति योगिक इति रसापकर्षापत्तिरिति प्राचः अत्र वदन्ति प्रकृतकर्तव्यप्रकृतनायकादिव्य रामः
८४

वहारः समारोप्यत इति यदुक्तं तत्र किं नायिकादिविशेषितो व्यवहारस्तथा उत तद्विशेषित एव नायकः चं-
द्रादेर्नायकव्यवहारासम्भवत्वेन तत्साम्यस्यैव तत्सिद्ध्यापत्तेः नरेष्वापत्तेः अलौकिकत्वे कामे शाब्दव्यवसायेन व्य-
वहाराभेदस्यैव कवेर्विवक्षितत्वात् नायकस्य व्यवहारविषयकत्वेन नायकत्वस्यासिद्ध्यापत्तेश्च किं-
चैवं निशामुखं चुंबतीति चंद्रस्य इत्यादौ यथा चंद्रस्य नायकत्वारोप एवं निशायां नायिकात्वारोपोऽपि न स्या-
त् न्यायसाम्यात् नायिकानालिंगितचुंबनमात्रस्य चमत्कारकत्वाभावेन मुखचुंबनस्यासाधारण्यान्नाय-
कव्यवहारत्वानुपपत्तेश्चन्द्रत्वारोपस्यापि वैयर्थ्यं स्यात् यदि तु निशायां स्त्रीप्रत्यययोगात् नायिकात्वं स्वप्रवृ-
र्ववृत्तित्वेनैव प्रतीयत इति निशा नायिकात्वबोध इति तूच्यते तदा मुखस्यापि चंद्रवृत्तित्वेन बोधे बाधकाभा-
वात् तत्रापि नायकत्वारोपे बाधकाभावः न द्वितीयः मुखचुंबनमात्रस्याहृद्यत्वात् यद्वा अलंकारसर्वस्वका-
रानुयायिनां कुवलयानंदकृतोक्तं प्रकृतविशेषणसाम्यादिना यत्र प्रस्तुते तदीयतत्स्वप्रत्यायने तत्प्रकृतविशेष्ये
तदारोपार्थमेव सर्वत्रैव प्रकृतान्वितेन कविसंरंभगोचरतायोगात् तथा च समासोक्तावप्रकृतव्यवहारस-
मारोपचमत्कारहेतुर्न तु रूपकवत्प्रकृते अप्रकृतरूपारोपोऽप्यस्ति मुखादौ चंद्रत्वाद्यारोपे तु मुखचंद्रादिपदस-

स.कौ.
८५

समभिव्याहारवत् चंद्रादेर्नायकाद्यारोपहेतुतादृशपदप्रयोगस्यासत्वात् नचात्र निरीक्ष्य गिरिषु त्रपयैः पयोदोष्ठ
रंधनिशायामभिसारिकायाः धारानिपातैः सह किंनु वांतश्चंद्रोयमित्यार्त्ततरं रुरोद इत्यत्र निरीक्ष्ययानुगुणान
यनपदोपादानं यथा मे पथ्यदृष्टत्वेगमकं तद्वन्नायकत्वारोपगमकं किंचिदस्ति न वा त्वयागते किमपि विषत
रपविशिष्टस्त्वसंतु वंधपूदतः किमसौ विभेति द्वीपांतरेपि नहि तेस्य वशंवदो यत्वां राजपुंगवनिषेवत एव ल
क्ष्मीः इत्यत्र यथा विशिष्टकार्यमप्रस्तुतराज्ञो विशिष्टत्वगमकं॥ तथेहापि चंद्रस्यापि जारत्वादिगमकं किंचिदुपा
त्तं तथा च विशेषणसामर्थ्यादवगतस्याप्रस्तुतव्यवहारस्य समारोपादेवात्र चमत्कार इत्यभ्युपगंतव्यं यद्यप्य
र्थयोर्द्वयोरपि प्राधान्यविमर्शेऽविशिष्टमेवेति प्रकृते प्रकृतेऽप्रकृतव्यवहारारोपोऽप्रकृते प्रकृतव्यवहारारोपो वे
त्यत्र विनिगमकं नास्ति॥ तथाप्यन्यतरव्यवहारास्यैव धर्मिण्यन्यतरव्यवहारारोपस्यावश्यमसंगतिपरिहा
राय स्वीकरणीयतया प्रकृतव्यवहारधर्मिण्यप्रकृतव्यवहारारोप एव स्वीकर्त्तुमर्हः नचारोपस्यैव पर्य्यासिति
वाच्यं स्वरूपतोऽज्ञानस्यारोपे चारुत्वाभावात् कामुकाद्यप्रस्तुतधर्मिसंबंधित्वेनावगम्यमानस्य रसानुगुणत्वा
दारोपात् कामुकादेरप्रधान्याद्रूपस्थितस्यापि चुंबनादिरूपजनितस्य व्यवहारविशेषणत्वे तस्मादयमैंद्रीमुखं
पश्य रक्तश्चुंबति चंद्रमा इत्यत्र जारसंबंधितादृशचुंबनात्मकव्यवहारारोपस्य यद्ध इति बोधः इति तदयुक्तं मुखं

राम:
८५

चंद्र इत्यत्र चंद्रत्वस्यानारोपे तावच्चंद्रत्वारोपस्फुटतैस्तावदसंगतत्वात् चंद्रविशेषणतास्य चंद्रत्वस्य मुखे आरोपासं-
भवात् किं त्वभेदसंसर्गेणाचंद्रस्यैव मुखे आरोपात्॥ किं च जारादिपदस्य समभिव्याहाराभावात् इनारोप इत्यपि न स्फु-
टं॥ शाब्दारोपे हि तत्समभिव्याहारापेक्षितो न त्वर्थारोपे रूपकध्वने रूढेरप्रसंगात् न च तत्रारोप्यमाणासाधा-
रणधर्मा तत्प्रकृते तत्तादात्म्यमभिव्यज्यत इति वाच्यं॥ इहापि परनायिकावदनचुंबनस्य चंद्रे आरोप्यमाणस्य
जारासाधारणधर्मत्वेन तत्तादात्म्यव्यंजकत्वसंभवात् एतेन विद्युन्नयने इत्यादौ वास्तुपादेः पुरुषत्वाद्याक्षेपक-
स्यैवाचंचंद्रे च जारत्वस्याक्षेपकत्वमिति निरस्तं॥ न च चंद्रादौ जारत्वाद्यारोपं विनापि जारव्यवहारोपसंभवे नानुप-
पत्त्याभावान्न तस्यैव जारत्वाक्षेपकत्वमिति वाच्यं॥ आक्षेपस्य उपगमकस्यानुपपत्तिसापेक्षत्वेपि व्यंजकस्य उपगम-
कस्य तदनपेक्षत्वात् अन्यथार्थापत्त्यैव निर्वाहे व्यंजनवैयर्थ्यप्रसंगात्॥ तथापि जारादेर्व्यवहारविषयत्वेनो-
पस्थितिरवश्यं वाच्या॥ अन्यथा स्वरूपेणाव्यवहारमात्रारोपे चारुतानुपपत्तेः॥ एवं चावश्योपस्थितस्य जारादेस्ता- शे ८
दात्म्यं वनकेलिरिचंद्रादावेव तादात्म्येन विशेषणत्वमुचितं॥ ननु व्यवहारभेदसंसर्गेणा चंद्रजारयोरभेदप्रतीतिं
विनापि परनायिकावदनचुंबनस्याहृद्यत्वात्॥ अपि च निशामुखं चुंबति चंद्र इत्यत्र स्त्रीपुंल्लिंगाभ्यां मुखचुंबन

अ॰ कौ॰
२६
८६

रूपार्थस्य हकारेणा नायिकात्वं नायकत्वं च व्यज्यत इति निर्विवादं॥ अर्कोदये निशामुखं कुवलति चंद्रिकेषा अहर्मुखं कुवलति
भानुबिंबं॥ इत्यादावपि तद्वज्जनापत्तेः॥ एवं च स्त्रीप्रत्ययादिना व्यज्यमाने नायिकात्वादिके निशादेर्नायिकात्वरूपपर्यव
स्यति॥ व्यंजकस्य स्त्रीत्वादेः स्वसामानाधिकरण्येन तदास्येयकत्वोचित्यात्॥ निशाशशिनोर्नायकतारूप्यधर्मविशि
ष्टयोः प्रतीतिरिति सर्वस्वकारग्रंथविरोधाच्च॥ अविनाभावाद प्रकृतव्यवहारात्क्षिप्तेन धर्मिणोऽप्रस्तुतो धर्मो व्यवह्रि
यत इति तद्विवरणग्रंथाच्च नायकत्वारोपस्यैव प्रतीतेः॥ किं च व्यवहारात्क्षिप्तस्य नायकस्य तद्विशेषणत्वमेव न तु चं
द्रादिविशेषणत्वं तत्समानाधिकरणपदानुपस्थापितत्वादित्यप्युक्तं॥ एवं सति निशायामपि नायिकात्वारोपो न स्या
त् किंतु व्यवहारविशेषणत्वेनोपस्थितिरेव तच्च न संभवति नायिकात्वानालिंगितकेवलरात्रिमुखचुंबनस्य नाय
कासंबंधित्वात्॥ रात्रितादात्म्यं विना नायिकायामुखविशेषणत्वायोगाच्च॥ किं च निर्लक्ष्मीकाम्भवत्प्राची प्रतीचीं
याति भास्करे प्रिये विपक्षरमणीसक्ते कामुद्रमं चति॥ इत्यत्र भास्करादीनां नायकत्वाप्रतीतावुक्तरीत्या प्रियत्वादिना
समर्थनमप्यनुपपन्नं स्यात्॥ अन्यच्च अप्रकृतव्यवहारः प्रकृतविशेष्येनान्वयहारतादात्म्येनारोप्यते तदभेदेनवा॥
नाद्यः तथा सति ऐंद्रीमुखं चुंबनकर्ता चंद्र इत्येकवाक्यमिति रीत्या बोधः स्यात्॥ न चेष्टापत्तिः॥ ऐंद्र्या नायिकात्वस्य
चंद्रे नायकत्वस्य चाप्रतीतिप्रसंगात्॥ नांत्यः तदपेक्षया प्रकृतव्यवहारविशेष्यकाभेदसंसर्गकाप्रकृतव्यवहारप्रका

रामः
२६

रकारोपस्यैव युक्तत्वात्॥ ननु भेदसंसर्गेणाप्रकृतविशिष्टे तदारोपस्यापि अभेदांशे व्यवहारांशे चारोपप्रसंगात् समस्त्वे
भेदांशाश्चारोप इति विशेषः॥ तस्मादप्रकृताभेदेन भासमानः प्रकृतव्यवहारः स्वविशिष्टे तद्विशेष्याभिन्नतया व्यवसि
ते भासते॥ तत्राप्रकृतार्थ उपस्कारकतया गुण इत्येव युक्तं अयं तु विशेषः यथा त्वत्पादनखरत्नानामित्यादौ रूपकप्र
करणोदाहृते त्वत्पादनखरत्नानां मलक्तकमार्जनं श्रीखंडकरणकं चंद्रस्य धवलीकरणाभिन्नमिति विशिष्टमात्रे नेवि
शिष्टस्यैवीकरणारोपः तदुदाहृतापि इंद्रीमुखचुंबनकर्ता चंद्रो नायिकामुखचुंबनकर्तृनायिकाभिन्न इति न शाब्दबोधः
नायकेत्यादिभागस्य शब्दानुपस्थापितत्वात्॥ किं तु प्रकृतवाक्यार्थघटकाः पदार्थाः अप्रकृतपदार्थतादात्म्येन भास
माना वैशिष्ट्यमनुभवंतीमहावाक्यार्थस्त्वेषामपरिणामं तद् इति तथा च इंद्रीभिन्ननायिकामुखचुंबनकर्ता चंद्रना
यक इति बोध इति तस्माद्व्यवहारस्यैव चंद्रादावारोप इति मतं निर्युक्तिकमेवेति॥ अत्रेदं प्रतिभाति॥ नव्यमते उभयत्रा
भेदारोपसत्त्वेन लाघवानवकाशः॥ तत्र हि नायिकाया रागो नायकस्य च चंद्रे अभेदेनारोपः॥ न च नव्यमतेऽप्रकृतव्यव
हारस्याभेदसंसर्गेणाप्रकृतव्यवहारे आरोपः॥ अप्रकृतव्यवहारस्यैव चाश्रयत्वादिभेदसंबंधेन चंद्रादावित्युभयत्र
संसर्गभेदः॥ प्राचीनमते तूभयत्राप्यभेद एव संसर्ग इति लाघवमिति वाच्यम्॥ नव्यमतेऽप्रकृतव्यवहाराभेदाध्यवसितस्य प्रकृ
तव्यवहारस्यैव चंद्रे बोधात् तस्य चारोपाभावात्॥ किं तु प्रकृतव्यवहारे अप्रकृतव्यवहारस्यैवारोपेण लाघवात्॥ तत्र तन्मे

भेदस्यैव संसर्गीकृत्यारोपद्वयमिति गौरवं॥ अप्रकृतव्यवहाराभिन्नप्रकृतव्यवहारस्य चेद्बोधे तद्विशेष्यकः। प्रकृतव्यवहा
रारोपानपेक्षणात्॥ अप्रकृतव्यवहाराभेदेन प्रकृतव्यवहारे भेदेन च तद्द्वारा वारोपप्रयोजनाभावात् न चैवमसति प्रकृतविशे
ष्ये अप्रकृतव्यवहारारोपद्वयमाश्रित्य विरोधापत्तिरिति वाच्यम्॥ स्वाभिन्नाश्रयत्वसंबंधेन अप्रकृतव्यवहारस्य तद्द्वारा वा
रोप इति तद्व्यर्थात्॥ भवति ह्यप्रकृतव्यवहाराभिन्नः प्रकृतव्यवहारस्तदाश्रयश्चेत्यादिरिति अपि च यत्र वक्तृवाच्या
र्थाभिप्रायेणैव वा स्वप्रयोगे श्रोत्रादिना तत्स्वरूपावगम्यते तथा च तन्तात्पर्याभावान्नैतेन त्वदुक्तसंभवः॥ यथा हर्षचरि बोध ५
तेऽन्तरं लयसिद्धशांडिल्यमुत्सुकात्वमकलुषमानसवाससलालितेन अथवातरकलहंसविपिकायामिपदुरेनेष्यसि यंकजा
लयं॥ इयं हि दुर्वाससः शापेन सरस्वत्यां भूमिं प्रतिप्रस्थानकाले या तस्मिन्नेवावसरे हंसस्य हंसीं प्रति यथा श्रुतेवो
क्तिः॥ सरस्वत्यास्तु सारूप्यात्स्वस्य ब्रह्मलोकदुस्त्यजत्वाभिज्ञानाभिप्रायेणापि योजिते त्वन्मतस्य च ब्रह्मलोकाभि
त्रे मानसत्यागे घटाविरहवती हंसीह्मा सरस्वतीति बोधस्यात्रासंभवात्॥ किंच अत्रैवं विशिष्टस्य नाभेदान्वयः अ विशिष्ट ६
भेदप्रतियोगिनो धर्मस्य शक्त्यानुपस्थितत्वादिति तु हंसस्याः श्यादीनामभेदेन नायिकादावन्वयबोधस्वीकारोऽनुचित ए
व॥ न हि वाक्यार्थस्यैव शक्त्योपस्थितिरपेक्षिता न तु पदार्थस्य अभेदप्रतियोगिन एव शक्त्योपस्थितिः स्यात्॥ न च तु त
दनुयोगिन इति वा समसमानाकं येन वाक्यार्थस्य पदादनुपस्थित्या न तदभेदबोधः॥ पदार्थे तु पदादनुपस्थिते

पिपदार्थान्तरोभेदो ध्यवसीयत इवेति वा वक्तुमशक्यत्वात् व्यञ्जकोऽशः स्यात् अत एव नाधिकादेः शब्दादनुपस्थि
तस्यैवं शब्दावारोप इत्यत्र दूषणं यदुक्तं अर्थारोपेण समानविभक्तिरूपदाकांक्षेति तदप्यपास्तं ॥ अत्राधि
वा मार्थे विशिष्टस्यारोप आर्थिक एवेत्यपि वक्तुं शक्यतया त्वदुक्तविलयापत्तेः ॥ किं च जारत्वाद्यारोपमन्तरेणा
पि चंद्रादौ तद्व्यवहारारोपसंभवान्न तत्र जारत्वारोपे किंचिद्दूषणमस्ति ॥ यत्तु व्यञ्जकस्यानुपपत्तिनिरूप
णस्यैव व्यञ्जकत्वमिति ॥ तदपि न ॥ प्रकृतानुकूलार्थव्यंजकत्वनियमभंगापत्तेः ॥ किं चैवं ध्वनिप्रकरणो
अरसिकरमणीधुन्नाराम्रशिखोपुन्निधरासमिद्धिमङ्ग ॥ इयमधिगमाराधारा अंगीपफुल्लविलोलाला
जाआ ॥ इत्यत्र प्रफुल्लविलोचनत्वेनवस्तुनाहर्षव्यंजनेऽपि रूपमदुपभोग्यत्वरूपवस्तुव्यंजनैः ॥ न च हर्षलास्य
जनकतया तदुपभोग्यत्वारोपे दूतिवाच्यम् ॥ हर्षस्य पुत्रलाभादिना संभवेनानैकान्तिकत्वेन मदुपभोग्यत्वा
रोपकत्वासंभवादित्याशंक्य अलसशिरोमणित्वादिरूपवक्तृविशिष्टप्रफुल्लविलोचनत्वस्य कारणान्तरबाध
सहकारेणामदुपभोग्यत्वव्यंजकत्वमिति स्वोक्ति[illegible]घातापत्तेः ॥ यदपि स्वरूपतो व्यवहारमात्रारोपस्य वा
रुत्वाभावाद्व्यवहारविशेषशालित्वेन जारादुपस्थितिरवश्यमंगीकार्या ॥ एवं च जारादेरभेदेन चंद्रादावेवादे

पऽुचित इत्यादि। तदपि न। जारादेरभेदेन चंद्रस्यारोपवादिनां त्वयापि जारादेर्व्यवहारविशेषशालित्वेनान्वयस्यावश्यमभ्यु
पगम्यत्वात्॥ अन्यथा मुखचुंबनकर्ता चंद्रो जार इति बोधे चंद्रे जारत्वाक्षेपकाभावात्। एवं चोभयत्र तदन्वयापेक्षया
व्यवहारश्चेतदोषो पुनः को लाघवात्॥ यत्तु जाराभिन्नत्वेन चंद्रबोधं विना परनायिकावदनस्याहृतत्वादिति तत्र भे
दप्रतीत्यभावमात्रेणापि तदुपपन्नावभेदप्रतीतेरनुपयुक्तत्वात्॥ यदपि मुखचुंबनादिना स्त्रीत्वादिकं तु सहकारिमा
त्र॥ एवं च चुंबनादिनास्वविशेषशालित्वेन तदारोप प्रमर्हणं किंच स्त्रीलिंगादिकं न निरपेक्ष्य नायिकात्वादिव्यंजकं॥ नि
शामुखं चुंबति चंद्रकिरणैर्हा इत्यादावपि तदापत्तेः॥ किंतु चुंबनादिकं तुः पुंस्त्वादिसहकारेणैव॥ एवं च चंद्रगतपुंस्त्वं
निशाया नायिकात्वं निशागतं च स्त्रीत्वं चंद्रस्य नायकत्वं व्यंजयतीति पर्यवसानात्॥ कथमारोपके सामाना
धिकरण्ये नायिकात्वादिप्रतीतिः स्यात्॥ स्त्रीत्वादेस्तदारोपकत्वाभावात्॥ पुंस्त्वादेश्च नायिकात्वादिसामा
नाधिकरण्याभावात्॥ यत्तु निशाशशिनोर्नायकत्वोरव्यधर्मविशिष्टयोः प्रतीतिरित्यादिग्रन्थस्वरसदर्शनात्
तदपि न नायकस्य व्यवहारविशेषशालितया परंपरया तद्धेतुः शिष्यमित्यत्रैव तात्पर्यात्॥ व्यवहारारोपमंगीकृत्य नायका
द्यारोपनिरासतात्पर्यके ग्रन्थे तदभेदारोपाभिप्रायस्याशंकितुमप्यशक्यत्वात्॥ यदपि चंद्रादौ नायकाद्यनारोप
वत् निशायामपि नायिकात्वाद्यारोपस्यावश्यकत्वोक्तं॥ न हि नायिकाया व्यवहारविशेषशालित्वेनान्वयबोधः संभ

वति॥ अत्र वेत्युवनरूपव्यवहारस्यान्तरसंबंधित्वात्॥ नायकस्य तु तदसंबंधितया अन्वयेन संबंधांतरस्यानाकांक्षितत्वाच्च॥
तदतिरिक्तव्यवहारस्यारोपानन्त्वात्॥ अत एवोक्तं रीत्या अन्वयस्यैवाविश्रान्तत्वात्॥ यदप्युक्तं निर्लक्ष्मीकामवत्सांचीप्रि
यत्वाद्यबोधे प्रियत्वादिना समर्थनानुपपत्तिरिति॥ तदपि न॥ अन्यत एव तद्दोषात्॥ न हि भास्करप्रियेऽन्यरक्ते प्राचीनायि
का इत्युच्यते तूक्ते प्रियत्वादिना समर्थनं संभवति॥ अभेदे समर्थ्यसमर्थकभावानुपपत्तेः॥ अस्माकं तु अप्रकृतव्यवहा
रारोपकत्वे नत्वन्तराहस्य निर्लक्ष्मीकत्वसंपादनोपयोगस्य स्पष्टत्वात्॥ तस्मात्समासोक्तौ व्यवहारस्यैवाभेदेन प्रकृ
ते व्यवहारे आरोप इति स्थितं॥ अत एव गंडं चुंबति पांडिमाधरमधु न्यास्वादयत्युच्चरागः स्मासोर्मिस्तनिमा तनो
ति च तनो राश्लेषमेणीदृशः॥ तापस्तावदपाकरोति वसनं भ्रांतः किमावेदयत्वां मे तेऽध्यन्यतमास्त्वमेव विविधिनावा
मेन निर्वीक्षितः॥ इत्यादौ॥ कपोले पत्रालीकरतलनिरोधेन मृदिता निपीतो निश्वासैरयममृतहृद्योऽधररसः॥
मुहुः कंठे लग्नस्तरलयति बाष्पः स्तनतटं प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयं॥ इत्यादौ च न समासोक्तत्वाप
त्तिः॥ इह हि पांडुत्वादिधर्मस्य गंडचुंबनादिव्यवहारारोपात्॥ देहस्यापि एकसंबंधिनानाव्यवहारारोपसंभवान्नौ
चित्यं॥ अत एव तु तत्र नायकत्वस्यैवारोपात् पांडुत्वादौ नायकत्वारोपे नायकसंबंधिरतिप्रतीत्या नौचित्यात्समा
सप्रसंगो दुर्वारः स्यादिति दिक्॥ अत्र क्वचिल्लौकिके शास्त्रीयव्यवहारारोपः॥ यथा मम॥ रूपे राजति केवलीनयि

तनोप्रारोप्यस्वरप्रार्थितानां घादे व्यतिरेकि केवलमिदं स्फुरत्समाकर्णयते॥ अदेति व्यतिरेकि वान्वयि वतेहं भोहवक्षो
जयो मध्ये वाक्तनुत्वमंगगमने लोलत्वमस्तोकत्वया॥ अत्र नायिकाया रूपे सर्वांगव्यापकत्वयानेयाधिकमसि
द्धाभावात् प्रतियोगित्वरूपकेवलान्वयित्वमव्यवहारारोपः॥ क्वचित् शास्त्रीयेलौकिकव्यवहारारोपः॥ यथा मम॥ मा
मानमव्ययसमासमाश्रयणाद्धि भक्तिश्रीवानिजामधिपत्याविधतांविनिर्मात॥ स्वच्छंदतादधरपर्यनुयोगयोग्य
स्तस्याहि लोपविधि मन्वशिषत्सुनीन्द्रः॥ अत्राव्ययो नरमेव विभक्तेर्लोपो भवतीति वैयाकरणव्यवहारे॥ अ
गृहितहिंसारतवलवद्व्यवहारारोपः॥ क्वचित्तु शास्त्रीयेशास्त्रीयव्यवहारारोपः॥ यथा मम॥ कर्मणपणावप
नशोप्रयातेकर्तृत्वमाध्यानविवर्जितेपि॥ स्फुटामहं संविदधत्यरस्मैपदायतस्यां कथमत्र हास्यः॥ अत्रवहु
न्यत्वेवाकर्मणि शीआध्यानां अत्र वरणाद्यात्मकज्ञानानामभावेपि सतिपरस्मैमोक्षरूपायपदायस्पृहांकुर्वतीं
त्यनेनउक्तेकर्मसत्वेमोक्षो न भवतीति वैदिकेव्यवहारे॥ अरोश्च अरणपतावस्याधीकर्मीभूते पदार्थे अनरणावि
तिनस्मात् सहवेनरणपतावस्याधीकर्तृभूतेसति अनाध्यानेस्मरणाभिधेये आत्मनेपदविधानात्तादृशस्य
लेपरस्मैपदं॥ तस्य रोरणो यत्कर्मणोवेतनाकर्तानाध्यानइति सूत्रेणाभवतीति वैयाकरणव्यवहारारोपः॥ ए
वंशास्त्रान्तरस्याप्युदाहार्यं॥ निदर्शनानिरूपयति॥ उपमापर्यवसन्नो यत्रार्थोन्यो न्यमनन्वयानर्हः॥ यत्र क्रियया

कारणकार्यान्वयधीर्निदर्शना सोक्ता ॥ यत्र पदार्थयोर्वाक्यार्थयोर्वा अन्योन्यमेकवाक्यतयान्वयबोधाजन
कयोरुपमानोपमेयभावं कल्पयित्वैवान्वयबोधः पर्यवसाने सा निदर्शना ॥ यत्र च कार्यकारणयोः द्वि यया
हेतुहेतुमद्भावे प्रतिपादिते उत्तरवाक्यार्थः पूर्ववाक्यार्थप्रतिपाद्यसामान्यकारणभावे दृष्टान्ततया पर्यवस्यति
सा द्वितीया निदर्शनेत्यर्थः ॥ आद्या यथा मुद्राराक्षसे अमात्यराक्षससंगृहीतनामा लोकस्यभासास्यस्योक्तौ ॥ केनो
त्तुंगशिखाकलापकपिलो बद्धः प्रयान्ते शिखी पाशैः केन सदागतेरगतिता सद्यः समापादिता ॥ केनानेकपदा
नवासितसटः सिंहोऽर्पितः पंजरे भीमः केन चैकनक्रमकरो दोर्भ्यां प्रतीर्णोऽर्णवः ॥ अत्र हि राक्षसोऽयं केनानीत
इति पूर्ववाक्यार्थः ॥ वह्निर्वस्त्राञ्चलेनैव बद्ध इत्यादिरुत्तरवाक्यार्थः ॥ न चैतयोः परस्परमन्वयः संभवति ॥ अतो यथा व
ह्निर्वस्त्राञ्चले बंधनं दुःकरं ॥ तथा राक्षससंग्रहणमपीत्यादिक्रमेणोपमायां पर्यवसानम् ॥ तथा च वह्निर्वस्त्राञ्चलबंधन
प्रतियोगिकसादृश्यवद्राक्षससंग्रहणाकर्तृजिज्ञासाविषय इत्यादिः पर्यवसितबोधाकारः ॥ न च रूपकपर्यवसानमेव कु
तो न भवति ॥ राक्षससंग्रहणरूपवह्निवस्त्राञ्चलबंधनकर्तृक इति बोधसंभवादिति वाच्यं ॥ प्रकृतप्राधान्यभंगापत्तेः ॥ ए
वमपि वह्निवस्त्राञ्चलबंधनाभिन्नराक्षससंग्रहणकर्तृकः इति बोधः कुतो न स्यादेवं प्रकृतप्राधान्यभंगाभावादिति चेन्न
राक्षससंग्रहणस्य प्रकृतत्वेन तत्रोपमेयत्वस्यैवौचित्यात् ॥ रूपकापेक्षया उपमायाः प्रथमप्रतीतिकत्वाच्च ॥ न गौ

अ.कौ.
९
१०

र्थ्यं च्योपमैवास्तु॥ किमलंकारांतरकल्पनयेति वाच्यम्॥ उपजीव्यत्वेन तदस्युपमामादित्वात्॥ पदार्थनिदर्शना यथा॥ परि-
ती अमहाश्यासकम्मल सामक्षिमद्गलिरसाहत्येशा॥ छिन्नं मृहंह सिक्रुद्वंद्वावस्थं गदंपदशा॥ अन्यावस्था अन्येनैकेन
प्राप्यते इत्यतो मुखचंद्रयोरुपमापर्यवसानं॥ अथवा अवस्थासदृशावस्थायां लक्षणा॥ सादृश्यप्रतियोगिन्या अ-
वस्थायां चंद्रपदान्वयः अतो लुप्तोपमैयमस्त्विति चेन्न॥ अवस्थायामवस्थानिरूपितसादृश्याभावात्॥ चंद्रपदस्यैकदेशा-
न्वयप्रसंगात्॥ खंडशक्तिकल्पने चगौरवात्॥ एकपदोपस्थाप्यानां गतं तदसत्वे अन्योन्यमनन्वयात्॥ न्यायपंचाननोदय-
क्तौ॥ इदं शास्त्रलेऽन्वयं प्रतिरूपमोदाहृतनिदर्शनायामुपमानमप्रसिद्धं॥ चंद्रैर्वस्त्रवं धनादेरप्रसिद्धेः॥ इदं तु प्रसिद्धमिति
विशेषः॥ वाक्यार्थनिदर्शनायोगिपदस्य स्वविशिष्टजातीयार्थलक्षणायां चंद्रपदस्य चंद्रावस्थायां लक्षणा॥ तेन चंद्राव-
स्थासदृशावस्थालाभेन लुप्तोपमैवेत्याहुः॥ द्वितीया यथा॥ उन्नतपदमवाप्य यो लघुर्लीलयैव स पतेदिति ब्रुवं॥ शैलशेखर-
गतो दृषत्कणश्चारुमारुतधुतः पतत्यधः॥ अत्र लाघवे सत्युन्नतपदप्राप्तित्वं कारणतावच्छेदकं॥ पतनत्वं कार्यतावच्छेदक-
मिति कार्यकारणभावः पूर्वार्द्धप्रतिपाद्यः॥ तत्र दृष्टांततया उत्तरार्द्धोपादानं॥ तेन लाघवे सत्युन्नतप्राप्तिः॥ पातहेतुः यथा
दृषत्कणस्येति दृष्टांतपर्यवसानान्निदर्शनात्वं॥ न चायमनुमानमेवेति वाच्यम्॥ पक्षादेरनिर्देशात्॥ न चायं निश्चितपत-
नकः लाघवे सत्युन्नतपदप्राप्तित्वात्॥ शैलसानुगतदृषत्खंडवदिति वाच्यं॥ एकत्र लघुत्वं अन्यत्र द्रढित्वं॥ दृष्टांते त्वपदे

राम:
९

वृत्तित्वयोगित्वं उन्नतत्वे उत्कर्षत्वं॥ उद्देशस्थितत्वं चेति भेदात्॥ पक्षे पतनं पदस्य शोद्देश्यतेत्वधः संयोगहेतुक्रियेति
मे दाह्य॥ अथ फलघुत्वे उन्नतत्वपातादीनाम भेदाद्धात्वसाधनो मयूरशिखान्नदोषः॥ वास्तवतया ममाभावे पि के वि प्रतिभाकल्पितत्वा
न्मद्रिव लादेव अनुमानालंकारप्रवृत्तेः॥ अन्यथा उन्नतशृङ्गस्य पूर्व कार्य कारणभावग्रहे संतत्वान्नपपत्त्यालत्वनतस्यापिविल
यप्रसंगादिति चेत्॥ न तथापि अवलघोरुन्नतपदप्राप्तिपातं प्रतिहेतुता यादृश प्रतिपाद्यत्वेन कस्यचित्पतनं योग्यता याञ्च सा
ध्यत्वेनानुमानात्स्य न व काशात्॥ नन्वपतनं लाघवे सत्युन्नतपदप्राप्तिजन्यपतनत्वात्॥ शैलाग्रगतदृषत्खंडवदितिवाच्यं॥ श्लो
कान्तदृषत्खंडस्येव दृढत्वप्रतीते स्तत्समवेतपतनस्य तद्वाभावात्॥ पतनस्य पक्षत्वे हेतोरसाधारणतापातः॥ पतनविशेषस्य प
क्षत्वे च सामान्यतो निपतनस्य लाघवे सत्युन्नतपदप्राप्तिजन्यत्वस्य श्लोके गम्यमानस्यासिद्धेः॥ उन्नतपदप्राप्तेः पातहेतुत्व
स्येव प्रतिपादनीयत्वे न पतनस्योन्नतपदप्राप्तिजन्यत्वसाधने तद्विरोधाच्चेति नानुमानावकाश इति सिद्धं॥ अथ यास्त्वत्र विशे
षयासामान्यसमर्थनरूपोऽर्थान्तरन्यासः॥ निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतं॥ पश्यति पित्तोपहतः शशि
शुभ्रं शंखमपि पीतं॥ इत्यादिवदिति चेन्न॥ समर्थनीयवाक्यार्थप्रतिपाद्यकार्यतावच्छेदककारणतावच्छेदकधर्मयोः सम
र्थकवाक्यान्तर्गतकार्यकारणभावघटककार्यतावच्छेदककारणतावच्छेदकधर्मभिन्नत्वे निदर्शना॥ भेदे त्वर्थान्तरन्यास इ
ति विवेके नात्र तद्विषयाभावात्॥ इह हि पूर्ववाक्यार्थप्रतिपाद्यकार्यभावे उन्नतपदप्रतिपाद्यत्वं कारणतावच्छेदकं॥ द्वितीये

न्या·कौ·
६१

९१

५८

पितरेव॥ निरूढदोषेत्यादौ तु पूर्वार्द्धे प्रतिपाद्ये कार्यकारणभावे दोषत्वं कारणतावच्छेदकं॥ विपरीतज्ञानत्वं कार्यतावच्छेदकं॥ द्वितीयार्द्धे
तु पित्तत्वं कारणतावच्छेदकं॥ पीतशंखचाक्षुषत्वं कार्यतावच्छेदकमिति भेदात्॥ एवं च पूर्वोत्तरवाक्यीयकार्यकारणभावद्वये यत्रसा
मान्यविशेषरूपधर्मावच्छिन्नत्वं तत्रैव वाक्योत्तरन्यास इति फलितं॥ अपास्त्वयं दृष्टान्तेस्य॥ त्वयि दृष्टएव तस्या निर्वाति मनो मनोभवज्व
लितं॥ आलोके हि हिमांशोर्विकसति हृदयं कुमुद्व[illegible]॥ इतिवत् न चात्र कार्यकारणभावद्वये कार्यतावच्छेदके साभावः॥ निर्वाण
त्वविकासत्वयोर्भेदादिति वाच्यं॥ तयोर्बिंबप्रतिबिंबभावेनैक्यसत्वात्॥ अन्यथाउक्तोदाहरणेऽपि कृशीमापतनादेर्भेदेनासं
गत्यापत्तेरिति चेत् न पूर्ववाक्यार्थप्रतिपाद्यकार्यकारणभावे उत्तरवाक्यार्थप्रतिपाद्यकार्यकारणभावस्य यत्र ग्राहकत्वं तत्रैव निदर्श
ना॥ त्वयि दृष्टेत्यादौ तु उत्तरार्द्धीयकार्यकारणभावो न उत्तरार्द्धीयकार्यकारणभावे आहत्यग्राहकः॥ तत्र हि एवकारेणाना
धिकामनोनिर्वाणस्वराजदर्शनान्वयव्यतिरेकानुविधायित्वदर्शनेन कार्यकारणभावो ग्राह्यः॥ तत्र यद्यदन्वयव्यतिरेकानु
विधायी[illegible] तत्तज्जन्यमिति ग्राहकव्याप्तौ आलोके हीत्यादिदृष्टान्तः॥ ततस्तत्परिष्कृतया यद्यदन्वयव्यतिरेकानुविधा
यीति व्याप्त्या मनोनिर्वाणराजदर्शनयोः कार्यकारणभावो ग्राह्यते॥ उक्ते तत्र च तु उत्तरार्द्धीयकार्यकारणभावः॥ साक्षादे
व पूर्वार्द्धीयकार्यकारणभावग्राहक इति भेदः॥ विशेषान्वयव्यतिरेकानुज्ञानस्यैव सामान्यकार्यकारणभावग्राहकइ
ति भेदः॥ विशेषान्वयव्यतिरेकानुज्ञानस्यैव सामान्यकार्यकारणभावग्राहकत्वमिति सिद्धान्तात्॥ तेन च यत्र पूर्वकार्यकार

राम:
६१

राभावे साक्षात्कारे वोन्तरकार्यकारणाभावोनुकूलस्योक्तेर्निदर्शना॥ यत्र तु पूर्वकार्यकारणाभावग्राहकस्य वोन्तरकार्यकार
णाभावोनुकूलस्य तत्र दृष्टांत इति विवेकः॥ यथैवमसत्त्वल्लमतिप्रसवितेन॥ अत्र केचित्॥ ललितमप्यलंकारांतरमेव॥ य
त्प्रकृते वाक्यार्थमनुपन्यस्य तत्प्रतिबिंबभूतवाक्यार्थांतरमात्रमुपन्यस्यते॥ यथा प्रस्तुते वर्णनीयवाक्यार्थे प्रतिबिंबस्य व
र्णनं॥ ललितं निर्गते नीरे सेतुमेषा चिकीर्षति॥ अत्र ललितमिति लक्ष्मोक्तिः॥ पूर्वार्द्धं लक्ष्यं निर्गतमित्याद्युदाहरणं॥
इयं हि दाक्षिण्यादुपागते नायके प्रति निर्वेदनाद्विनायिकांतरसक्ते सति तदानयनाय प्रेषयितुकामां नायिकां प्रति सख्या उ
क्तिः॥ तत्र च प्रस्तुतवाक्यार्थमपहाय तत्सदृशनीरनिर्गमोत्तरकालीनसेतुबंधकरणोद्योगरूपोर्थ उक्तः॥ न ह्ययमप्रस्तुत
प्रशंसा॥ प्रस्तुतधर्मिकत्वात्॥ नायकानयनेच्छावत्या नायिकाया एव तादृशसेतुकरणोद्योक्तेः॥ नापि समासोक्तिः॥ प्रस्तु
तवृत्तांतेनाप्रस्तुतवृत्तांतप्रतीतेरेव तद्विषयत्वात्॥ अत्र चाप्रस्तुतेन प्रस्तुतवृत्तांतप्रतीतेः॥ नापि निदर्शना॥ प्रस्तुताप्रस्तु
तवृत्तांतयोः शब्दोपात्तयोरैक्यसमारोपस्य तत्राभ्युपगमात्॥ यदि च शब्दोपात्तयोर्विषयविषयिणोः प्रवर्त्तमानस्यैवालंका
रो विषयमात्रोपादाने प्रवर्त्तते॥ तदातिशयोक्तेरपि रूपकस्यांतर्भावप्रसंगः॥ विषयविषयिणोः शब्दोपात्तत्वे शाब्दं रूपकं॥ वि
षयिमात्रोपादाने त्वार्थमित्यपि वक्तुं शक्यत्वात्॥ सारूप्यनिबंधनायामप्रस्तुतप्रशंसायामप्यतिशयोक्तेरेवापत्तेः॥ तत्रा
प्यप्रस्तुतधर्मिवाचकपदस्य प्रस्तुतधर्मिलक्षकत्वसंभवात्॥ न च तत्र सरूपादप्रस्तुतवाक्यार्थोऽवगम्यते॥ अ

तिशयोक्तौ तु विषयिवाचकपदेर्थिविषयालक्ष्यते इति वाच्यः । इहापि प्रस्तुतगतत्वेन वर्ण्यमानाद् अप्रस्तुतवाक्यार्थात् प्रस्तुतध
र्मितया प्रस्तुतवृत्तान्तरूपस्य तत्प्रतीतिरिति तद्वत् भावो नैव स्यात् । अप्रस्तुतस्वपदेन निर्दिश्यते न चाप्रस्तुतवर्णनारूपवि
च्छित्तिविशेषसद्भावाच्च ॥ यथा नीलोत्पलदृशां दृशामित्यादिश्लोके तु प्रस्तुतस्य कस्यचिद् भूमिशोभापादनादतिशयोक्तिरेव ॥ एते
न गतजले सेतुबंधवर्णनादिष्वसंबंधे संबंधरूपातिशयोक्तिरत्नीत्यपि निरस्तं । तथा सति कस्त्वं भोः कथयामि दै
वहतकं मां विद्धि शाखोटकं वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते । वामेनात्र वटस्तमध्वगजनः सर्वात्मना
सेवते न च्छायापि परोपकारकरणी मार्गे स्थितस्यापि मे ॥ इत्याद्यावपि तद् इतिशयोक्तेरेवापत्तेः ॥ अप्रस्तुतवाक्यार्थतासह
च्छायाप्रस्तुतवाक्यार्थरूपविच्छित्तिविशेषशालालंकारान्तरत्वमिति चेत् तर्हीहापि प्रस्तुतधर्मिगतत्वेन वर्ण्यमानाद् अप्रस्तु
तवृत्तान्ताद् तद्गतत्वेन प्रकृतवाक्यार्थप्रतीतिरूपविच्छित्तिविशेषसद्भावाद् अलंकारान्तरत्वमेव कल्पयितुमुचितमिति स
र्वालंकारविलक्षणमिदं ललितमिति ॥ अनंतरं च हरसूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ॥ तितीर्षुर्दुस्तरं मोहादुडु
पेनास्मि सागरं ॥ इति काव्यप्रकाशकारीयनिदर्शनोदाहरणमप्युक्तमेव ॥ ईदृशमत्या सूर्यवंशवर्णनमिच्छामीति प्रस्तुत
धीनुपन्यासात् ॥ एवं अनादिदेशः कृतमस्त्वयायव संतमुत्के स्यदर्शांव नस्या । त्वयापि संकेततया कृतार्था अव्यापि नाने
न जने न संशा ॥ अत्र कृतमोदेशस्त्वयायपदित्यक इति प्रस्तुतार्थ यत् नुपन्यस्य व संतमुत्के स्यवनस्य दर्शन माया तितन्मतिविं

वम्भूतार्थमात्रोपन्यासादयमेवालंकारश्रति॥ तत्र वदंति॥ यत्राप्येकधर्मिकप्रस्तुताप्रस्तुतव्यवहारद्वयोपादा
नन्निवंधनानिदर्शनेत्यत्र विवादाभावस्तत्रापि व्यवहारद्वयवद्धर्मिभेदप्रतिपादनाक्षिप्तोप्य व्यवहारद्वयाभेदइति
वाक्यार्थनिदर्शनास्वरूपं तत्रप्रतिपादनं श्रौतमेवेत्यत्र नाग्रहः॥ किंतु प्रतिपादनमात्रं॥ एवं च प्रस्तुतार्थस्य
शाब्दानुपादानेपि आर्थतदादाय एव निदर्शनायामेवैतदंतर्भाव उचितः॥ अन्यथा तु प्रोपमादेरप्युपमावहि
र्भावापत्तेः॥ यत्तु अतिशयोक्तिरेव रूपकसंभवादिहिल्लीयेतेति॥ तन्न॥ यत्र स अलंकारशरीरक्रमयत्राप्यविलक्षणं
तत्रैकस्यवालंकारेणगतार्थत्वेऽलंकारशरीरस्यवैलक्षण्ये तु पृथगेवालंकार इति व्यवस्थितेः॥ प्रकृतस्थले च प्र
स्तुतवृत्तांतस्य शाब्दार्थत्वयो रुभयत्रापि शरीरवैलक्षण्याभावादेकालंकारत्वमेव युक्तं॥ रूपके तु विषय
तावच्छेदकरूपेणाभासमानस्यैव विषये विषयितावच्छेदकावच्छिन्नाभेद स्यातिशयोक्तिशरीरमिति वैलक्ष
ण्येन तदुभयोः पार्थक्यस्य व्यवस्थापनात्॥ आहार्यनिश्चयविषयीभूतो विषये विषय्यभेदः रूपकं॥ तत्र विषयता
वच्छेदकरूपेणोपस्थितेर्विषयविशेषणत्वे गौरवेण तदनिर्देशादेवं च भेदप्रसिद्धरूपातिशयोक्तावप्यह्नुतेर
पि रूपक एवांतर्भाव इत्यत्रक्षस्यभावादिव्यापत्तिरित्यतिशयोक्तेरपि रूपकांतर्भावस्वीकर्तॄणां मते तु ललितस्यालं
कारांतरत्वशंकापि न संभवतीति रसगंगाधरकृतः॥ इति निदर्शना॥ अप्रस्तुतप्रशंसा प्रकृतप्रतिपत्तिरेतया यत्र॥

कार्यहेत्वोर्व्याप्यव्यापकयोरन्ययोः समेतस्य ॥ यत्राप्रस्तुतार्थप्रोक्तात्प्रस्तुतार्थप्रतीतिर्जायते साप्रस्तुतप्रशंसा ॥
समासोक्तौ तु प्रस्तुतेनाप्रस्तुतप्रतीतिरिति विशेषः ॥ एतद्भेदानाह ॥ कार्य इति ॥ सप्तम्यन्तेषु प्रकृते इत्यन्वीयते ॥ अन्यत्वं
च प्रकृतनिरूपितप्रतियोगिकं ग्राह्यं ॥ तथा च कार्ये प्रस्तुते कारणस्य ॥ कारणे प्रस्तुते कार्यस्य ॥ व्याप्यव्यापकसामा-
न्यविशेषपरस्परविशेषे प्रस्तुते सामान्यस्य ॥ सामान्ये प्रस्तुते विशेषस्योक्तिरिति चत्वारो भेदाः ॥ तुल्ये प्रकृते तुल्योक्ति-
रिति पञ्चमः ॥ तत्र कार्ये प्रस्तुते कारणस्योक्तिर्यथा ॥ तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं किं वक्षश्च-
रणानतिव्यतिकरव्याजेन गोपायते ॥ इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया साश्लिष्टा रभसेन तत्सुखवशा-
त्तन्व्याश्च तद्विस्मृतं ॥ अत्र किं तत्त्वया त्वयि मानो मुक्त इति कार्यमात्रं प्रष्टुं सखीं प्रति नायकेन मानत्यागकारणमु-
पन्यस्तं ॥ कारणे प्रस्तुते कार्याभिधानं यथा ॥ तं सेतुयाम्भि ज्ञा अंकलेवगंधेराजंगआसोहं ॥ इअरागज्ञि अस-
दो जीये राविराने वोल्लंतो ॥ एतेन त्वद्विरहबाधातस्याः प्रतिमात्रमुञ्चन्तेति इति प्रस्तुते मोहरूपे तत्कार्यमुक्तं ॥ सामान्य-
प्रस्तावे विशेषवचनं यथा ॥ रणाउत्ततां रणाउपाशि अंसव अंसहंगाणं ॥ तह वि मअ अमाणामइरा अआमरणाता
इपमसाद् ॥ अत्र निसर्गप्रेमातुयाधिं नापेक्षत इति सामान्यवाच्ये विशेष उदाहृतः ॥ विशेषे प्रकृते सामान्योपन्यासो य-
था ॥ सिंहं लहंति कलिअंसरांति खलिअक्खवंनं जंपंति ॥ जहिदराद्दिहोसि तुमं ताउंसि अप्पहअसुहिआउं ॥ अत्र

यद्यहं त्वां नाद्राक्षं तर्हि सुखिता भविष्यमिति विशेषवाक्ये समासमुक्तं ॥ तुल्येन तेष्यामिधानेत्रयः प्र-
काराः ॥ श्लेषः समासोक्तिः सादृश्यमात्रं च ॥ यद्यपि हि द्वयोरेव प्रकृतत्वे द्वयोरेवाप्रकृतत्वे वा श्लेषोन्मेषः
प्रकृतेऽप्रकृतव्यवहारारोपे तु समासोक्तेरुल्लासः ॥ तथापि तदाभासत्वात् तयोरुक्तमित्याहुः ॥ एतेन तादृश-
स्य श्लिष्टविशेषणसाम्यस्य प्रकृतप्रशंसानन्तु समासोक्तेस्तदनुग्राहकत्वं तस्याः एतदलंकारविरुद्धत्वे
नानुग्राहकत्वायोगात् ॥ यत्तु काव्यप्रकाशे समासोक्तेरनुग्राहकत्वमित्युक्तं ॥ तत्र ॥ प्रतीयमानवृत्तान्तस्य
प्रस्तुतत्वेऽनुग्राहिकायाः समासोक्तेरेवाभावात् ॥ प्रस्तुतस्य वाच्यतायामेव तदभ्युपगमात् ॥ अप्रस्तुत-
त्वे त्वनुग्राह्याया अप्रस्तुतप्रशंसाया एवाभावात् ॥ अप्रस्तुतवृत्तान्तस्य वाच्यतायामेव तदभ्युपगमात् ॥
इति दूषणं श्लिष्टविशेषणाश्लिष्टद्वितीयार्थमात्रं समासोक्तेरित्यभिप्रायेणावा कथंचित्समाधेयमिति
योजनं वरसगंगाधरीयमपास्तं ॥ तत्र श्लेषो द्विधा धर्ममात्रे ॥ धर्मधर्मिणोर्द्वयोश्चेति भेदात् ॥ तत्र धर्म-
मात्रश्लेषे यथा मम ॥ मित्रस्यावहपक्षपातघटनो सेव स्वदुर्गं जलं पद्मानां तु सह समाश्रय कुरु त्वं

कंटकानां वृतिं ॥ विष्वग्व्याप्य वरणात्तु दीरयति विधेहेसेवं विधेयानलीनन्यप्रकारस्तु सरोजं तुः अतिकटुः कोताक
दाख्याहितः ॥ अत्र विशेष्यगामित्वयोजनपदं न क्लिष्टं ॥ विशेषणाविशेष्योभयश्लेषे यथा ॥ रसिअवि अहंवि
लासिअसंभअगुअसग्गअं असो ओसि ॥ वरजे अइवरणा कमलाहउं विजं वि असासिसतहुं ॥ अत्रहि
तत्सदृशः कामशास्त्राभिज्ञो युवा प्रतीयते ॥ न चात्र श्लेषस्य बोभयार्थबोधक इति वाच्यम् ॥ अशोकपरस्य ह
स्तिरूढत्वेन प्रथममेव तत्प्रतीतेः ॥ तदुक्तं ॥ अवयवशक्तेः समुदायशक्तिर्बलीयसीति ॥ न च प्रकरणादि
सत्वे योगार्थस्य बलवत्त्वाबाधान्न ॥ यथा तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र वाजि
पदस्याश्वे रूढावपि वाजमन्नं अस्त्येषामिति व्युत्पत्त्या आमिक्षारूपान्नयोगिनां विश्वेषां देवानामेवो
पस्थितिरिति वाच्यं ॥ प्रकरणादिकालीनयोगशक्तिजन्यबोधस्य समुदायशक्तिजन्यबोधप्रति
बंधकतया अशोकपदात् शोकाभाववत्पुरुषबोधकाले वृक्षत्वप्रकारकबोधविरहे श्लेषवि
रहो ॥ इयांस्तु विशेषः ॥ यत्पुरुषपरत्वज्ञानाभावकाले वृक्षत्वप्रकारकबोधस्योत्पत्त्या तत्र प्रस्तुत

प्रसंगात्त्वं निर्बाधं॥ तत्सत्वेपि पुरुषस्यैव प्रकृतत्वेन ज्ञानविरहे तेतोरस्य त्वङ्काकारकज्ञानोत्पत्त्या तदेव निराबा
धं॥ अत्रैव पुरुषस्य प्रकृतत्वज्ञानेन तु समासोक्तिरेवेति॥ समासोक्त्या यथा॥ येनानंदमये वसंतसमये सोरम्य
हेलावलद्भृंगालीमुखरे रसालशिखरे नीताः पुरा वासराः॥ आः कालस्य वशेन कोकिल युवा सोयं
सर्वी दिशः खेलद्वायसचंचुघातविदलन्मूर्द्धा स्तुहुर्ध्वं वसति॥ अत्र कस्यचित्स्वामिनः प्रसादेन सुखातिवा
हितदिनस्य पश्चात्दुर्जनैः पीड्यमानस्य सत्पुरुषस्य प्रतीतिः॥ यथा वा॥ नाभ्यासो न भक्तिक्रमैः करहृद्दैन्यं को
यमालेपितं जंघालत्वमभून्न भूधरगुहापर्यंतमूलं घने॥ पादुस्तन्यमनादरात्तु लयिता हस्तेयं वसिं
ही शिशोर्हा गम्यानद्भ्रवनिम्नगाः करटिनां गंडेषु गंडूषिताः॥ यथा वा मम॥ तत्र द्रोहदवद्भ सोहृदमरास्त
स्तिमहानोकहा वंहीयां सहहासतेकुरवक त्वांत्वेकमेवत्वहं॥ तारुण्यं पाद पुरंध्रि पीवरकुचा प्रत्यूह निःपी
डना सा काक्षं कलयाम्यशोकरसिकश्रेणी शिरः शेखरं॥ अत्र कस्यचिद्रतिरसिकस्य कामिनीकुचपरि
रंभलोलुपत्वरूपधर्मस्य अप्रकृते कुरवके आरोप्यमाणस्य अवच्छेदकतया प्रकृतपुरुषप्रतीतेः॥ समा

सोक्तिरूपा॥ ननु समासोक्तिरेव॥ प्रकृते ऽप्रकृतव्यवहारारोपस्य तत्त्वात्॥ अत्र चाप्रकृते प्रकृतव्यवहारा
त्॥ सादृश्यमात्रे रा यथा मम॥ इंद्रोपेंद्रौ मिथस्त्वेन विहृय महतां सोदरस्नेहवद्भ्यो वाटस्थानं त्वदीर्ष्यापरिगम
नमुखं यातवान्पारिजातः॥ किंतु स्फूर्जद्रूलमत्र खकुलिशाघ्रिरवाभित्रमातंगपाताघातापातालखा
तेवत फलतिमस्यापारिजातेक्रमो यो॥ अत्र कयोश्चित्त्वादृशप्रतिवादिनोर्विरोधे तटस्थस्य कस्यचित्प्रीत
यां प्रकृतायां पारिजातहृदयप्राप्तिप्रसिद्धपारिजातपर्वतत्यागतत्सादृश्येन प्रकृतप्रतीतेः॥ सादृश्येन प्र तद्वतां ५
तीतावपि त्रयः प्रकाराः॥ क्वचिद्वाच्यार्थव्यंग्ययोर्भेदानारोपयासरूपोक्तधर्मस्य वाच्यव्यंग्योभयसाधार
णेन वाच्येप्युपपद्यमानत्वात्॥ यथा॥ धूममद्लोऽपि पंकं किमु वितरसा रदू अरे हंभरसोवि॥ तद्
विगम्य स्त्रिआगरू अत्र शोराठक्कं समुवहद्॥ परिछद्दहीनं जननिंदितं च नायकं कामयमानाद्युक्
क्तिः॥ छलीमालिनीस्यादीनां गजेसत्वेन व्यंग्यनायकनिष्ठधर्माध्यारोपानपेक्षा॥ क्वचिद्वाच्ये व्यंग्य
धर्माध्यारोपेण यथा मम॥ देवस्यास्य त्रिभुवननमस्कार्यपादांबुजस्य स्थित्वा मूर्ध्नि पवित्रिधूमले

मामदस्तेयप्रसाक्षीत्॥ जूदावं धावसरगुरिणतक्रूरकं भीनसेंद्रस्कन्दाद्विगावलिकं वलितालप्यसतद्धि
पाकं॥ अथो चेतनायां विष्णुकलायां संबोध्यत्वं मदप्रसक्तिस्थितिद्व यमनुपपत्रं अंजनीयोनम पुरुषाद्
तकुटिलनायिकाधमत्वादारोपितं॥ कश्चिदं शावच्छेदेनाध्यारोपानध्यारोपाभ्यां॥ यथा॥ शैत्यं नाम ग
यासक्तैव वसद्गः स्वाभाविकी स्वच्छता किं कूमः स्फुचितोभवति स्पृशयः स्पर्शेन यस्यापरे॥ किं नान्यत्कथ
यामिते स्तुतिपदं स्या श्रीवितं जीविनोत्वं वेत्री चपथेनगच्छसिपथः कस्त्वां निरोद्धुं क्षमः॥ अत्र केचित्सद्
द्वंद्वप्रतिगृणाप्ररव्यापनपूर्वकं उपालंभो ध्योत्यः॥ तत्र शैत्यं स्पर्शविशेषो जलीयविशेषगुणत्वेन रव्यातः॥
परशैषेधिक्रोधपारतंत्र्याभावरूपाक्षमा च॥ स्वच्छता द्रव्यांतरावयवासंकीर्णत्वं॥ जन्मविद्याकर्मभिः न
सुद्धिमत्त्वं च॥ शुचित्वं उपघातकसंसर्गराहित्यं उभयत्रापि॥ जीवनत्वं चतत्कारणत्वं॥ नीचपथोनिम्नमा
र्गः॥ निषिद्धाचारश्च॥ एवं च स्पर्शविशेषादिसंबंधेन श्लाघ्यत्वाभावात्॥ तेषु क्षांत्यादित्वारोपः॥ तथा निम्न
मार्गगामित्वेन निंदानुपपत्त्या तत्र निषिद्धाचारत्वारोपः॥ शुचित्व जीवनत्वयोः स्तुतिहेतुत्वादेवनान्यारोपा

९६

पेक्षेति॥ एवं रक्षांत्यायामेदाध्यवसिते न शैत्यादिना कुश्चित्वादिना च पुष्टे नैव स्तुतिर्निषिद्धा तारामेदाध्यवसि
ते न च निम्नमार्गगामित्वेन निंदा या तु पर्यवसितिरिति वाच्यार्थसिद्धिः॥ एवं प्राचां मतमनुपपन्नत्वात्पंचभेदा व्याख्याताः
दीक्षितास्तु संबंधांतरेणाप्रस्तुतगमनेऽप्येषा दृश्यते॥ यथा॥ तापत्रयौषधवरस्य तव स्मितस्य निःश्वास
मंदमरुतां निवशीकृतस्य॥ एते करंडकरयाद्भवविप्रकीर्णा जैवातृकस्य किरणा जगति भ्रमंति॥ अत्राप्र
स्तुतानां चंद्रकिरणानां भगवन्मंदस्मितरूपदिव्यौषधविशेषकरंडकरतादात्म्यात्प्रस्तुतस्य स्मितस्यात
न्सारतारूपोत्कर्षप्रतीतिः॥ न चात्र स्मितकरंडकरयोः कार्यत्वादिः कश्चिदुक्तसंबंधोऽस्ति॥ अतो वस्तुहे
त्वभ्यादिकमेव संबंधतया स्वयरणीयं॥ एवं कार्यकारणयोः प्रत्येकमेवाप्रस्तुतार्थप्रत्यायकत्वमभि
संधाय द्वे अप्रस्तुतप्रशंसे दर्शिते॥ ततोऽन्यत्रापि दृश्यते॥ यथा॥ कालिंदीकूलकुंभोद्भव जलधिरहं नाम गृ
ह्णासि कस्माद्युद्धो मे नर्मदाहं त्वमपि वदसि मे नाम कस्मात्सपत्न्याः॥ मालिन्यं तर्हि कस्मादनुभवसि मि
लत्कज्जलैर्मालवीनां नेत्रांभोभिः किमासां समजनि कुपितः कुंतलक्षोणिपालः॥ अत्र किमासां समजनी

ति मालवीनां शेरननिमित्ते पृष्टेन तत्प्रियमरणरूपनिमित्तमनाख्याय कुपितः कुंतलस्योग्रीपाल इति तत्का
रणमनभिहितमिति कारणानिबंधना॥ अत्रैव मालवान्प्रति प्रस्थितेन कुंतलेश्वरेण किं ते निर्जिता इति प्र
श्नेतद्वधांतर्भाविनस्तदा प्रश्नोत्तररूपं कार्यमभिहितमित्येव कार्यनिबंधनापि॥ पूर्वस्याप्रश्नः शाब्द उत्तरस्या
र्थ इति विशेष इत्याहुः॥ अत्रेदं चिंत्यं॥ स्मितकरंडकरचययोः कार्यत्वादिसंबंधाभावे प्यभेदाध्यवसाय
विषयीभूतदिव्यधान्यसहकरंडकरचययस्यानयनाव्यविभावचयसत्वेन कार्यत्वसंबंधोस्त्येव॥ नच यद्रू
पावच्छिन्ने प्रस्तुते अप्रस्तुतव्यंग्यार्थः प्रतीयते तद्रूपावच्छिन्ने प्रकृते अप्रकृतस्य कार्यत्वादिसंबंधोऽपेक्षितः॥
अत्र तु स्मितत्वावच्छिन्ने रचविस्मिते सारत्वस्योत्कर्षः प्रतीयते॥ ननु दिव्यधान्यतादात्म्यावच्छिन्ने॥ अतो दिव्यधा
न्यकरंडकरयोरुक्तसंबंधसत्वेपि स्मितकरंडकरयोस्तदभावात्संबंधांतरानुसरणमावश्यकमेवेति वा
च्यं॥ अप्रस्तुतव्यंग्यार्थप्रकारकज्ञानविशेष्यभूते प्रकृते अप्रकृतमात्रसंबंधस्यैव लाघवेन विवक्षितत्वात्॥
व्यंग्यार्थबोधधर्मितावच्छेदकीभूतधर्मावच्छिन्नत्वनिवेशगौरवात्॥ विशेष्यत्वं च तत्वेन विवक्षितत्वमात्रं॥

अतः स्मितस्यैवं ज्ञानविषयशेष्यतया तत्याप्रकृतसंबंधो नास्तीत्याकारकदोषाभावः॥ न हि शेष्यत्वेन विवक्षित
स्य स्मितस्य हर्षव्यंग्यतादशायामप्यवसायदशायां प्रकृतसंबंधसत्वात् एवं द्वितीयदोषस्याप्यवकाशः॥ त
था हि॥ तत्र किं उभयोरप्येकत्र दर्शनेन प्रत्येकं तत्प्रयोजकत्वानुपपत्तिरिति विवक्षितं॥ उत कारणाकारणास्य मा
यं कार्यस्य च निर्देशात्॥ कार्यत्वकारणत्वाभाव इति॥ नाद्यः॥ केचित्प्रत्येकपुरस्कारेणात दर्शनादुभयोः प्रत्ये
कं प्रयोजकत्वे स्थिते किंचिदुभयसमावेशस्यादोषात्॥ अन्यूनत्वानापादकत्वाच्च॥ तथाप्येकस्यामेवाप्रस्तुतप्रशं
सायां द्वयोः संबंधयोरप्रयोजकत्वाच्च॥ संबंधनिबंधनयोर्द्वयोरप्रस्तुतप्रशंसयोरेकत्र निबंधमात्रेणातदातिरेका
भावाच्च॥ न द्वितीयः॥ कार्यकारणपरयोः प्रयोज्यप्रयोजकभावसाधारणपतायाविवक्षितत्वात्॥ एवं च मालेवीरो
दनेकारणीभूततत्प्रियमरणाकारणकं तल्लेशकारणमात्रोक्तौ तत्प्रस्थानेकार्यविजयकार्यप्रश्नादिमात्रोक्तौ
च तस्यानयायाशिति कृतं बहुना॥ प्रकृतम्॥ प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुतांकुरः॥ किं भृंग सत्यां मालत्यां के
तकीं कंटकेद्धयसा॥ अत्र वाच्यव्यंग्ययोः तयोर्द्वयोरपि प्रकृतत्वेस समासोक्त्यप्रस्तुतप्रशंसाभ्यां अतिरिक्तत्वस्य सू

द्भावात्॥ प्रस्तुतनिषिद्धं जनकतानिरूपितव्यंग्यताप्रस्तुतत्वा॥ अप्रस्तुतत्वं प्रस्तुतनिषिद्धं जनकतानिरूपितव्यंग्यताशा
लिप्रस्तुतकत्वे च तदुभयोपयोगात्॥ अत्र हि प्रियेयं सहविहरंत्याऽत्मैव भंगापि प्रकृतस्य वा॥ न च भंगसंबोधनानुपपत्त्या
प्रियमात्राभिप्रायेणैव यमुक्तिरिति वाच्यम्॥ अचेतनेष्वामंत्रणादर्शनेन तद्विरोधात्॥ एवं च प्रस्तुतेन वाच्येन भंगोपा
लंभेन यन्यायाः कुलवध्वाः सौंदर्यादिगुणशालिन्याः स्वैरजनपरिवृतायां सर्वस्वापहरणसंकल्पदुराशयायां कुटकाकु
लकेतकीकल्पायां वेश्यायां समागमे न किमित्युपालंभो व्यंग्योऽस्ति॥ यथा वा अन्यासु तावदुपमर्दसहासु भृंग लोलं विनो
दय मनः सुमनोलतासु॥ मुग्धामजातरजसं कलिकामकाले व्यर्थं कदर्थयसि किं भ्रमरः सदैव॥ डोठां गमनासेव्यापि वा
लां कैशोरयति कामिनि प्रकृतभंगोपालंभेन तत्प्रतीतिः॥ यथा वा कोशद्वंद्वमियं दधाति नलिनी कादंबचंचुक्षतं धत्ते चूतल
तानवं किसलयं पुंस्कोकिलास्वादितं॥ इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घिकायास्तटे चेलांचेन तिरोदधे स्तनतटं
बिंबाधरं पाणिना॥ अत्रेयमिति दीर्घिकेति चोक्त्या वाच्यार्थस्य प्रस्तुतत्वनिर्णयः॥ नायकदंतक्षतांकिताधरविशिष्टना
यिकारूपप्रकृतव्यंग्यार्थप्रकाशनेन च चतुर्थचरणादेव स्पष्टं॥ अत्रोदाहरणद्वये ऽन्यापदेशध्वनित्वं प्राचीनैरुक्तं॥

का॰कौ॰
९९
६४

अप्रस्तुतप्रशंसायां अप्रस्तुतत्वेन वाच्यार्थस्यावर्णनीयतया तत्राभिधायाविरहतायां वाच्यार्थेनाक्षेपात्प्रस्तुतार्थव्यक्तिरलं
कारः॥ सइह तु वाच्यार्थस्यापि प्रस्तुतत्वेन तत्रैव पर्यवसानसंभवेपि वस्तुसौंदर्यबलेनाभिमतार्थव्यक्तिर्ध्वनिरेवेति वस्तुतो ग्रा
प्यलंकारध्वनित्वमेव॥ तृतीयस्यानलंकारत्वे तु न कस्यचिद्विवादः॥ व्यंग्यार्थस्य चतुर्थे चरणे न वाच्यत्वमापादितस्य ध्वनि
त्वायोगात्॥ शाब्दार्थशक्त्याक्षिप्तोपि व्यंग्योर्थः कविना पुनः॥ यत्राविः क्रियते स्वोक्त्या सैवान्यालंकृतिर्ध्वनेरिति ध्वनिकारोक्ते
रिति॥ तत्र रसगंगाधरकृतः॥ अत्राप्यप्रस्तुतप्रशंसैव भवतीति नालंकारांतरकल्पनं॥ किंचिदुक्तिवैचित्र्येण तत्कल्पनेऽलं
कारानंत्यप्रसंगात्॥ न चैतल्लक्षणाक्रांतत्वमेतदितिवाच्यम्॥ न ह्यप्रस्तुतत्वं सर्वथा प्रस्तावराहित्यं विवक्षितं॥ किंतु मु
ख्यतात्पर्यविषयीभूतार्थातिरिक्तत्वं॥ इदं च सर्वथैवाप्रस्तुते प्रस्तुतेपि मुख्यतात्पर्याविषयीभूते च समानमेव॥ अतोत्र प्रसं
गादेस्तत्र सत्त्वमात्रेणाप्रकृतत्वे मुख्यतात्पर्यस्य नायकाद्युपालंभ एव सत्त्वादप्रस्तुतत्वेन प्रस्तुतप्रतीतिरिति तल्लक्षणा
क्रांतत्वं स्पष्टमेवेत्याहुः॥ इत्यप्रस्तुतप्रशंसा॥ अप्रकृतेन निगीर्णे साध्यवसानाश्रयात्प्रकृते॥ प्रकृतस्यान्यत्वेनोक्तौ य प॰
द्येवं स्यात्तत्पापतेतौ॥ स्यात्क्रम्यजनकपौर्वापर्यत्यागश्च सातिशयोक्तिः॥ यत्र साध्यवसानलक्षणाया उपमेयस्य उपमा

रामः
९९

नरूपत्वेनाविवक्षया उपमानपदमेव प्रयुज्यते सा प्रथमा॥ यथा चंद्रोयमित्यादौ॥ अध्यवसानं आरोपविषयस्य
आरोप्यमाणेन ताद्रूप्यविवक्षा॥ निगीर्णत्वं हि विशेष्यतद्वाचकपदेनानुपात्तेइत्यर्थः॥ तच्च मुखादिपदाप्रयोगानु
खत्वादिविधर्म्यानुपस्थित्या अनाहार्या अभेदबुद्धिः॥ रूपके तु मुखादिपदस्यापि प्रयोगात्॥ आहार्यैवाभेदप्र
तीतिरितितत्त्वं॥ एवं च मुखादीनां चंद्राभिन्नत्वेनोपस्थितौ अतिशयोक्तिरिति निःकर्षः॥ उपमेयतावच्छेदकधर्माव
च्छिन्नविशेष्यतानिरूपिताभेदसंसर्गकोपमानतावच्छेदकधर्मावच्छिन्नप्रकारताशालिबोधत्वं सारोपलक्षणा
या उपमेयतावच्छेदकधर्मावच्छिन्नोपमेयनिष्ठविशेष्यताकोपमानतावच्छेदकधर्मावच्छिन्नप्रकारताशालि
बोधत्वं च साध्यवसानलक्षणायाः कार्यतावच्छेदकमिति रहस्यं॥ यथा लतामूले लीनो हरिणपरिहीनो हिमक
रः स्फुरन्नाराकारापततिजलधाराकुवलयात्॥ धुनीते वंधूकं तिलकुसुमजन्माहि पवनो वहिर्द्वीरे प्ररांपपारे याम
तिकस्यापिकृतिनः॥ अत्र मुखनयनाधरनासिकारूपाणामुपमेयानां चंद्रकुवलयवंधूकतिलककुसुमरूपैरु
पमानैवाचकपदैस्तिरस्कारः॥ यथा विपुलनितंबींविंवमध्ये क्षामं समुन्नतकुचयोः॥ अस्यायतेनयनयोर्मम जीवि

तमेतदायाति॥ अत्रात्रिनेत्रकौमारलिकायां जीवितत्वारोपः॥ अतिप्रियत्वरूपसादृश्यसंबंधात्॥ इमामेव रूपकाति
शयोक्तिरिति व्यवदेशं वदन्ति लोकाः॥ रूपकातिशयोक्तिश्चेद्रूप्यं रूपकमध्यगं॥ पश्यनीलोत्पलद्वंद्वान्निःसरंतिशिताःश
राः॥ रूप्यमारोपाधिकरणं मुखादि॥ रूपकगमध्यगं स्ववाचकेपदमपहाय आरोप्यमाणार्थवाचकपदेनैव बोधस्थापितमि
त्यर्थः॥ यत्र धर्म्यन्तरवृत्तिसजातीयो धर्मस्तद्वृत्तिधर्मेणानवच्छिन्नतयोच्यते सा द्वितीया॥ यथा॥ अरालेउहतरा अरे अरा
स्थि अकाविदन्नराढ्या॥ सामासामरापआवशातारे हस्थिअराहोइ॥ अत्र प्रकृतनायिकावृत्तिलावण्यादि
कं नायिकान्तरवृत्तिलावण्यादिकजातीयमपि तद्विजातीयेतयोक्तमिति तदुत्कर्षप्रतिपत्तिः॥ क्वचिन्नस्यैवावस्थावि
शेषवशात्तयातत्स्माद्भेदः॥ यथा॥ तोचिरविउं अनतराउडरादूवाहोमहमउअजीआघाउं॥ताउं अरोस्विअसेविल
दूअधराउमेत्तवाडवीवाममुउं॥ अत्र समुद्रमेदनार्थधनुर्गृहीते श्रीरामभद्रे अस्य तत्पूर्वावस्थान्तरस्मादेवान्यत्वा
त्माऽतिचंद्रत्वप्रतीतिः॥ यत्र च केनचिदापादकेन किंचिदापाद्यते सा तृतीया॥ यथा॥ उन्मीलद्गुडपाकतंठुलेतयारञ्ज्वा
अमीरजेयनर्दीनां ततःकृतशर्करावलमवः स्वेनामृतां धाः स्मरः॥ नव्यामिश्रुरसोदधेर्यदि सुधामुत्पादयेत्साम

वजिह्वाया: कृतिमाहूयेत परमां मल्करीयो: पारणां॥ यथा वा॥ रवं: क्षोदमृदि स्थले मधुपय: कादंबि
नीवर्षरामात्केष्वेरो हृतिदोहदे न पयसां पिंडेन चेत्सुंदक:॥ सद्य: क्षाफलेसं चनेयदिफले धत्ते तदा त्वं द्रु
रामहे शाय ततो पुष्टेति मधुराधारस्समप्रत्यय:॥ अत्र तर्के आपादकस्य स्वतो सिद्धत्वानियमाद् यमे
यत्वाभिमतस्यानिरूपमत्वप्रतीति:॥ यत्र कारणकार्ययो: पूर्वापरभावो वक्तृत: शीघ्रकारित्वविव
क्षया विपरीतत्वेनोच्यते सा वक्रपथि॥ सापि द्विधा॥ पूर्वं कार्यस्य पश्चात्कारणस्योक्तौ द्वयोरस्तुल्यकाल
त्वोक्तौ च॥ आद्या यथा श्रीरुद्रदेवानां॥ नि:श्वासा: प्रथमं सदा वपुरमी धारा: कटंबानिलो वा ष्पा
भ: प्रथमं प्रपात बरमं धाराधरारां पय:॥ प्राक् प्राणा स्वपलत्वमीयुरसमं कामं ततो विद्युतेत्तिस्या
५८ स्त्वं हि विरहे शानि ईयम या हृष्ट: क्रमश्चैषसे॥ यथा वा॥ माद्यद्दे तंडगंडच्युतमदजलहरी संचरत्त्वं चरीकी जरूको
रानेरगीता: कवि भुवनभुवस्ता: पुरस्ताद्भवति॥ पश्चाद्वंति ते बाहुपरिकरणा या रामभूपालमौलेरुद्देशं हुंग
वी चिवहलधवलिमावद्धकक्षा: कटाक्षा:॥ अत्र राजदर्शनात्प्राग्वकवीनां संपत्तिरुक्ता॥ द्वितीया यथा म

म॥ यस्मिन्नशोकचकितकलमगोक्षणायाः कर्णान्तमूलमिममभिभ्रमितं वा कुराक्षः॥ तत्रैवं मन्मथशिलिमुख
मवयेन मन्मान संसमभवत् निश्चितं समंतात्॥ अत्र कुराक्षबाणावेधयोरैकस्सणा यन्नित्वप्रतिपादनात्तद्भा
वः॥ अत्रप्रथमातिशयोक्तौ प्रकृतप्रकृतेति सामान्यतश्चोपादानात्॥ शुद्धसाध्यवसानलक्षणा॥ अभेदोप
चारेपि अतिशयोक्तिरेव॥ तत्र धर्मभेदे धर्मभेदाध्यवसायो यथा॥ कर्णालंबितकदंबमंजरीकेसरारुणा
कपोलमंडले॥ निर्मलेनिगमवागगोचरं नीलिमानमवलोकयामहे॥ अत्र नीलत्वोक्त्ये भगवति नी
लत्वारोपः॥ चंद्रोयमित्यादौ साहृश्यस्याध्यवसाननिमित्तत्वाद्गौणत्वं॥ आश्रयत्वादिसंबंधस्य तन्निमि
त्तत्वेतु शुद्धत्वमितिविवेकः॥ भेदाविमोचसाहृश्यात्संबंधांतरतस्तथा॥ गौणो शुद्धौ च विज्ञेयाविति का
व्यप्रकाशोक्तेः॥ तस्मात्साहृश्यातिरिक्तेन संबंधेन यत्रान्यस्मिन्नन्यतादात्म्यारोपः सा शुद्धसाध्यवसा
नेति ज्ञेयं॥ कार्यकारणाभेदाध्यवसानं यथा॥ तो हृरिवदृजसपंथोराहृवजी अस्सपठमहृस्पालवो॥
सीआवाहृविमोक्खो दहृमेहृवक्कदि अद्दोउ अगईसरऊं॥ अत्र वाष्यविमोक्षहेतुत्वेन तदारोपः॥ प

पावामम॥ अत्र कोपि हृदयस्थापि अपतते: स्पष्टि दृशोर्वेधनं शोद्धासोम करध जस्य जगती वासमष्टं वांन्य कृतिः॥
उद्रेक प्रमद स्यावि अमतते निर्दिष्ट मम कुंभराणां प्रत्यासत्ति रसोरसस्य जयति त्रस्य कुरंगेक्षणया॥ एवं वामेदे ना
मिहेतुर्हितो हेतुमता सहेति साहित्यदर्पणे लोके हेत्वलंकारस्यैवेगंतर्भाव इति नातिरिक्तत्व शंका॥ तस्मा
द्वहसत्वेप्यमेदाध्यवसायस्य सर्वस्यामत्र निवेशो बोध्यः॥ द्वितीयमेदे यथान्यत्वे यथा कथं चिदिति तिमा
तेराययथा॥ सारामसारीयकानि चेरधिरेवतावासोंदर्यसार सकृदायनिकेतनं वा॥ तस्याः सर्वेनियतमिं
दुसुधामृणाल ज्योत्स्नादि कारणम भून्मदनस्य वेधा॥ अत्र मालतीसमवाधिकारणो वेधस्य चमत्का
लत्वाधारोपादन्यत्वारम्भः॥ यथा वा॥ अस्याः सरारुर्मधुरेव कारुः स्यात्संविते नेमलयानिलेन॥ अ
२२ त्रानिपुष्पविधिगकानिरकारवाचं पिकं पंचमेन॥ यथा मम उक्तिसरशीपरिणाये॥ आरब्धं प्रथमेन किं वि
रपिसेइद्धंनवारप्यते तैः कश्चित्तरमात्मभिः कमलभूः साहित्यरहंनिर्मम॥ अन्यारंभक निष्ठजातिसम
वधिनेयेदारभ्यते साहशंकि लतत्रिरूपितमहोतस्मिन्नेरेतिध्रुवं॥ अत्र सहेतुकोऽन्यत्वप्रतीयइतिवि

अ.कौ.
१०१
101

शेषः॥ एवं एकस्यैवाच्छर्वस्य स्थानभेदेन नानारूपतया प्रतीत्यापि भेदप्रतीतिः॥ यथा॥ प्रत्यम्भोनवपुंडरीककुमुकुल
क्रेणी प्रतिक्ष्माधरं पूरौ द्वारुरूपः प्रतिक्षितिरुहं मल्लीप्रसूनोत्करः॥ किं वान्यत्कथयामि वीर जगति मालिंगति
त्वद्यशो विस्तारे प्रतिदेशभेदविविधत स्रोतस्विनी निर्झरः॥ अनेकस्यापैव कीर्तेः स्थलविशेषेषु तत्तद्योग्यरूपे
णाध्यवसानम्॥ एवं अनेकस्य बहुभिर्ज्ञातृभिरनेकप्रकारैर्ज्ञानेपि॥ यथा॥ मल्लानामशनिर्नृणां नरवरः स्त्री
णां स्मरो मूर्तिमान् गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः॥ मृत्युर्भोजपतेर्विराडविदुषां तत्त्व
परं योगिनां वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः॥ न चेदं रूपकमेवेति वाच्यं॥ मल्लत्वसंबंध्यशनेर्दरप्रसिद्ध
तया तद्रूपतारूपतासंभवात्॥ प्रकृतमल्लादिनिष्ठाशनित्वप्रकारकज्ञानस्वरूपाभिन्नावेदनविषयत्वपर्यंति॥ ए
वं च निमित्तभेदादेकस्य वस्तुनो यदनेकधा॥ उल्लेखनं मनेकेन तदुल्लेखं प्रचक्षते॥ यथा॥ गजत्रातेति वृद्धाभिः श्री
कांत इति यौवतैः॥ यथास्थितश्च वृद्धाभिर्हृष्टः शौरिः कौतुकं॥ इत्यत्रोल्लेखालंकारपार्थक्यं दीक्षितोक्तं चिंत्यमिति
न्यायपंचाननादयः॥ एवं अस्याः सर्गविधौ प्रजापतिरभूच्चंद्रोनुकांतिप्रदः शृंगारैकरसः स्वयं नु मदनो मासो नु

रामः
१०१

पृथ्वीकरः॥ वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥ इत्यादौ
संबंधेऽप्यसंबंधरूपा॥ असंबंधरूपातिशयोक्तिभेदांतरं यद्रूपांतरेण रूपकं॥ तदपि न॥ सामासामसमेत्यादाविव वस्तुत
स्तु पर्यन्वत्वमित्यत्रैव तत्संग्रहादित्याहुः॥ तस्माद्यथाकथंचिद्भेदेऽपि भेदोक्तिरत्रैवांतर्भावेति सिद्धं॥ एवं एकस्यैव द्विधो
क्ते रैवप्यसौ विषयभेदतः॥ गुरुर्वचस्यपृथुरोयं कीर्तौ भीष्मः शरासने॥ इत्यत्र गृहीतभेदाभावेऽपि एकेनैव ज्ञाना एकस्यैव
द्विधाज्ञाने पृथुक्लेष इति दीक्षितमतं॥ तदपि भेदेऽप्यभेदरूपप्रथमातिशयोक्तावेव तदंतर्भावादुपेक्ष्यं॥ तृतीयभेदे पि कथं
चित्संभावितार्थकल्पनप्रतिपत्तिरेव विवक्षिता॥ यथा॥ अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः संख्यया प्रज्ञाचक्षुर
वेक्ष्यमाणबधिरप्रख्याः किल कीर्तयः॥ गीयंते स्वरमष्टमं कलयता जातेन वंध्योदरान्मूकानां प्रकरेण कूर्मरमणी
दुग्धोदधेरोधसि॥ अत्र यद्येवं स्यात्तदास्याः कीर्तिः स्यादिति तात्पर्यवसानं॥ एतेन संभावनं यदीत्यस्यादित्यूहोन्यस्यापि
सिद्धये॥ यदि शेषो भवेद्वक्ता क थितास्युर्गुणास्तव॥ किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थांतरकल्पनं॥ मिथ्याध्यवसितिर्वि
श्वां वशयेत्खसजं वहन्॥ इति संभावनमिथ्याध्यवसित्योः पृथगलंकारत्वमपास्तं॥ रसगंगाधरकृतस्तु॥ वेश्यामित्या

त्यादेर्निर्देशेनायमेवांतर्भावः॥ न चात्र मिथ्याध्यवसित्योः संकर इति वाच्यं॥ मिथ्याध्यवसितौ मानाभावात्॥ अन्यथा हरिश्चं
द्रेणासंतप्ता प्रगीता धर्मसूनुना॥ रेवलेति निशीथोत्संगमातंगेन सोत्सुकेना॥ इत्यादौ सत्याध्यवसितेरप्यलंकारत्वापत्तेरित्या
हुः॥ यत्तु असंबंधे संबंधरूपातिशयोक्तितः॥ किंचिन्मिथ्याध्यवसिद्ध्यर्थं मिथ्यार्थांतरकल्पनाविच्छित्तिविशेषरूपा मिथ्या
ध्यवसितेर्भिन्नत्वमिति॥ तदसत्॥ यद्यर्थेति रूपातिशयोक्तेर्विशेषस्य दुर्वचत्वात्॥ राकायामकलंकं चेत्॥ इत्यादावपि
तत्स्वरस्य अन्यसदृशतायां मिथ्याभूतायां राकाचंद्रिकायाः कलंकतायाः कल्पनाविशेषादिति दिक्॥ यत्तु प्रौढोक्तिरुत्कर्षाहेतौ
सिद्ध्यर्थं मिथ्याभूतायाः
तद्धेतुकल्पने॥ कचाः कलिंदजातीरतमालस्तोममेचकाः॥ अत्र यमुनाप्रकृतत्वस्य तमालानां श्यामताहेतुत्वं नास्ति॥ निमि
त्तकारणगुणानां कार्यगुणजनकत्वात्॥ तथापि श्यामतातिशयकल्पनात् प्रौढोक्तिरलंकारांतरत्वमिति॥ तदपि न॥ तत्रा
पि यदि यमुनातीरप्ररोहेण तमालानां नीलत्वातिशयः स्यात्॥ तदा केशानां श्यामतोपमा स्यादित्यत्रैव तात्पर्यात् तात्पर्यदपि य
१०१.
त्र धर्मिविशेषसंसर्गाद्धर्म्यंतरगतधर्मातिशयो व्यंजनव्यापारगम्यस्तत्र प्रौढोक्तिः॥ यदपि वाच्यवृत्त्यैव तदनुक्तत्वात् गम्यस्य
त्रैव समालंकारत्वं॥ यथा॥ त्वत्तो जन्म सुधांशुः खरतरज्योत्स्नाजिमग्नात्मनो दुग्धांभोनिधिमुग्धवीचिवलयैः साकं
परिक्रीडनं॥ संवासः सुरलोकसिंधुपुलिने वादः सुधांशोः करैः कस्मान्नो ज्वलिमानमंचति ततो मां देव त्वदीयं यशः॥ अत्र

यशसोधवलिमातिशयस्तत्तद्धर्मिसंबंधमप्रकृतत्वेन कथितः॥ अप्रकृतस्यैवेति तत्कृतो भगवतितत्कृतो राजनीत्येवं इत्थमरोत्त
रं उपचीयमानो राजगतस्तु शशादृत्वानुपातत्वात् प्रौढोक्तिरेव विषयः इति रसगंगाधरकारैरुक्तं॥ तदपि व्यंग्यसमालं
कारैरेवोपपत्ते उपेक्ष्यं॥ अर्वाचीनास्तु॥ उपमानेनोपमेयस्य निगीर्याध्यवसानमेवातिशयोक्तिः॥ प्रकारांतरे त्वति
रिक्तालंकारत्वकल्पनमेवोचितं॥ न चैतच्चतुष्टयसाधारणातिशयोक्तिलक्षणासंभवति॥ नेष्टं वैधर्म्याशाहरणा
मुक्तं॥ न चैतदन्यतमत्वसर्वानुगतमस्तीति वाच्यं॥ विवक्षितेवैलक्षण्यशापसत्वेऽन्यतमत्वस्याऽप्रयोजकत्वात्॥ अन्यथा उ
पमानेनोपकारादिकं तिथयान्यतमत्वं वातिशयोक्तिलक्षणं विधाय उपमादीनामप्येतद्भेदत्वापत्तेः॥ नवातिरिक्तालंका
रकल्पने गौरवमिति वाच्यं॥ प्रधानोल्केथैकत्वरूपस्यालंकारांतरत्वस्यत्वयाप्यंगीकारात्॥ पदार्थांतरस्यतम
याप्यकल्पनात्॥ अलंकारविभाजकोपाधिपरिगणनस्य च पौरुषेयत्वादित्याहुः॥ इत्यतिशयोक्तिः॥ सादृश्यपर्यवसि
तेयस्मिन्वाक्यद्वये धर्मैः॥ एकोपिद्विरूपात्तस्सा प्रतिवस्तूपमामाहुः॥ अन्योन्यमेकवाक्यात्तालाभार्थ उपमानोपमेयभाव
पर्यवसन्नेपोर्थचरसाकिं यादिरूपएक एव धर्मः प्रतिवाक्यं शब्दांतरेणानिर्दिश्यते सा प्रतिवस्तूपमा॥ प्रतिवस्तु उपमा
नोपमेयोभाभाय दिशिउपमानत्प्रयोजकसाधारणधर्मो स्यामिति व्युत्पत्तेरित्यर्थः॥ अर्थांतरन्यासवारणाय सादृश्य

अ.कौ.
१०३
103

तिः॥ तत्र तु समर्थ्यसमर्थकभावमात्रं विवक्षितं न तु साहश्यं॥ बिंबप्रतिबिंबभावेन दृष्टान्ते पि धर्मोपादानात्॥ तत्राति व्यभिचा
रत्वाय द्रष्टव्यः इति॥ तत्र भिन्नस्यैवोपादानान्न दोषः॥ यथा॥ त्वयि वीर विराजते परं दमयन्ती किल किं किलेति तद्॥ तरुणी
स्तन एव शोभते मणिहारावलिरामणीयकं॥ अत्र मणिहारो यथा तरुणीकुच एव भाति तथा मेधा विद्यासत्त्वे वेति
पर्यवसानम्॥ इयमेव वैधर्म्येण यथा॥ रसगंगाधरे॥ जीर्णा मृगरुक्षां पत्रूषाक्षराभिः क्लिष्टरचनाभि यान्तिरां तमहत्वं॥ अलंधशा
स्त्रोत्कर्षशाली न्यपारांगना तु मो लोमरायोवसति॥ अत्र शब्देन दृष्टान्ते न तु ततः सामान्यावच्छिन्नव्यतिरेकसहचार आक्षिप्य
ते॥ तेन च सामान्यावच्छिन्नान्वयनियमसिद्धिद्वारा विशेषावच्छिन्नान्वयनियमसिद्धिः॥ तथा हि॥ शास्त्रोत्कर्षशालाभावरूपमालिन्याभा
भावयोः शब्दात्प्रतीतावपि तेन न पूर्वार्द्धसमर्थनं संभवति यतः संस्काराभावोत्कर्षाभावयोः सहचाराक्षेपः॥ तेन च साहि
पर्ययेन तया संस्कारोत्कर्षयोरन्वयसहचारेण नियमसिद्धौ गुरुविनीतत्वरूपसंस्कारमाणोमहत्वमाक्षिप्य सिद्धमिति॥ एवम
न्वयगर्भायामपि प्रतिवस्तूपमायां नियमविशेषस्य प्रकृतवाक्यार्थत्वेऽन्वयदृष्टान्ते न सामान्यान्वयनियमसिद्धिद्वारा प्रकृ
तनियमविशेषसिद्धिः॥ यत्र तु नियमविशेषरहितः केवलार्थः प्रकृतः॥ तत्र त्वप्रकृतवाक्यार्थनिरूपितसादृश्यमात्रस्य प्र
तीतिः॥ न तु नियमस्यापि अप्रयोजकत्वात्॥ मेरुस्त्रीमासते वंद्योऽपि भाति भगानश्रुवेः॥ इत्यादावादृष्टान्ते दीपके इति न

राम:
१०३

तोभेदइत्युक्तं॥ सादृश्यपर्यवसाने चाव्ययापि विधिनिषेधयोर्न संभवति॥ तथापि निषेधविषयत्वस्य सादृश्ये नोध्यं॥ न द्वि
पर्यस्य वाक्यार्थत्वाभावात्कथं गम्यार्थयोरौपम्यमिति वाच्यः॥ वाक्यस्यैव यतामाद्यस्यैव न दर्पताया अभिव्यक्तितत्वादित्युक्तं॥ अ
र्थान्तरन्यासस्तु प्रस्तुतानामप्रस्तुतानां वा॥ दृष्टान्तस्तु प्रस्तुताप्रस्तुतानामिति विशेषः॥ किंच अर्थान्तरन्यासे दीपकं वैधर्म्येण न भवति॥ इयं
तु वैधर्म्येणापि दृश्यते॥ यथा॥ यदि संति गुणाः पुंसां विकसंत्येव ते स्वयं॥ न हि कस्तूरिकामोदः शपथेन विभाव्यते॥
इत्यादाविति दीक्षिताः॥ रसगंगाधरकृतस्तु॥ नेदं वैधर्म्योदाहरणं युक्तं॥ यथा॥ प्रस्तुतधर्मिविशेषगतत्वेनोक्तस्या
र्थस्य द्रढिम्ने यत्साक्षिणस्तद्व्यतिरेकसमानजातीयधर्म्यन्तरनिष्ठप्रकृतार्थकथनस्यैव वैधर्म्योदाहरणरूपत्वात्॥ यथा॥
गीर्भिर्गुरूणामित्यत्र नरगतत्वेनोक्तस्यार्थस्य द्रढिम्ने यत्साक्षिणस्तस्य कुरुविनीतत्वव्यतिरेकप्रयुक्तमहत्त्वव्यतिरेकस्य सजा
तीये मणिनिष्ठस्य शाणोल्लेखनाभावव्यतिरेकप्रयुक्तरूपमौल्लिवासत्त्वोक्तेः॥ साजात्यं च व्यतिरेकान्तरप्रयुक्तत्वादिधर्मेण॥ यथा
संभवं बोध्यम्॥ प्रकृते तु हारेरशौ तु यदि गुणाः संति तदा स्वयमेव प्रकाशंत इति प्रस्तुतोऽर्थः॥ तस्य तु व्यतिरेको ऽसंतस्तु प
यांतरेणापि न प्रकाशंत इति॥ इतरार्द्धे चैतत्सजातीयोऽर्थो निबद्धः॥ किंतु स्वयमेव प्रकाशंते न परैरिति प्रस्तुतार्थसजातीय
एव॥ शपथेन न विभाव्यते किंतु स्वयमेवेति प्रकृतार्थानुकूलतयाऽपर्यवसानात्॥ वैधर्म्यस्य प्रकृतानुरूपत्वस्या

घातादनुपपत्तेः॥ तस्मात्साधर्म्ये यो वेदमुदाहरणं तु तं॥ न चोपायांतरेण न प्रकारांतरत्वस्याक्षेपलभ्यत्वेन तदघटित
स्य प्रस्तुतवाक्यार्थस्य उपायांतरघटितोत्तरवाक्यार्थेन कथं साधर्म्योपपत्तिरिति वाच्यं॥ एवकारस्य स्वयमेतदुत्तरं घ
टनेनोपायांतरव्यावर्तनेऽपि पूर्ववाक्यार्थस्य घटकत्वात्॥ विकसेन्नेव क्रियासंगमंगीकारे विकासात्पेतायोगव्यव
च्छेदप्रतीतेरेवापत्तत्स्यात्तत्रोत्तरवाक्यार्थानुगृहीतत्वेन तत्परित्यागस्यावश्यकत्वात्॥ उत्तरार्धे उपायांतरव्याव
र्तनेऽपि तेनास्य पूर्वार्धेऽप्ययोगव्यवच्छेदस्यैवाश्रयितुमुचितत्वादित्याहुः॥ इयं चालंकारविषयेऽपि दृश्यते॥ यथा प्रस
न्नप्रशंसादिसमये यथा॥ इंदुर्लिप्त इवांजनेन जडिता दृष्टिर्मृगीणामिव प्रम्लानारुणिमेव विद्रुमदलं श्यामेव हेमप्र
भा॥ कार्कश्यं कलया च कोकिलवधूकंठेष्विव प्रस्तुतं सीतायाः पुरतश्च हंत शिखिनां बर्हाः सगर्हा इव॥ अत्र इव शब्दा नाम
पकृष्टत्वरूपरकोधर्मः प्रतिवाक्यभिन्नेनांजनेन लिप्तत्वादिनोक्तः॥ एवं॥ उत्क्षिप्तं सहकौशिकस्य पुलकैरित्यत्र एक
स्यैव साहित्यस्य सहसाक्षाद्दिशब्देनुपादानमिति वदंति॥ तत्रोभयत्रापि येकृतोक्तौ धर्मस्य शब्दांतरेणानिर्देशस्तेषां
कथंमिथस्तेषां सादृश्यपर्यवसानमिति विचारणीयं॥ इयं च मालारूपेणापि दृश्यते॥ किं शेषस्य भरव्यथा न वपुषि क्ष्मां
न क्षिपत्येष यत्किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः॥ किं त्वंगीकृतमुत्सृजन्कृपणवत्श्लाघ्यो जनो ल

अतो निर्व्यूढप्रतिपन्नवस्तुषु सतामेकं हि गोत्रव्रतम्॥ अत्र हि वस्तुद्वयं पादद्वयोपमेयार्थः॥ अप्रस्तुतोपमार-
ढुःसहत्वं तदपरित्यागस्य पूर्वार्द्धे उभयत्राप्युपादानं॥ एवं च यथा शेषाद्वयोर्दुर्वहमपि कार्यमशक्त्या न त्यज्यं-
ति॥ तथा महाजना अपीति फलितार्थः॥ इति प्रतिवस्तूपमा॥ साधारणस्य साम्यप्रतियोग्यनुयोगिनो-
र्यत्र॥ निर्देशः स्याद्धि बिम्बप्रतिबिम्बदृष्टतया स दृष्टान्तः॥ बिंबप्रतिबिंबभावेनैव यत्र साधारणधर्मस्याप-
मानोपमेययोर्हि द्वयुपादानं॥ न त्वेकत्वं स दृष्टान्त इत्यर्थः॥ प्रतिवस्तूपमायां त्वेकस्यैव वारद्वयं प्रयोगादिति व्या-
भिः॥ दृष्टोदाहृतग्रामारण्यके॥ अन्तोदाहृणान्तिकवाक्यार्थनिश्चयो यत्रेति कृत्यस्याप्रकृतवाक्यार्थप्रतिपाद्यकार्य-
कारणभावेनाख्यातत्कृदृष्टीभूतान्वयव्यतिरेकयोर्यथा यदन्वयव्यतिरेकानुविधायी सत तज्जन्य इत्यादिव्याप्योय-
जोत्तरवाक्यार्थो दृष्टान्तत्वेन पर्यवस्यतीत्यर्थः॥ तेन न निदर्शनासंकर इत्युक्तं प्राक्॥ यथा॥ सद्यः पापिसरो-
जासित्वमुदेदिदृष्टे मम॥ तमापि सौरभायैव सौरभ्या॥ अत्रैतापयोरानेदसौरभमध्ये स्य बिंबप्रतिबिंबभावस्य
शतपत्रस्य २६ तत्र नलानेदप्रतिभेस्या अन्वयव्यतिरेकाभ्यां कारणत्वेनाख्येयदन्वयव्यतिरेकानुविधायितत्तज्जन्यं यथास्य-
र्यप्रभाऽन्वयाद्यनुविधायिपद्मसौरभमिति द्वितीयार्द्धस्य दृष्टान्तत्वपर्यवसानम्॥ एतच्च साधर्म्येणावे[illegible]

र्थायथापवेल्लोति गम्भीरा गुणाद्भिवेशिनेर्थोगयोग्यासिनलेतरेणा॥ सहृभ्यते दर्भगुणोन मक्षीमालोनम्
हीमं शाकर्कशेन॥ अत्र पूर्वार्द्धे यद्यपि न लान्ययोगानर्हत्वमेवोक्तं॥ तथापि तावता न लयोग्यत्वएव तात्पर्यं॥ पा
र्थएव धनुर्द्धर इत्यादावन्ययोगव्यवच्छेदस्थले पि पार्थस्य धनुर्द्धरत्वावगमात्॥ अन्यथा तदानीं पार्थो धनु
र्द्धरो न वेति संशयप्रसंगात्॥ तथा चान्वयव्यतिरेकाभ्यां वस्तुनः स्वसमानगुणावत्संगमयोग्यत्वे ग्राह्ये यद्य
हि जातीयगुणावतस्तत्संगमार्हमिति व्यतिरेकदृष्टांत उत्तरार्द्धं॥ तत्र हि पर्ययेणायद्यहृणास जातीयगुणावत्त
त्तत्संगमार्हमिति॥ अनेन प्रागुक्तार्थसिद्धिः॥ यथा वा मालारूपेणाप्ययं दृश्यते॥ यथा॥ व्यतिषजति पदार्थान्
न्तरः कोपि हेतुर्न खलु बहिरुपाधीन्प्रीतयः संश्रयंते॥ विकसति हि पतंगस्योदये पुंडरीकं द्रवति च हिमरश्मा
वुद्यते चंद्रकांतः॥ अत्र केचित्॥ प्रतिवस्तूपमायामप्रकृतवाक्यार्थोपादानं तेन सह प्रकृतस्य सादृश्यप्रतिप
त्त्यर्थं दृष्टांते तु तदुपादानमेतादृशोपयोऽन्यत्रापि स्यादिति प्रकृतप्रतीतिविशदीकरणमात्रार्थं न तु सादृश्य
प्रतिपत्त्यर्थमित्यनयोर्भेद इति वदंति॥ अत्र रसगंगाधरकृत॥ प्रतिवस्तूपमायां प्रकृताप्रकृतयोः सादृश्यप्र
तीतिर्न तु दृष्टांते इत्याज्ञामात्रं॥ अविशेषात्॥ वैपरीत्यस्यापि सुवचत्वाच्च॥ एतादृशोपयोऽन्यत्रापि स्यादित्यस्य

स्यापि सादृश्यस्य पर्यवसानात्॥ किं चैवं देवीं नाथ कृपासतेति वह्ववः सारं तु सारस्वतं जानीते नितरामसौ
गुरुकुलक्लिष्टो मुरारिः कविः॥ अब्धिर्लङ्घित एव वानरभटैः किं त्वस्य गंभीरतामापातालनिमग्नपीव
रतनुर्जानाति मंथाचलः॥ इत्यत्र यद्यपि ज्ञानरूपस्यैको धर्मो निर्दिष्टः [illegible] स्तथापि न तत्र युक्तमौपम्यं
विवक्षितं यत्र पुनरुक्तं च विवक्षितं तत्र लंघनाद्यवस्थावरिष्ठ्यद्वारा गुणोपासनादिना प्रतिबिंबनमिति सर्वं स्वका
रग्रन्थविरोधो दुःपरिहरः स्यात्॥ तस्मादस्य प्रतिवस्तुभाव बिंबप्रतिबिंबभावाभ्यां धर्मोपादानादे
व भेदः॥ यस्मादर्थ तत्र स्तुमयोरकाले कारत्वमेव यत्किंचिद्वैधर्म्यं तु भेदत्वस्यैव प्रयोजकं न त्व
लंकारान्तरतायाद्यत्वाहुः॥ तन्न॥ सादृश्यप्रत्ययस्यौपम्याङ्गीकारेऽपि एकत्र प्रकृतकार्यकारणा
भावग्राहकव्याप्तिनिश्चयप्रयोजकसहचारग्राहकत्वमप्रकृतार्थस्यापरत्र च न तथेति भेदस्य
स्फुटतरत्वात्॥ सादृश्यप्रतीतिमात्रेणौपम्याभ्युपगमे तु सर्वविप्लवापत्तेरिति दिक्॥ इति दृष्टान्तः॥ प्र
कृताप्रकृतानां धर्मैक्यान्वयिनास्ति दीपकं तत्स्यात्॥ यत्रौपम्यानौपम्ययभूतानां प्राकरणिकाप्राक
रणिकानामेकदेशपातेन गुणक्रियादिना धर्मेणान्वयस्तद्दीपकं॥ दीपइवदीपकं॥ संज्ञायां कन्॥

अ.को.
९६

166

दीपस्यैकस्यैव सकलप्रकाशकत्ववदेकस्यैव सर्वैः समन्वयबोधजनकत्वेन तत्साधर्म्यादित्यर्थः॥ दीपयती
ति दीपमित्यन्ये॥ यथा॥ फुल्लं संपती असमाशा आइतुंगा इ फुल्लबिअंती रा॥ हिअअ आइ सअरणा रांमहा
तरूणां असिहराइं॥ अत्र सज्जनाः प्रकृतत्वादुपमेयाः तरुशिखराण्युपमानानि॥ तेषां समानत्वंगत्वाम्मो
गुरुणाम्याममेकपदेपादानाभ्यां सहान्वयः॥ यथा वा॥ मुद्धे सलिलआजलहरहरा आहिवदिसा फुल्ला अपा अवरिा
वहा॥ लहू आ विहोंति गरुआसमरमुहो हरि अमंडलभग अभ आ॥ अत्र राक्षसवधार्थंवानरानुत्तेजय
तः सुग्रीवस्यातौ भुजाः प्रकृतत्वादुपमेयाः॥ जलधराद्युपमानभूताः सर्वेषां गुरुत्वेनान्वयः॥ क्रिया
दीपकं यथा॥ छज्जइ वहू सलिलिअं पि आइमारंग खमासमत्थस्स॥ जारंतस्स अमहिा अं मोरा अ अ आ
रामारा सस्स॥ अत्र मानसस्य प्रकृतत्वादुपमेयत्वं॥ सर्वेषां सह इयरवाचा यां शोभत इति क्रियायामन्वयः॥ यत्रै
कमेवकारकमन्वयमेति क्रियासु बह्वीषु॥ यत्रैकमेव कारकमनेकक्रियास्वन्वितं तद्पिदीपकमित्यर्थः॥ तत्र
कर्तृकारकस्य यथा॥ सिंदइ भिअंकं किरसोंखिअइ कुसुमाउलेउ उद्दूर अरिांं॥ मीरोणा वरिवरि अइ
जीवेअपिये त्रिमारुइ पुढंतो॥ अत्र निंदतीत्यादि क्रियासु रामः कर्ता॥ यथा वा॥ स्खलयति वचने तेसंश्रयत्यंग

रामः
९६

मेगं जनयति मूरखवंशो हासिनः खेदविंहन्ता॥ मुकुलयति वने त्रिसर्वथा सुभ्रूः खेदस्त्वयि विलसति तन्मध्यं वल्लभालो
कनेन॥ इह देवदत्तस्य सर्वकर्तृत्वं॥ यथा वा॥ नागच्छन्नुपहूयते न च वचो भाष्यते नासनैः पृच्छ्यते नो पदं दत्ते भाष्यते न च दृ
शा सांद्रादरं वीक्ष्यते॥ ईर्ष्यालेशकषायिते हृदि यशालेशो पि न स्पृश्यते किं त्वेकः प्रवदन्न समं समिति प्राज्ञः शठे
हस्यते॥ इह सर्वत्र शठानां कर्तृत्वेनाच्वयः॥ कर्मणो यथा॥ आयाद्धि वद दुं वद ठवे रहि अग्न अम्मि जाणि अरो
मं चो॥ जा आकं बोल सरिसा पहिउं मह अउप्पाउं॥ अत्र मधूकपुष्पाणां आघ्राणादि क्रियासु कर्मत्वं॥ कारण
स्य यथा॥ पदालग्नेप त्यो नमयति मूरखं जातविनयाहठाल्लीलं वांछत्यपहरति गाढाश्लिनि मृतं॥ न शाक्नोत्या
ख्यातुं स्मितमुखमसखीदत्तनयनाद्ध्रियातासपत्नं तत्र अपमपरिहासेन वचनं॥ अत्र सर्वत्र लज्जायाः करणत्वं॥
संप्रदानस्य यथा मम॥ कामो विमुंचति शरानतिमात्रतीक्ष्णान् निर्दयमनाभिमदधाति पिकः कलेनाचंद्रोद
दाति केरन्सो ज्वलदुल्मुकानि मह्यं न स सदयिता विरह व्यथायां॥ इह सर्वत्र मम शमितत्यस्य संप्रदानत्वं शिष्याय
चपेटां ददाति शिष्यादिदर्शनेन भाष्यकारमते संप्रदानतायाः अन्वर्थत्वानंगीकारेण सर्वत्र मुख्यत्वाभ्युप
गमात्॥ अपादानस्य यथा ममैव॥ नियांति तीक्ष्णा मकरध्वजबाणधारा अभ्युत्पतंति घनसारदरजः प्रवाहाः॥

अ·को·
१७

107

उद्यंत संतमस संततयः समंतात्कोने निरंतरमनंतरिताह्गतात्॥ अत्र सर्वत्र दृगंतस्यापादानत्वं॥ संबंधिनो य
था॥ यस्मान्मंत्र यस्यानिलैः जगत्सु जनिते घ्नाद्यैततः याल्लनं व्यालतेः करशांहितां हितविधिव्याधेः ससंभावनं॥ भूतोक्तिः
सह जाव्दधानिहपधिर्यन्न स्तदर्पीत्मकम्यासे पूर्वगुरू न्तमाय जगतामीशाय पित्रे नमः॥ यद्यपि कारकपदस्य
विभक्त्यर्थद्वारा क्रियान्वयिनि शक्ततया षष्ठ्यर्थस्य च नामार्थ एवान्वयेन क्रियान्वयविरहाद्यसेति पदस्य
चकारकत्वं॥ तथापि पाणिनादि समभिव्याहारे कर्तृकर्मणोः कृतीति षष्ठीविधानात् तत्र कर्मत्वलक्षणम्
वश्यकत्वेन तस्य क्रियान्वयादृष्टो दाहहरात्वमविरुद्धं॥ अधिकरणस्य यथा॥ शश्वद्ध्यायंते मधुरमनिलैः की
चकाः पूर्यमाणाः संरक्तामिस्त्रिपुरविजयो गीयते किंनरीभिः॥ निर्ह्रादी ते मुरज इव चेत्कंदरेषु ध्वनिः स्यात्संगी
तार्थो ननु पशुपते स्तत्र भावी समग्रः॥ इह सर्वक्रियासु तत्रेति पदनिर्देशस्य हिमाचलस्य अधिकरणत्वं॥ य
था॥ काश्यपीः कृतमालसुंदर तदलंको पश्चिकश्रीकते तीरा श्मंतक शिंविडुंवितसुखा धावंत्यपः पूरिशीकाः॥ दाल्यू
हे स्त्रिनिशस्य कोटरवति स्कंधे निलीयास्थितं वीतनीडकपोतकूजितमनुक्रंदंत्यधः कुक्कुटाः॥ अत्र कर्म मध्याह्नः
तथा सत्र संप्रतीति प्रक्रमात् मध्याह्न रूपकालस्य सर्वत्राधिकरणत्वं॥ मालादीपकमाह॥ मालात्पू

राम:
१७

र्वपूर्वे सविधांतरे रागो ह्रीरो नरान्वयिनि॥ तस्यां क्रियायां रूपांतरे रागान्वितस्य पुनस्तस्यामेव रूपांतरे रागान्वये माला
दीपकमित्यर्थः॥ यथा॥ जलराशिवद्वह्मि सलिलं साराशिवद्वृद्धलं तसलिलंमिमराहं॥ सलिलराशिवद्दो
त्यरश्मिम्र अस्त्या अहराह अलदिसा अर्के॥ अत्र रामशराहतसमुद्रवशीने ज्वलननिवद्दे सलिलंमस्ता
यतसलिलस्य अस्तप्राप्तिक्रियायां कर्तृत्वेनान्वितस्य पुनः सलिलेन भोस्नायत इति नभः कर्तृकायामेवास्ना
क्रियायां आधारत्वेनान्वयः॥ यथा वा मम॥ शोवरोपनभवल्कले कर स्मिदं तेनोत्कटयौवनं तेनाशोस्तत
प्रसूनविशिखस्तेन कृतं कार्मुकं॥ तेन प्रापि पुनः शिलीमुखगरास्तेनापि मन्मानसं तेनो ह्याप भयप्रमा
पदलंनभ्रांतिप्रमोदस्य॥ अत्र प्रापीति क्रियायां कर्मीभूतस्य भूतस्य पश्चात्तेनैव कर्तृत्वस्तिस्यादिरीत्या
मालात्वं॥ इति दीपकं॥ प्रकृतानां तादृक्कैर्मित्रानां वा पितृल्यतुल्ययोगित्वं॥ वा शब्दो व्यवस्थितविकल्पार्थः॥ तथा च
प्रकृतानामेव अप्रकृतानामेव वा यथैकधर्मान्वयित्वं सा तुल्ययोगिता॥ तस्या नोप्राकरशिकुप्राकरणिकानाम
तरमात्रनिबंधनसाहश्यवतां योगिता एकधर्मान्वयित्वं यत्रेति पुनर्थेरितार्थः॥ वहुत्वं चद्वयोरप्युपलक्षणं॥

आद्यं यथा॥ अंगारीकृतकनकोज्ज्वलोत्तुंगाः कौसुंभपट्टकंचुकमंसेंगिताः॥ वासस्थप्रतनुविविक्तिकम
स्त्विषीयानाकन्योयदिकुसुमैप्युशान्तसूयः॥ अत्र जलक्रीडासाधनत्वेन प्रकृतानां आकल्पेतिधर्मेणान्वयः॥
यथा वा॥ पउरजुआण गामो महुमासो योव्वणं पई ठेरो॥ जिण्णसुरा साहीणा असई मा होउ किं मरउ॥
अत्रासतीत्वत्यागहेतुत्वेन प्रकृतानां पउरजुआणादीनां अस्तीति क्रियान्वयः असतीभवंती [illegible] परः॥ प्रथमपु
रुषेऽप्रयुज्यमानोप्यस्तीति वार्तिकात्॥ अस्तिक्रियाप्रयोगाभावेपि तदाक्षेपितास्तीघ्रोपस्थितिकत्वान्नान
वप्रतिवाक्यं अस्त्यध्याहार इति वाच्यम्॥ लाघवादेकस्यैवाध्याहारं कृत्वोऽन्यत्र तदनुषंगस्यान्याय्यत्वात्॥
यथा॥ रूपं अम्हि सहि अप्फरिसो अंगे सुत्तंपि अक्करोसि हि अ [illegible] अप्परासमं विउइ अं किराउ देवेण॥ अ
त्रविरहोद्दीपकत्वेन प्रस्तुतानां रूपादीनां स्थितिरूपैकक्रियान्वयः॥ द्वितीयं यथा॥ गंगाकीर्तिमरुद्वीमलीम
सतमगत्यर्थिसेनाभटश्रेणी तिंदुककानने छविकसत्प्रस्यप्रतापानलैः॥ तस्माद्भुत्पतिताः स्फुरंति जगदुत्सं
गे स्फुलिंगाः स्फुटं भालोद्भूतमवाप्य [illegible] भुजंगभारिदं मौलयः॥ अत्र प्रतापवर्णने अप्रकृतानाम्

लेनयनादीनां स्फुरंतीति क्रियया ऽन्वयः॥ अत्र सर्वत्र सादृश्यं व्यंग्यमिति सिद्धांतः॥ एवं च सादृश्यपदार्थातिर
मेवालंकाराभिमतं॥ अन्यथा धर्मस्योपादानेन तादात्म्यकत्वे च सादृश्यस्य व्यंग्यत्वानुपपत्तेरिति केचित्॥
सादृश्यत्वमेवातिरिक्तं इवपदादीनां शक्यतावच्छेदकः॥ तथा च धर्ममात्रोपस्थितावपि सादृश्यत्वप्रकारेण
बोधो व्यंजनयैव॥ अतः सादृश्यस्यानतिरिक्तत्वेपि न क्षतिरित्यन्ये॥ अयमेतत्सदृश इत्याकारकथा
द्वयोर्धाविषयत्वमेव व्यंग्यत्वं॥ अत्रेवदेति॥ दीपकमपि तुल्ययोगितायामेवांतर्भवति॥ धर्मस्य सकृद्वृ
त्तेरुभयत्राविशेषात्॥ अप्रकृताप्रकृतत्वादिविशेषस्य चावांतरभेदसाधकत्वेपि अलंकारांतरता
यामसाधकत्वात्॥ अन्यथा श्लेषस्य तद्भेदयोरपि भिन्नालंकारत्वापत्तेः॥ तस्मात्प्रकृतानामेव
प्रकृताप्रकृतानां चैकधर्मान्वय इति तुल्ययोगिताया एवं द्वयोर्भेदावक्केमविता॥ तस्माद्दीपक
स्य तुल्ययोगितायामेदंवद्दतां प्राचीनानां दुराग्रहमिति॥ तच्चिंत्यम्॥ नानाधिकरणस्थानां श
ब्दानां संप्रदीपकः॥ एकवाक्येन संयोगो यस्तद्दीपकमुच्यते॥ यथा॥ सरांसि हंसैः कुसुमैश्च वृक्षा

मत्तैर्हरिरपैत्यस्य सरोरुहाक्षि॥ ओष्ठीभिरस्याननवनानि दैवैव यस्मिन्न[illegible]न्यानि स शक्यते॥ इति भगवता
भरतमुनिना दीपकस्यांगीकारात् तत्रैव तु[illegible]योगितांतर्भावस्योचितत्वादिति दिक्॥ एवं इति तुल्ययोगिता॥
उभयोः साम्यप्रोक्तौ विशेषः उपमेयगो व्यतिरेकः॥ यत्र केनचिद्धर्मेणोपमानापेक्षयोपमेयस्य वैलक्ष-
ण्यं वर्ण्यते स व्यतिरेकः॥ व्यतिरिच्यते उपमानादुपवर्ण्यतेऽनेनेषमिति व्युत्पत्तिरित्यर्थः॥ ननु॥ क्षीया:
सी सोऽपि शशी भूयो भूयोऽभिवर्द्धते सत्यं॥ विरम प्रसीद सुंदरि यौवनमनिवर्त्ति यातं तु॥ इत्यत्र उपमा-
नभूते चंद्रे पुनर्वृद्धिरूपं वैधर्म्यमुक्तं॥ तथा च कश्चिदुपमेयापेक्षयोपमानस्य विशेषोक्तावप्यस्य सं-
भवात् लक्षणमुक्तं विशेषः उपमेयगे इतीति चेत्॥ मैवं॥ प्रकृतार्थानुकूलत्वरूपस्य विशेषस्य तत्रापि चंद्रा-
द्भिन्नत्वात्॥ तथाहि॥ तत्र न चंद्रयौवनयोरुपमानोपमेयभावो विवक्षितः॥ किंतु चंद्रक्षययौवनक्ष-
ययोरेव॥ तत्र च चंद्रक्षयस्य वृद्धिप्रागभावसमानकालीनत्वेन [illegible]त्वं॥ यौवनक्षयस्य चात्र तस्य
रीरावृद्धेर्न यौवनाभावात् समानाधिकरणयौवनप्रागभावसमानकालीनत्वं नास्तीत्याधिक्यं॥

एवं च विवक्षितस्य मानत्यागस्यावश्यकत्वसिद्धिरिति ॥ ननु तथापि ह्युक्तिदुपमानादुपमेयापकर्षे
ऽप्ययं दृश्यते ॥ यथा हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूतपथः सितीकृतः ॥ अत्र हि नले न ह
नूमदादिभ्य आपेक्षया स्वकृतदूत्ये हीनत्वं प्रदृश्यत इति चेत् न ॥ उत्कर्षापकर्षयोर्ह्यत्र न वास्तवाभि
मतौ किंतु प्रकृष्यातिशायकत्वानतिशायकत्वस्वरूपौ ॥ प्रकृतस्यात्र नले निर्वेदः ॥ तदुत्कर्षकल्पे
च दोत्पनिष्टोक्तापकर्षस्याप्यस्तीति न दोषः ॥ एवं ॥ जनस्थाने भ्रांतं कनकमृगतृष्णाकुलतया व
चो वैदेहीति प्रतिपदमुदश्रु प्रलपितं ॥ कृतालंकाभर्तुर्वदनपरिपाटीषु घटना मयाप्तं रामत्वं कु
शलवसुता न त्वधिगता ॥ इत्यत्राप्युपमेयवक्तरि कुशलवसुताप्राप्त्यभावस्य न्यूनतारूपस्याधिक्ये न्या
दिसमुत्कर्षाधिक्यमेव ॥ एवं ॥ रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायां
ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि ॥ कांतापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः स
र्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः ॥ इत्यत्रोपमेयस्योत्कर्ष इत्यपास्तं ॥ सशोकत्वस्याव

मानोत्कर्षकत्वेनाधिकरूपत्वात्॥ अराताविहोतिमुहेहपामलधवलाइदीहकसराणहं॥ आत्रशाइ सं
हरीणं तहहउ साद्दकुंन आरंतितो। अत्र हि प्रकृतनायिकाया उपमानत्वेनाधिकोन्तराणामुपमेयत्वं॥ तथा पुन
र्द्वकुं न जाने तीतिव्यतिरेक उपमेयानां॥ तथा च वर्णनीयनायिकानिष्ठविजातीयदर्शनप्रतियोगिकसादृ
श्यवद्दर्शनानभिज्ञत्वमितरनायिकानामितिवाक्यार्थः॥ एवं च यद्यपि तासामुपमानादपकर्षः प्रतिभा
ति॥ तथापि तादृशज्ञानाभावस्य तदवज्ञानरूपप्रकृतार्थातिशायकत्वमस्त्येवेति न दोषः॥ यद्वा उपमेयो
पकर्षोदाहरणं रसगंगाधरे कृतं॥ जगत्त्रयत्राणधृतव्रतस्य समातलं केवलमेव रक्षन्॥ कंपं समारो
हति हंत राजन्सहसैव त्वस्य तुलां हि नेत्रः॥ अत्र धर्मद्वयेनैव न्यूनोसि धर्मांतरे रातु समान इति प्रती
तेरलंकारतेति॥ तदपि चिंत्यं॥ धर्मांतरप्रयुक्तसादृश्यविवक्षागर्भधर्मविशेषप्रयुक्तसादृश्यनिषेधस्यै
व व्यतिरेकशरीरत्वेन सर्वाभ्युपगतत्वात्॥ सादृश्यप्रयोजको यो धर्मस्तत्प्रयुक्तसादृश्यप्रतीतेः स्वव्याजस्तु
तावेवांतर्भावादिति दिक्॥ तं विभजते॥ हानिप्रकर्षहेत्वोरुक्तौ द्वेधा च तदनुक्तौ॥ शब्दार्थाक्षेपोत्थसा

ष्य श्लेषवद्द्विगुणमितः सः॥ अयमर्थः॥ स व्यतिरेको द्विगुणमित श्चतुर्विंशतिसंख्यः कथमित्यत आ
ह॥ द्वानीत्यादि॥ उपमानस्यापकर्षनिमित्तं उपमेयस्योत्कर्षनिमित्तं चेत्युभयमपि यत्रोक्तं तत्रैकः॥ अप
कर्षहेतुमात्रस्य॥ उत्कर्षहेतुमात्रोक्तौ द्वयोरप्यनुक्तौ रत्रयो भेदा इति चत्वारः॥ ते च प्रत्येकं शाब्दे आ
र्थे आक्षिप्ते च सादृश्ये इति द्वादश भेदाः॥ सर्वेषां श्लेषाश्लेषाभ्यां द्वैविध्याच्चतुर्विंशतित्वमिति॥ अथ
द्वादश श्लिष्टभेदेषु द्वयोरुक्तौ श्रौते साम्ये यथा॥ ध्वांतं विनाशयंत्याः अलं ज्वलद्देहलतिकायाः॥ न हि ते
चपलाया इव भास्वशोका कामिनि निष्प्रिया॥ अत्र स्थैर्यचपलत्वरूपं उत्कर्षापकर्षहेतुद्वयमुक्तं॥ इह पदो
पादानात् श्रौतं साम्यं॥ उत्कर्षहेतुमात्रोक्तौ यथा॥ वैशद्यं भावयतो निखिलजनोल्लासनाहेतोः॥ अपचय
रहितस्य तवाननस्येन्दो रिव च्युतेर्न निः॥ इह मुखोत्कर्षजनकमपचयराहित्यमुक्तं॥ इंदुपकर्षहेतुस्तत्सा
हित्यं नानुक्तं॥ अपकर्षहेतुमात्रोक्तौ यथा॥ सकललोचनमानसहारिणोतिशयितां दधतः सुकुमारतां॥
तव मुखस्य तु विनिर्णयरिद्धिदां मजति भास्वदधीनसरोजनत॥॥ अत्र पद्मकांतेः परिद्धिन्नत्वे भास्वदधी

नसमेऽप्यवलत्त्वहेतूक्तिः ॥ मुखस्य रुचिरपरिधिश्चन्द्रतायां अन्यानधीनत्वं हेतूक्तिः ॥ इवार्थे वतिप्रयोगात् श्रौ
तं साम्यं ॥ उभयहेत्वनुक्तौ यथा ॥ अतिनिविडस्य हृताखिलदर्शनशक्तेस्तमो व्रजस्यैव ॥ धम्मिल्लस्य
नेतेऽस्ति श्यामलता तेजसा नाश्या ॥ अत्र केशपाशनिष्ठश्यामकतायास्तेजोजन्यनाशप्रतियोगित्वे स्वार्थे
साम्ये हृद्ययोरनुक्तौ यथा ॥ विजिताररविंदकान्तेः शुद्धस्य भवन्मुखस्य रंभोरु ॥ सकलंकवद्द्रवन्निहि निभाल
यामी हर्मालेन्यं ॥ अत्र तेन तुल्यमिति विहितस्य वतेः प्रयोगादार्थसाम्यं ॥ शुद्धत्वकलंकितत्वरूपं उत्कर्षा
पकर्षहेतुद्वयमुक्तं ॥ यथा वा माघे ॥ मुदितजनमनस्कास्तुल्यमेव प्रसादो दोषेरुचिमदभ्रु रुभयः कल्पि
तास्तूषिताश्च ॥ परिमलरुचिराभिर्न्यक्कृतास्त्वप्रभाते युवतिभिरुपभोगान्नीरुचः पुष्पमालाः ॥ अत्र
युवतीनां स्रजां चोपभोगसहत्वतदभावरूपं उत्कर्षापकर्षहेतुद्वयमुक्तं ॥ तत्रैव उत्कर्षहेतुमात्रोक्तौ
यथा ॥ लोकविलक्षणरागरागशालिन्यपि वदने यं ॥ विनयमरपशुरतयानमदेनाम्भाऽगनासह
शी ॥ अत्रोत्कर्षहेतुर्विनयवत्त्वमुक्तं ॥ अपकर्षहेतुरोद्धत्ये नानुक्तं ॥ अपकर्षहेतुमात्रोक्तौ यथा ॥ श्यामात्मे
कं पंकाम्भंके दलितानं दसंदोहौ ॥ इंदीवरे शानयनेन सममतवपंकजातेन ॥ अत्र अपकर्षहेतुः पंकजा

त्वं ॥ उक्त प्रशस्तकारणाजन्यत्वं नयनोत्कर्षहेतुर्नोक्तः ॥ उभयानुक्तौ यथा ॥ अतितरले रमणीये श्रुतिपरिसरखेल-
नाश्रलक्ष्मे ॥ चंद्रमुखि लोचने ते न मृगाक्षि मूर्खांकृविन्दन्त्ये ॥ अत्रोत्कर्षहेतुर्विज्ञसंबंधित्वं अपकर्षहेतुर्मौर्ख्यसंबंधि-
त्वमिति द्वयोरप्यनुक्तिः ॥ अथाक्षिप्तसाम्ये द्वयोरुक्तौ यथा ॥ अधरदलास्तनगुच्छा स्मितकुसुमा त्वं सरोजाक्षि
विज्ञतमा ध्रुवमज्ञां कांचनवल्लिं तिरस्कुरुषे ॥ अत्र इवादिपदाभावादाक्षिप्तं सादृश्यं ॥ आक्षेपश्च व्यंजनेत्येके ॥ ज्ञित्वत्वा-
द्विहेतुकानुमानमित्यन्ये ॥ विज्ञत्वमुत्कर्षहेतुः ॥ अज्ञत्वं चापकर्षहेतुरुक्तः ॥ यथा वा मुद्राराक्षसे ॥ यो नंदमौर्यनृप-
योः परिभूय लोकमस्तोदयावदिशदप्रतिभिन्नकालं ॥ पर्यायपातितहिमोष्ममसर्वगामि धाम्नातिशाययति
धाम सहस्रधाम्नः ॥ अत्र चाणक्यतेजसः उत्कर्षहेतुर्युगपदुभयविधित्वं ॥ सूर्यतेजोऽपकर्षहेतुश्च ॥ मेकैकसामर्थ्यमुभ-
यमुक्तं ॥ असर्वगामीति अपकर्षहेतुः सार्वगतत्वमुत्कर्षहेतुश्चेत्युभयमुक्तमिति उभयत्र हेतुद्वयोक्तावविशेषः ॥ अति-
शाययतीत्याक्षिप्तमौपम्यं ॥ उत्कर्षहेतुमात्रोक्तौ यथा ॥ त्वं विरोधिरसान्तरवद्द्रव्यसमानाधिकरणतां हीनः ॥ बिंबाधरः
सुरभितं तिरस्करोतीह पीयूषं ॥ इहाधरस्य उत्कर्षहेतुः पूर्वार्द्धोक्तः ॥ सुधापकर्षहेतुस्तु तादृशकालकूटसामाना-
धिकरणतापठितं ॥ अपकर्षहेतुमात्रोक्तौ यथा ॥ उद्दीपितकुसुमशराकृतिसुभगा सस्मृतेवारागी ॥ मधुमाससमानवर

म्यां परम्लनततरुसीतिरं जयति॥ अत्र कोकिलानुतापकर्षहेतुर्वसंतमात्ररम्यत्वमुक्तं॥ नाधिकावचनोत्कर्षहेतुश्चस
वैदारस्यत्वमनुक्तं॥ द्वयोरनुक्तौ यथा॥ गुणगुम्फितेन श्रोत्रपथविजृंभमाणेन ननेत्रभंगेन॥ वरतनुमन्मथविशिखस्त्वयासि
नीतोऽधरीभावं॥ अत्र कटाक्षोत्कर्षहेतुरन्यस्य कामाधीनत्वकरत्वरूपः॥ वाणापकर्षहेतुश्च कटाक्षान्वयव्यतिरेकानु
विधायित्वमिति द्वयोरप्यनुक्तिः॥ एवमश्लिष्टभेदोदाहरणान्याख्यातानि॥ इदानीं श्लिष्टभेदा उच्यंते॥ तत्र शाब्दे साम्ये द्व
योरुक्तौ यथा॥ अपितापोत्कर्षकृता कुसुमशरेणातनुन्यायि॥ स्नेहेन हीयते सखि तदधीनेनानलेनेव॥ अत्र तैलादिनिष्ठ
स्नेहाख्यगुणविशेषस्य वह्निनाश्यत्वे हेतुस्तदाश्रयद्रव्यस्य वह्निकारणत्वेन तत्संयोगः॥ रागाख्यस्नेहस्य मदनाश्यत्व
हेतुस्तज्जन्यत्वं॥ तं प्रति मदनस्य हेतुतमानाशकत्वाभावात्॥ स्नेहशब्दः श्लिष्टः॥ उत्कर्षहेतुमात्रोक्तौ यथा॥ विशदीकृता
रविलक्ष्मवः सकलमनोनयनरम्यायाः॥ स्वाभाविकस्तवायं ज्योत्स्नावच्चेस्ययी रागः॥ इह नायिकारागस्य स्वाभाविकत्व
मुत्कर्षहेतुरुक्तः॥ ज्योत्स्नारुणस्य संध्याधीनत्वमपकर्षहेतुर्नोक्तः॥ रागपदं श्लिष्टं॥ इवार्थे वतिरिति शाब्दं साम्यं॥
अपकर्षहेतुमात्रोक्तौ यथा॥ स्मितकुसुमसमृद्धिरानवपरिमलसंभृतदिगंतात्वं॥ तन्मात्रसाध्यजन्मा नलिनी
वनजातपंकसंगासि॥ अत्र पद्मिन्याः कर्दमयोगावश्यकत्वहेतुः॥ तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वं तन्मात्रे

क्तं॥ नायिकायाः निषिद्धकर्मयोगाभावहेतुः शुद्धत्वेनोक्तं पंकपदं श्लिष्टं॥ उभयानुक्तौ यथा॥ सौरभ्यवासितोद्दि
शो विहितपिकीरुतविशेषायाः॥ सहकारमंजरीव नवनास्ति भृंगसंसर्गः॥ अत्र रसालमंजर्या भ्रमरसंबंधे
मधुरसो हेतुः॥ नायिकायाः परपुरुषसंसर्गाभावे च शुद्धान्तःकरणत्वं हेतुः॥ उभयमपि नोक्तं॥ हेतुपदस्य प्रयोज
कसाधारणेन भृंगसंसर्गतदभावहेतुभूतयोर्मधुरसशुद्धान्तःकरणत्वयोरनुक्तौ उभयानुक्तिरित्यदोषः॥ भृंग
पदं श्लिष्टं॥ आर्थे साम्ये द्वयोरनुक्तौ यथा॥ प्रकृतसरोजशोभं मुखमस्याश्चंद्रमाश्च सममेव॥ नित्यैकरूपविरहा
सकलंकीत्वगुणादोषात्॥ अत्र चंद्रमसः कलंकित्वे सर्वदा एकरूपाभावः॥ मुखस्याकलंकत्वे तु गुणोत्कर्षो हेतुरि
ति द्वावनुक्तौ कलंकपदस्य च द्विदोषाभयार्थकत्वाद्याश्लेषः॥ उत्कर्षहेतुमात्रोक्तौ यथा॥ अयमुल्लंघितकरणीस्वदर्पोगः पा
र्थवत्तन्वि॥ अविहीनशक्तिकतया न प्राप्तपराजयः क्वापि॥ अत्र कदाप्युत्कर्षहेतुरनपकृष्टसामर्थ्यवत्त्वमुक्तं॥ अर्जुना
पकर्षहेतुश्च भगवद्गृहीतसारत्वमनुक्तं॥ परेषां अन्येषां अजेयो वशीकरणाभावः स येन प्राप्तः तथा नास्ति च वशी
करणायोगश्च वद्धेद्रवा निर्जिते उपक्षे॥ प्राप्तः पराजयः परिभवो येनेति अन्यपक्षश्लेषः॥ तुल्यार्थवतिरिति आर्थसाम्यं

र.कौ.
११२
113

हरयं॥ यथा वचने घर्षे॥ स्मरद्रवांकमुविराजशिखामणोस्त्वं सा सर्वभोगसुभगस्य समः क्रमोयं॥ यन्नाकपालकलनाविदितस्य
पञ्चशरस्यापि ज्ञानिसती भवती समेदः॥ अत्र भैमुत्कर्षहेतुरेतत्र मन्यपि पातिव्रत्यमुक्तं भवान्यपकर्षहेतुत्वसतीपरवा
च्यत्वाभावोनुक्तः॥ अपकर्षहेतुमात्रोक्तौ यथा॥ तापिच्छनीलचिकुरां रसपरिपूर्णां सुगंभीरां॥ प्रावृट्कालेन दीमिव नकृत
श्चिद्वंगशक्तित्वो॥ इह नद्यास्तरंगहेतुः प्रावृडुक्ता॥ नायिकाया अन्यतोपकर्षानवाप्तोरसर्वाधिक्यहेतुरनुक्तः॥ मेजपदं
श्लिष्टे॥ द्वयोरनुक्तौ यथा॥ अरविंदतुंदिलांगीमरालिकामनशालिनीसुभ्रु॥ सरसीवनकदावियासि रससा विलीमा
नं॥ अत्र सरोजस्य कालुष्यवर्षादिके हेतुः॥ भृंगाद्यरथ्यरसस्य निर्दोषत्वे तत्सामग्री उपनायकविषयत्वाद्यभावश्चहे
तुरनुक्तः॥ रसपदं श्लिष्टं॥ यथा वाभिस्पादने॥ भृंगांगनं सरवि ममापित वापितुल्या श्रीकंठकंठरुचिरा घटयकोधिमे
दः॥ दुष्येतु वेष्टितमतीव तवानुकूले सत्वंतदेव तमम प्रतिकूलमासीत्॥ अत्र दुष्याधिकरणाकक्रीडयाभ्रंगीप्रत्यनु
कूलत्वे मधुप्राप्तिहेतुत्वं॥ नायिकां प्रति कामव्यापारस्य प्रातिकूल्ये च द्व इच्छाविषयशिवालाभो हेतुः॥ तदुभयमपि अनु
क्तं दुष्येतु वेष्टितमिति खंडश्लेषइति पूर्वस्माद्विशेषः॥ आधिमेसाम्ये द्वयोरुक्तौ यथा॥ अन्ये नानेभिभूतं तारा क्रांतं त्वदी
यास्यं॥ स्वर्भानुनाकवलितं तारा क्रांतं पराजयते॥ इह अन्यानभिभूतत्वे राहुग्रस्तत्वे च उत्कर्षापकर्षहेतूउक्तौ॥ तारा

रामः
११३

कांतशब्दः श्लिष्टः ॥ यथा ॥ वासवदत्तायां ॥ सुराणां पातासौ सप्तनरतिभुरोपेक दृढयोगग्रहस्तस्यास्या
नेजुहहृषित मार्गे सनिरतः ॥ कूरस्तस्यात्यर्थवहतिशतकोटिदुराधितासुसर्वस्वं दातात् नाभिवसुरे
शं विजयते ॥ अत्र श्रृंगारशेखरसंज्ञस्य राज्ञ उत्कर्षहेतवे इन्द्रापकर्षहेतवश्चोक्ताः ॥ सुराणामित्यादौ च
श्लेषः ॥ प्रथमे एक उत्कर्षस्य एकश्चापकर्षहेतुरुक्तः ॥ इहत्वनेक इति विशेषः ॥ उत्कर्षहेतुमात्रोक्तौ य
था ॥ रसजनकेनेतिरस्कृतत्वं इन्दुरुचा सततशोभनेन ॥ तावकमुखेन सुन्दरि नियतं परिभूयते पद्मं ॥ अ
त्र रसाशे श्लेषः ॥ मुखोत्कर्षहेतुभूता च शृंगारजनकत्वचन्द्राधिक्यं ॥ कलानवछिन्नशोभत्वं चोक्ता
जलजन्यत्वं चन्द्रतिरस्कार्यत्वं दिनमात्रशोभित्वं पद्मापकर्षहेतवो नोक्ताः ॥ अत्रैव शोभापदे श्लेष
इति विशेषः ॥ अपकर्षहेतुमात्रोक्तौ यथा ॥ उद्दहित मकरध्वज मतिविशारं तारकारम्यं ॥ तवमुखमिन्दु
निंदति तस्पत मस्कहनीयत्वात् ॥ अत्र मुखोत्कर्षितमोनमिभाव्यत्वं हेतुरनुक्तः ॥ चन्द्रापकर्षश्चराहुपरि
भाव्यत्वं हेतुरुक्तः ॥ मकरध्वजादिशब्दाः श्लिष्टाः ॥ द्वयोरनुक्तौ यथा ॥ अनुन्नतेन कठिनस्पर्शेन रसाहर

हृदयाकृष्टौ॥ वक्षोरुहे ह्याते सखि कुंभः प्रतिगर्जितः प्रोद्धेः॥ अत्र स्तनोत्कर्षहेतुरंतःपूर्णत्वं॥ घटापक
र्षहेतुरंतःशून्यत्वं हृद्यमप्यनुक्तं॥ अत्र त्रेतत्यर्थश्लेषः॥ रसेति शब्दश्लेषः॥ स्पर्द्धते जयति द्विषेद्रुह्यति
प्रतिगर्जतीति रं समुक्तेः॥ एवं चतुर्विंशतिभेदाः व्याख्याताः॥ एवं॥ राहुग्रासपराभवं न लभते न ग्लानि
माविंदते वंशशोः किरणैर्न वाम्नगदृशा मास्यैः पराजीयते॥ नेवाम्रेशापि धीयते नवकुहूकालेपि सं
क्षीयते भूमीभूषणशासृहू इवं द्रुमवतः प्रोक्ते यशश्चंद्रमाः॥ इत्यादावाक्षिप्तसाम्यव्यतिरेको ज्ञेयः॥
अभेदस्यैवात्र शाब्दत्वेन सादृश्याक्षेपत्वात॥ क्वचित्रयत्यादिपदाभावेप्येकधर्मावच्छिन्नतयै
व साम्याक्षेपः॥ यथा॥ ज्ञारानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने तोये कोचनपद्मरेणु
कपिशे धर्माभिषेकक्रिया॥ ध्याने रत्नशिलातले ष्टविबुधस्त्रीसन्निधौ संयमो यत्राद्धं तितपांसि
रन्यमुनयस्तस्मिंस्तपस्यंत्यमी॥ अत्र कश्यपाश्रमवासिनां मुनीनां मुन्यंतरापेक्षया व्यतिरेक
उक्तः॥ तेषां च सादृश्यबोधकाभावात्॥ अनित्यमेवतदाक्षेपकं॥ कचित्तु विशेषणाश्लेषादेवतदा

क्षेपः॥ यथा नैषधे॥ अस्यारिप्रकरः शरश्च नृपते संख्ये पतन्नाप्नुवौ सीत्कारं च न संमुखं रचयतः कंपंच
न प्राप्नुतः॥ तत्तुल्ये न पुनर्निवृत्तिरुभयोर्जागर्ति या मुक्तयोरेकस्तत्र भिनत्ति मित्रमपरश्चामित्रमप्यद्भुतं॥
अत्र संख्यपातावर्थश्लेषेणाभिन्नशरयोः साम्याक्षेपः॥ भित्त्यादि व्यतिरेकः॥ शब्दश्लेषेण यथा॥ उ
त्कलिकाकुलितास्ताडुपवंठनिरस्तमारकृतमालाः॥ प्रावृषि सरितसेतून्भिंदंति न पांथवरवधूः॥ उ
त्कलिकेत्यादिश्लेषेण नदीनां पांथस्त्रीणां च साम्यप्रतीतिः॥ मर्यादारूपसेतुभेदाभावः स्त्रीणां
विशेषः॥ व्यतिरेकध्वनिर्यथा ममैव॥ पूर्वं हिरण्यकशिपुं विबुधाभिमातिमातर्द्दितुं समभवन्मधु
भिन्नृसिंहः॥ दारिद्र्यमंतयितुमीदृशमेव लोके जातः सखे किल संप्रति राजसिंहः॥ अत्र भगवद
वतारत्वेन नृसिंहराजसिंहयोः सादृश्यप्रतीतेः॥ नृसिंहेत्यनेन नृप्रतियोगिकोत्कर्षस्य राजसिंह
परेण च राजप्रतियोगिकोत्कर्षस्य प्रतीत्या तदपेक्षया राजउत्कर्षो व्यज्यते॥ राजापेक्षया उत्कर्षस्य
मनुष्यप्रतियोगिकोत्कर्षवदपेक्षयाधिक्यस्य सर्वसिद्धांतत्वात्॥ राजत्वस्योत्कर्षप्रतियोगिता

वच्छेदकत्वोत्कर्षमयमस्मेवमनुष्यत्वावच्छिन्नप्रतियोगिताकोत्कर्षवदपेक्षयातदुत्कर्षप्रतीतेराज्ञापेक्षयो
त्कर्षसिद्धावन्यतदुत्कर्षस्याप्यर्थतःसिद्धेरितिदिक्॥ इति व्यतिरेकः॥ इष्टस्याप्यभिधानं योर्थस्य विशेष
बोधाय॥ स्वयमेव प्रतिषेधः स वक्ष्यमाणोक्तविषयः आक्षेपः॥ वक्ष्ये प्रारब्धस्यापि विशेषद्योतनार्थं यो नि
षेधः स आक्षेपः॥ प्रागुक्तप्रतिषेधो भावकृत्यते॥ विभागमाह॥ वक्ष्यमाणोक्तेति॥ यत्र वक्ष्यमुपक्रान्तस्य वा
र्थो निषिध्यते स वक्ष्यमाणविषयः॥ यत्र तु उक्तो तद्वस्तु नवे यन्निषिध्यते स उक्तविषय इति हि विधइ
त्यर्थः॥ तत्राद्यो यथा॥ सखे जाणाइ देहं सहि संम्मि जणाम्मि तु ओ ठ रा ज्ञा॥ मरइ यात्तु मंभणिअसं मरणं
वि सल्लाहरिणं ज्ञंसे॥ अत्रत्वय्यसंतप्ताहरागवशेन नायिकाया विरहावस्थावशेन मरणमपि संभावि
तं॥ तस्मात्त्वया तत्समागमे यत्नः क्रियतामिति विवक्षितं॥ तच्च विरहदुःखस्य प्रत्येकं वक्तुमशक्यत्वात्
समागमप्रार्थनायाश्च याच्ञाभंगभीत्या दुःकरत्वात्॥ न त्वां भणिष्यामीति प्रतिषिद्धं॥ द्वितीयो य
था॥ त्वं जीवितं त्वमसि मे हृदयं द्वितीयं त्वं कौमुदी नयनयोर्हृदयं त्वमेव॥ इत्यादिभिः प्रियशतै रनुरुध्य

मुग्धां तामेव शंसतमथवा किमिहोत्तरेण॥ यथा वा मम॥ त्वत्सा साक्षात्कर राक्षसराग्रस्मेति दृष्टकृतनेत्रे
क्षतेः ध्यातरं म्लानिं शारदिकां प्रतिहता साकेतवीवाभृता॥ निःश्वासा हतिसाध्व सादिवमशं विंवा
धरो वेपते तत्सगमवसाय हा धिगिति कृतं प्रोक्तेन नाचक्ष्महे॥ अत्र प्रोक्तापि विरहावस्था तत्प्रतिका
रानुपपत्तेतद्वचनवैयर्थ्यमित्यभिप्रायेणात्तदुक्तिप्रतिषेधः॥ केचित्तु प्रमेयं नोपमानकार्यसंपत्त्या तद्वै
यर्थ्योक्तिराक्षेपः स्यादिति॥ यथा॥ किं पद्मस्य रुचिं न हन्ति नयनानंदं विधत्ते न किं वृद्धिं वा झषकेतनस्य
कुरुते नालोकमात्रेण किं॥ वक्त्रेंदौ तव सत्ययं यदपरः शीतांशुरुज्जृंभते दर्पः स्यादमृतेन चेदिह तद
प्यस्त्येव बिंबाधरे॥ प्रतीपमेदोयमिति काव्यप्रकाशकारादयः॥ सर्वस्वकारादयस्तु॥ योनिषेधो वा
धितस्तत्र ध्यातरूपार्थवसितः के चिदिह शोचमाक्षिपतीति समासोक्तेपः॥ यथा॥ —यस्तानत्रैकृतिर्न वाष्पसलिले
नाद्या हितेलोचने नीतं नाननमन्नतः सशाय पदं नाहस्य प्रशान्ताः स्थिताः॥ नव्या मग्नपयोधरं रससवशाहि क्षाम
लिंगितो मंक्षा स्यानि यमस्य भीषरामरू वाचं वयस्यानुमे॥ अत्र भीषणामहतिनिषेधो वाधितत्वाद्रपका

राजनकत्वपर्यवसितो दुर्योधनस्य भानुमतीप्रतियोगिकालिंगनप्रयोजकत्वरूपं विशेषमाक्षिपति भानुमत्या
लिंगितमित्यस्य शास्त्रत्वेपि मरुत तत्प्रयोजकत्वस्याक्षेपमार्गगम्यत्वात्॥ न च सविशेषणे हीति न्यायेन मरुति
भीषणत्वस्यैवायं निषेध इति वाच्यम्॥ विशेषणे निषेधस्य बाधाभावे हि तन्न्यायावतारः॥ अत्र च भीषणत्वस्या
पि मरुति सत्त्वेन तन्निषेधस्यापि बाधाविशेषात्॥ तावतापि प्रकृतसंगतेश्चेति॥ यथा॥ कुप्यद्दाससनलंघनांभ
सि मया मग्नेन नाम स्थितं प्राप्ता नाम विगर्हणा स्थितिमतां मध्येऽनुजानामपि॥ हेल्लोक्यासितशौलिनातारूणाग
णस्यापि द्वितः कौरवा न द्येष्टं हि वसं समाप्यपि न रहस्ता हं विधेयस्तव॥ अत्र युधिष्ठिरं प्रति भीमोक्तौ गुरुरिति नि
षेधो बाधितः सन्नत्वदुत्स्याकौरवैः संधिर्मया न कार्य इत्यत्र पर्यवसितस्तदुद्देशावश्यकत्वं व्यंजयति॥ वक्ष्यके
थन निषेधो यथा॥ मा याहीत्यपमंगलं व्रज पुनः स्नेहेन हीनं वच क्षिष्ठेति प्रभुता यथारुचि कुरुष्वैषाप्युदासी
नता॥ नो जीवामि विना त्वयेति वचनं संभाव्यते वा न वा तन्मां शिक्षय नाथ यत्समुचितं वक्तुं त्वयि प्रस्थिते॥ अ
त्र प्रवत्स्यत्पतिकायाः प्रियगमनप्रतिबंधकोक्तिनिषेधो बाधितत्वात्तादृशोक्तितात्पर्यफलकः प्रियप्रवास

स्यावश्यपरिहार्यतां व्यनक्ति॥ सोयं द्विविधः॥ उक्तविषयो वक्ष्यमाणविषयस्तु वस्तुचित्सत्त्वासत्त्वभेदात्॥ आ
द्यो यथा॥ त्वत्साक्षात्करणोत्यादौ प्रागुदाहृते तत्र विरहिणीवृत्तांतकथनत्वावच्छिन्ननिषेधो मन्दान्यादेर्वृत्तांत
स्य कथने तदतिरिक्तवृत्तांतकथनपरः॥ मन्दान्यादिकथनस्यापि तद्वृत्तांतकथनत्वावच्छिन्नतया तत्सत्त्वे॥ द्वितीयस्तु॥
सखंजाराद्दृत्यादौ अत्र विरहवृत्तांतकथनत्वावच्छिन्ननिषेधे कस्यापि तद्वृत्तांतकथनस्याभावात्॥ क्वचिद्वि
धिना निषेधाक्षेपः॥ यथा॥ गच्छ गच्छसि चेत्कांत पंथानः सन्तु ते शिवाः॥ ममापि जन्म तत्रैव भूयाद्यत्र गतो भ
वान्॥ यथा वा॥ लोलैर्लोचनवारिभिः सशपथैः पादप्रणामैः प्रियैरन्यास्ता विनिवारयंति कृपणाः प्राणो प्य
रं प्रस्थितं॥ पुरस्पाहं व्रज व्रज मंगलं सुदिवसः प्रातः प्रयाते स्पाते यत्कृत्योचितमीहितं प्रियतम यात निर्गतः श्रोष्य
सि॥ अत्रोभयत्र विधिर्निषेधगर्भः॥ यत्तु रसगंगाधरे॥ तपोनिधे कौशिक रामभद्रं निनीषसे चेन्नय किं वि
कल्पैः॥ निरंतरालोकनपुण्यधन्या भवंतु वन्या अपि जीवभाजः॥ अत्र दशरथस्य विश्वामित्रं प्रत्युक्तौ मौनेषी
रिति निषेधो व्यंग्य इति संक्षेपः॥ इत्याक्षेपः॥ हेतुं विनापि कार्यं यत्रोक्तेः स्याद्विभावनासौ तु॥ यत्र प्रसिद्धकारणरा

निषेधेपि तत्कार्याविर्भावो वर्ण्यते सा विभावना॥ विशिष्टाकारणनिरपेक्षा भावना कार्योत्पत्तिर्यत्रेति व्युत्पत्ते
रित्यर्थः॥ न च कारणाभावे कार्योत्पत्त्यनुपपत्तिः। तदतिरिक्तहेत्वाक्षेपेणा तदभावात्॥ न चैवमपि कारणात्प्रागे
व कार्योत्पत्तिरूपायामतिशयोक्तौ तदंतर्भावोस्त्विति वाच्यं॥ तत्र कार्यकारणयोः पौर्वापर्यनिबंधनस्य मत्का
रोत्र तु कारणाभावेपि कार्योत्पत्तिनिबंधन इति भेदात्॥ किंच॥ तत्र पश्चाद्भाविन एव कारणस्य कार्यजनकत्वं
कार्यात्प्राग्भावित्वसूचनार्थं विवक्षितं॥ अत्र तु प्रतियोगिहेत्वन्यहेतुसापेक्षैव कार्योत्पत्तिरिति विशेषः॥ तत्र
हेत्वभावः क्वचित्स्वरूपेण॥ यथा॥ शरीरं क्षाममस्या असति दयितालिंगनसुखे भवेत्सास्रं चक्षुः क्षणमपि न सा
दृश्यत इति॥ तया सारंगाक्ष्या त्वमसि न कदाचिद्विरहितं प्रसक्ते निर्वाणे हृदयपरितापं व्रजसि किं॥ अत्र विर
हरूपहेत्वभावेपि तत्कार्यपरितापोत्पत्तिः॥ तद्विषयकज्ञानवत्त्वेपि आत्मनस्तच्छरीरावच्छिन्नमालविकासं
योगाभावस्य तद्धेतोः सत्त्वादविरोधः॥ क्वचिदवच्छेदकाभावात्॥ यथा॥ न कठोरं न वा तीक्ष्णं अस्त्रं कुसुम
धन्वनः॥ तथापि जितमेवासीदमुना भुवनत्रयं॥ अत्र तीक्ष्णत्वावच्छेदकाभावप्रयुक्ततीक्ष्णत्वादिविशिष्टा

ष्ट्याभावः॥ क्वचिद्व्यापाराभावात्॥ यथा॥ उद्यानमारुतोद्धूतचूतचंपकरेणवः॥ उदस्रयंति पांथानामस्पृशंतोपि
लोचने॥ अत्र रजसां चक्षुर्गोलकसंयोगरूपव्यापाराभावान्न हि शिष्टहेत्वभावः॥ क्वचित्सहकार्यभावात्॥ यथा॥
विद्वत्पतिराजेंद्र प्रतापतपनस्तव॥ अनातपत्रमुत्सृज्य सातपत्रं द्विषद्गणं॥ अत्रातपत्ररूपप्रतिबंधकाभावरू
पसहकार्यभावात्॥ यद्वा॥ अकारणात्कार्यजन्म चेदुक्तिः स्याद्विभावना॥ शंखाद्वीणानिनादोयमुदेतीति महद
द्भुतं॥ विरुद्धात्कार्यसंपत्तिर्दृष्टा काचिद्विभावना॥ शीतांशुकिरणास्तन्वीं दहंति संतापयंति मां॥ कार्यात्कारणज
न्मापि दृष्टा काचिद्विभावना॥ यशःपयोधिरभवत्करः कल्पतरोस्तव॥ इति तच्चिंत्यं॥ कारणं विना कार्योत्प
त्तिरिति भेदस्यैवांतर्भावात्॥ यद्वा॥ हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता॥ अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्म
थः॥ इति भेदो दीक्षितोक्तो न युक्तः॥ कारणाभावेपि कार्योत्पत्तिरित्यत्र कारणतावच्छेदकसंबंधेन कारणतावच्छे
दकावच्छिन्नप्रतियोगिताकाभावस्य विवक्षणीयत्वादिति रसगंगाधरकृतः॥ तच्चिंत्यं॥ तीक्ष्णत्वादेः कार
णतावच्छेदकत्वस्वीकारे उक्तिसंभवेपि कारणत्वाभिप्रायेणैव दीक्षितैर्भेदांतरस्य परिगणनात्॥ अयं चोक्तानुक्तनि

मितकत्वेन हेत्वा॥ आद्यायथा॥ अकुंकुममचंदनं दहदिसावहूमंडनं असेहरमकुंडलं अंगामंडलीमूषणं॥
असोसरागमसोहरां मञ्जरलंहृ रागस्पाउदं वि अकंकिरराग वलीराहअलेम्मिपुंजिजुरं॥ अत्र कुंकुमाद्यभा
वेपि लेपनाद्यभिधानाद्विभावना॥ तत्र मगोकुकिररागवन्याउत्रत्वाद्युक्तनिमित्तत्वे॥ यत्तु॥ असंभृतं मंडनमंग
यष्टेरनासवाख्यं करणं मदस्य॥ कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे॥ अत्र द्वितीयच
रणे आसवाभावेपि मदोत्पत्त्या चोक्तनिमित्ता विभावनेति सर्वस्वकारादिमतं दूषयद्भी रसगंगाधरकृद्भिरुक्तं॥
विरोधमूलत्वादेतदाद्यलंकाराणां प्रकृते च यौवनस्य मदकारणतायाः कविनैव निबद्धत्वादासवयौवन
योर्मदं प्रति श्रीहियववदौरिव निरपेक्षकारणत्वावगमात् विरोधास्फुरणाद्विभावनैवेयं न भवितुमर्हति
कृतस्तद्विशेष इति॥ तच्चिंत्यं॥ लोकप्रसिद्धकारणताकस्य मदस्य व्यतिरेकेपि यौवनान्मदोत्पत्त्यभिधाने वि
रोधस्य प्रतिभाने बाधकाभावात्॥ अन्यथा हि यौवननिरपेक्षकारणत्वप्रतीतौ यौवनान्मदोत्पत्तौ चमत्कारानु
पपत्तेः॥ आलोकपरामर्शव्यतिरेकेन धूमपरामर्शादनुमित्युत्पत्त्यादिवदनुपपत्त्यभावात्॥ किं चैवं॥ यद

वधि विलासभवनं यौवनमुदियाय चंद्रवदनायाः॥ दहनं विनैव तदवधि यूनां हृदयानि दह्यंते॥ इति भवदुक्तौ दा
हकारणमपि दृष्टम्॥ यौवनादवधि हृदयदाहोक्तौ दाहे यौवनहेतुत्वस्यापि ज्ञेला कालमतीत्यविशेषात्॥ कारणाश
ब्दनाभिधानस्य शक्तिर्किंचित्करत्वात्॥ तदुक्तं कुसुमोज्ज्वलावाचोर्थः॥ नियमस्यैवापेक्षाचित्वान्नस्यैव च कारणार्थला
दिति॥ तस्मात्स्यात्स्यावोक्तनिमित्ताविभावनाश्रयणीयावाच्योक्तवरीतिरितिदिक्॥ अनुक्तनिमित्ता यथा॥
अमांशुशिशिरीभवत्प्रसृतमंदमंदाकिनीमरुत्तरलितारकं स्फुटललाटचंद्रद्युति॥ अकुंकुमकलंकितोज्ज्व
लकपोलमुत्प्रेक्षते निराभरणसुंदरश्रवणपाशसौम्यं मुखं॥ यदपि लुब्धकधीवरपिशुनानिःकारणवैरिणो
जगति॥ इत्यत्र विभावनाप्रसक्तिं तदनभ्युपगमादिष्टापत्तिं चोद्भाव्य॥ कारणतावच्छेदकरूपावच्छिन्नप्रतियो
गिताकत्वमभावविशेषणं देयं॥ अत्र च प्रसिद्धकारणतावच्छेदकप्रतियोगिताको भावो न तु कारणताव
च्छेदकस्यापरकर्तृत्वाद्यवच्छिन्नप्रतियोगिताक इति चेत् न॥ खलाविनैवापराधं भवंति खलु वैरिणः इत्यत्रा
व्याप्तिवारणात्॥ तत्र कारणतावच्छेदकीभूताऽपराधत्वावच्छिन्नप्रतियोगिकत्वेनापि कारणाभावोक्तेः॥

नच कार्यांशेऽतिशयोऽभ्येदान्यतरालीढत्वेन विशेष इति वाच्यं । खलादिनैवापराधं दहतीति खलु सज्ञानानि त्यादौ तथा
व्यतिप्रसंगात् ॥ तत्रपीडया दाहभेदाध्यवसानसत्वादिति पूर्वपक्षयित्वा समाहितं ॥ कार्यांशे यद्विषयतावच्छेदकं
तदवच्छिन्नकार्यतानिरूपितकारणतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वमभावे विशेषणं देयं ॥ प्रकृतेऽपी
डयादाहाभेदाध्यवसानाद्दाहत्वं विषयतावच्छेदकं । अपराधत्वं च विषयितावच्छेदकीभूतपीडात्वावच्छिन्नका
र्यतानिरूपितकारणतायामेवावच्छेदकं ॥ ननु विषयतावच्छेदकीभूतदाहत्वावच्छिन्नकार्यताप्रतियोगिककार
णतायामिति तादृशापराधत्वावच्छिन्नप्रतियोगिताकाभावोक्तावपि नात्र विभावनाप्रसंगः । खलादिनैवाप
राधं दहतीति जगतीत्यलमित्युक्तौ तु स्यादेव विभावनेति ॥ तत्रापि चिंत्यते ॥ कारणतावच्छेदकरूपावच्छिन्नप्रतियो
गिताकत्वेनाभावोक्तावपि विभावनेत्यत्र न ग्रन्थकृतामाग्रहः ॥ निरुपादानसंभारमभित्तावेव तन्वते ॥ जगच्चित्रं
नमस्तस्मै कलाश्लाघ्याय शूलिने ॥ इत्यादौ तदभावात् ॥ नहि चित्रत्वावच्छिन्नकार्यता उपादानसंभारत्वावच्छि
न्नकारणतानिरूपिता । अपितु मसीलहरीतालत्वाद्यवच्छिन्नकारणतानिरूपितैव ॥ नचात्र मसीत्वाद्यवच्छिन्नप्र

त्ति योगिता कत्वेनाभाव उक्तः ॥ स्वीकृता चेयं विभावनेरालंकारिकधुर्यैरिति ॥ वेदेपीयं यथा ॥ अपाणिपादो जवनो ग्र
हीता पश्यत्यचक्षुः स शृणोत्यकर्णः ॥ स वेत्ति विश्वं न हि तस्यवेत्ता तमाहुरग्र्यं पुरुषं पुराणं ॥ इति विभावना ॥ हेतौ स
त्यपि कार्यानुत्पत्तिः स्याद्विशेषोक्तिः ॥ सत्यां सामग्र्यां कार्यानुत्पादो विशेषोक्तिः ॥ न चासामग्र्याः फलोपधानव्याप्यत
यात दनुपपत्तिः ॥ प्रतिबंधकांतरस्य सत्वेन तद्विरोधात् ॥ तदयावतिरिक्तसकलकारणसमवधानस्यैवात्र साम
नि५ ग्रीपदार्थत्वात् ॥ सा त्रेधा ॥ उक्तनिमित्ता ॥ अनुक्तनिमित्ता ॥ अचिंत्यनिमित्ता च ॥ तत्राद्या यथा ॥ गमिअ्राकइं वला आदि
हं मेहं धआरि अंग अएग अहं ॥ सहिउँअंजिउ असद्दो तह वि हु से राग्रपि जीवि आसेवो ॥ अत्र कदंबवाताभावादी
नां आश्वासहेतूनां सत्वेपि श्रीरामस्य आश्वासाभाव उक्तः ॥ आश्वासाभावप्रतिबंधकाश्च समुद्रवालादय
इति तेषां मनुक्तिः ॥ द्वितीयाद्यथा ॥ स्मरसमदुरिते विफलीकृतो भगवतोपि भवद्दहनश्रमः ॥ सुरहितायदुतात्म
तनुः पुनर्नेनुजनद्विरिविततस्त्वया मापि यथा ॥ अत्र कामदाहसामग्रीसत्वेपि तद्दाहाभाव उक्तः प्रथमार्द्धे ॥ तन्निमित्तमैत्य
स्वदुरितमेवोपन्यस्तं ॥ वस्तुतस्तु मे ध्यानकामदाहमात्रदृष्टं ॥ अपितुध्वंसप्रतियोगिमात्रवृत्तिजात्यवच्छिन्नप

यत्र स्थैव पुनः तस्य तथा ध्वंसविशेषणांगलितमिति विशेषणाभावप्रयुक्तविशिष्टाभावो देवगाढो दृश्यं स्वगाढहोम २५

गभावासमानकालीनः कामध्वंसः॥ स्फुरत्कार्योदयोमतस्य स्वगाजहोमैर्निमित्तक इति उत्तरार्द्धमप्युदाहरणं सं
भवत्येवेत्यवधेयं॥ अन्त्याद्यथा॥ लोकोपि जणाइ सउंणा आरिसोमाणमि कुंदकलिआ रुप आदीहिं सिअपाउं अ
हिलिओ इजेणाम सलेणा॥ अत्र कुंदकलिकादर्शनसत्वेपि तदिष्टानिवृत्ताभाव उक्तः॥ तत्र च किंचिन्निमित्तं लक्षणप
रूपमस्येव॥ नतु विशिष्टवक्तृशक्यमित्यविंतनिमित्तत्वं॥ अत्र वदंति॥ विभावनाविशेषोक्त्योर्न पार्थक्यं भवि
तुमर्हति॥ परस्परलक्षणव्याप्तविषयकत्वात्॥ तथाहि॥ यत्र कारणाभावेपि कार्योत्पत्तिरुच्यते तत्र कारणा
भावरूपकारणसत्वेपि कार्याभावरूपकार्यानुत्पत्तेः संभवत्येव विशेषोक्तिः॥ कार्याभावस्य कारणाभाव
प्रयोज्यतायाः सर्वसिद्धत्वात्॥ कारणादिपदानां चोभयसाधारणपात्॥ एवं यत्र सत्यपि कारणे कार्यानुत्प
त्तिर्वर्ण्यते तत्रापि कारणाभावेपि कार्याभावरूपकार्योत्पत्त्या विभावनाया अपि संभवः॥ अतो नेतरभेदोंगीका
रः प्रामाणिक इति॥ उच्यते॥ यद्धर्मावच्छिन्ना कार्यता विवक्षिता तत्प्रतियोगिकारणताश्रयाभावेपि तद्धर्मावच्छिन्नो
त्पत्तौ विभावना॥ एवं च विभावनास्थले कारणाभावनिष्ठकारणताप्रतियोगिक कार्याभावत्वावच्छिन्नका

येता न विवक्षिता॥ किं त्वभावप्रतियोगित्वेनोक्तं यत्कारणं तत्प्रतियोगिकार्यत्वावच्छिन्नमेव॥ एवं का
रणाभावोप्यभावत्वेनाभिधेयः॥ अतः कारणस्य तदभावाभावरूपत्वेपि कारणस्यैवोक्तिः॥ न तु त
दभावाभावत्वेनेत्यदोषः॥ तथा च यत्र कारणानधिकरणक्षणोत्तरक्षणस्य कार्याधिकरणत्वमुच्य
ते॥ कारणाधिकरणोत्तरक्षणस्य च यत्र कार्यानधिकरणत्वमुच्यते सा विशेषोक्तिः॥ एवं चैकत्र व्यतिरेक
व्यभिचारस्फुरणनिबंधनः परत्र चान्वयव्यभिचारस्फुरणनिबंधनश्चमत्कार इति दिक्॥ इति विशेषो
क्तिः॥ निर्देशक्रमतो यदि सममन्वयस्तद्यथासंख्यं॥ येन क्रमेण पदार्था निर्दिष्टास्तेषां क्रमनिर्दिष्टपदार्थै
स्तैः समक्रमेणैव संबंधस्तद्यथासंख्यं॥ तेजः क्षितिर्घटो वह्निरित्यादि कारणा यत्क्रमत इति॥ मा भवं तम
नलः पवनो वा वारणो मकरकुलः परश्वर्वा॥ वज्रमिन्द्रकर विप्रस्तं तेवास्वस्तितेस्फुलतया सहद्रस॥ इत्यत्र धाक्षी
दित्याद्युक्तहतक्रियास्यलेतहारणाय॥ अन्वीयमानपदार्थानां निर्दिष्टत्वोपादानं॥ यथा॥ श्रीमत्सेनपप्र
तापदहनैः सुष्टे स्वरस्याले ये प्राले येः परितो हतं हिमगिरिं श्यामानगेन्द्रात्मजा॥ ताताशोकनतः प्रियाविरहतः से

सारसंहारतो गौरीत्न्त्यतिरेकिणि स्मरहरो मुख्यं तिनाकं स्य॥ अवतीता लोकनेत्यादीनां गौरीन्त्यतीत्यादेः क्र
मेणाहेतुतयान्वयः॥ ननु क्रमेणान्वयबोधे किं नियामकमिति चेत्॥ अन्वयिसमसंख्यपदार्थज्ञानस्य यथासं
ख्यान्वयबोधत्वं कार्यतावच्छेदकमिति कल्पनात् एवेति चेत्॥ वस्तुतो योग्यता ज्ञानमेव तन्नियामकमिति मतमेव
साधीयः॥ यत्तु तथा सति कीर्तिप्रतापौ भातस्तौ सूर्यचंद्रमसाविव॥ इति क्रमभंगदोषो न स्याद्योग्यतया निर्वि
षयसंभवादिति॥ तन्न॥ त्वदुक्तरीत्या देवदत्तयज्ञदत्तयोरयाचयोधनं भवानीभवयोगरोशस्कंदौ तनयावि
त्यादावपि यथासंख्यान्वयबोधत्वावच्छिन्नापत्तेः॥ कारणसत्त्वात्॥ नचेष्टापत्तिरपसिद्धांतात्॥ तथा च यथा
संख्यान्वयबोधत्वावच्छिन्नं प्रति एकमात्रवृत्तियोग्यताज्ञानाभावः॥ उभयसाधारणयोग्यताबोधो वा प्र
तिबंधक इति त्वयापि कल्पनीयं॥ तथा चोभयकल्पने गौरवं तदपेक्षया शाब्दबोधसामान्यकारणीभूतयो
ग्यताज्ञाननियामकतयैवोपपत्तावति लाघवं॥ न च क्रमभंगदोषत्वानुपपत्त्यनुपपत्तिः॥ आसत्त्यज्ञान
रूपत्वेन दोषत्वोपपत्तेः॥ अन्वयप्रतियोगिनां अव्यवधानोपस्थितिर्हि आसत्तिः॥ तद्विपरीतं क्रमभंगस्य

षः॥ यद्वि सामान्यविशेषौ समर्थ्येते विशेषसामान्याभ्यां॥ साधर्म्याद्वैधर्म्याद्वा सोऽर्थान्तरन्यासः॥ यत्र
विशेषेण सामान्यं सामान्येन वा विशेषः॥ समर्थ्यते सोऽर्थान्तरन्यासः॥ साधर्म्यवैधर्म्याभ्यां प्रत्येकं द्वै
विध्यमिति भेदचतुष्टयमित्यर्थः॥ आद्ये साधर्म्येण यथा॥ स्थाने ष्ठु शिष्य निबद्धैर्विनियुज्यमाना
विद्याजुहं हि गुणवत्तरमातनोति॥ आदाय कृष्णलिखलोहकविप्रकीर्णं रत्नाकरो भवति वारिधिरंबु
राशिः॥ तदेव वैधर्म्येण यथा॥ अर्थं सप्रतिबंधं प्रभुरधिगंतुं सहायवानेव॥ दृश्यं तमसि न पश्यति
दीपेन विना सचक्षुरपि॥ अत्रालोकाभावे विषयनाशत्वं न वैमेतीत्येतद्विपर्यय आलोकसंयोगे सति वा
क्षुष्मवतीति॥ तेन पूर्वापर्य्यसमाधाने॥ द्वितीयं साधर्म्येण यथा॥ अमेरे नोपाश्लेकं मरदं मदरे वानि
वसतो विपक्षात् भोजाद्रुपगतवतो वा मधुलिहः॥ अपयाति कोऽपि स्वपरपरिचर्यापरिचयः प्रबंधः सा २६
ध्रुनामयमननि संधानमधुरः॥ यथा वा॥ रक्तं भावमपहाय चंद्रमा जात एव पश्रु ... मंडलः॥ विक्लि
यान खलु कालदेशजानि निर्मलप्रकृतिषु स्थिरोदया॥ तदेव वैधर्म्येण यथा मम॥ शारखंदस्फीतानि

यत मग्गो याग्गता गता म्रुगाक्षि त्वां प्राप्य प्रकृतिमधुरा भ्रांतिनितरां ॥ किमस्मिन्नन्यौर्वीज्ञिगतिदृशोर्वि
पिविषयो विशुद्धाशुद्धानां केवलसदृवारोनिरूपधिः ॥ अत्र सादृश्यप्रत्ययाभावात्सामान्यविशेषभावा
च दृष्टांतभेदः ॥ निदर्शनातिरेकस्तु तत्रैव निरूपितः । काव्यलिंगात्तु समर्थ्यसमर्थकयोः सामान्यविशेष
भावेऽर्थांतरन्यासः ॥ तदितरसंबंधे तु काव्यलिंगमित्येव भेद इति दीक्षिताः ॥ यत्तु वदंति ॥ यस्मिन्विशेष
सामान्यविशेषाः स विकस्वरः ॥ स न जिह्मम हांतोपि दुर्जयाः सागरा इव ॥ अत्र विशेषसमर्थनाय सामान्यो
पन्यासेपि पुनः सामान्यसमर्थनाय विशेषोपन्यास इति विशेषोऽलंकारांतरं ॥ यथा वा ॥ अनंतरत्नप्रभ
वस्य यस्य हिमं न सौभाग्यविलोपि जातं ॥ एको हि दोषो गुणसन्निपाते निमज्जतींदोः किरणेष्विवांकः ॥ इदमु
पमारीत्या विशेषन्यासेन ॥ अर्थांतरन्यासे यथा ॥ कर्णारुंतुदरमंतरेणारणितं गाहस्व काक स्वयं माकं
दं मकरंदशालिनमिह त्वां मन्महे कोकिलं ॥ धन्यानि स्थलवैभवेन कतिचिद्वस्तूनि कस्तूरिकां नेपालक्षि
तिपालभालपतिते पंकेन शंकेत कः ॥ न चात्र विशेषसमर्थनार्थप्रवृत्तं सामान्यस्य लोकप्रसिद्धतया सम

र्थनानपेक्षत्वोल्लेखं तत्समर्थनाय विशेषान्तरोपन्यासमन्यस्मिन्निति नार्थं॥ सामान्यस्य सर्वत्र लोकप्रसिद्धत्व
नियमाभावात्॥ नहि यो यो धूमवान् सोऽग्निमानिति व्याप्तिरूपसामान्यस्य लोकसंप्रतिपन्नतया यथाम
हानसे इति तद्विशेषरूपदृष्टान्तानुपादानं संभवमात्रेण अप्रसिद्धव्याप्तिरूपसामान्योपन्यासम
र्पितद्विशेषरूपदृष्टान्तोपन्यासनिरपेक्षत्वे संभवति॥ अतो यत्र सामान्यस्य लोकेन संप्रतिपत्तिस्तत्र
तत्समर्थनार्थं विशेषान्तरोपन्यासस्यावश्यकत्वादिदमलंकारान्तरमिति॥ तच्चिंत्यं॥ एवमप्य
र्थान्तरन्यासहृदयरूपतयाऽतिरिक्तत्वानौचित्यात्॥ प्रकृतविशेषस्य सामान्येन समर्थनादेकोऽर्था
न्तरन्यासः॥ सामान्यस्य च विशेषेण समर्थनादपर इति भेदद्वयसमावेशात्मकतायाः स्फुटत्वा
त्किंच॥ प्रसिद्धसामान्यस्य समर्थनानपेक्षत्वेऽपि अप्रसिद्धस्य तस्य तदपेक्षत्वमस्तीति तत्समर्थने
भिन्नालंकारोऽनुचित एव॥ तथाहि॥ इंदोः किरणो ह्विवांकदृत्वप्रदेशपरित्यागे अर्थान्तरन्यासत्वं न
स्यात्॥ एको हि दोषो गुणसन्निपाते निमज्जतीति सामान्यस्य त्वन्मते अप्रसिद्धत्वेन विशेषोपन्या

संविन्नासमस्य गृह्णौ प्रतिष्ठितत्वात्संभवेन समर्थकत्वानुपपत्तेः ॥ एवं हनुमानब्धिमतरद्दुःकरं किंम
हात्मनां ॥ इत्यत्र अगस्त्योऽपि हि पपौ सिंधुं ॥ इति कृते दुःकरं किंमहात्मनामिति सामान्यस्याप्रसिद्धत्व
यास्वीकार्यतया तत्परित्यक्तसामान्यमात्रोपन्यासेनापि हनूमानित्यस्य समर्थनं न स्यादिति महत्य
नुपपत्तिः ॥ तस्माद्विशेषं विना सामान्यस्य ग्रहीतुमशक्यतया सर्वत्र समर्थनीयत्वाद्विशेषादिति
के विशेषस्थले गृहीतसामान्येनैव समर्थनं सामान्यग्राहकीभूतो विशेषसहचारस्थक्वचिद
र्थगम्यः क्वचिच्च स्वशब्दार्पकत्विनैवोपात्तः इत्येतावानेव विशेषो न तु क्वचित्समर्थनानपेक्षत्वं क्वचि
त्तदपेक्षत्वमिति दिक् ॥ इत्यर्थान्तरन्यासः ॥ अविरोधेऽपि विरोधो यत्रोक्तः स्याद्विरोधः सः ॥ स्याज्जा
तेर्गुणक्रियाद्रव्याणां स्वस्वपरयोगात् ॥ परमार्थतो विरोधाभावेऽपि यत्रापाततो विरोधाभासस्तत
स विरोधालंकार इत्यर्थः ॥ अयमेव विरोधाभास इति गीयते ॥ वह्निनापि सिंचतीत्यादिवारणाय यत्रा
पातत इत्युक्तं ॥ तल्लाभायाभावेपीत्यंतः ॥ तद्भेदानाह ॥ जातेरित्यादि ॥ जातिगुणक्रियाद्रव्याणां स्वे

न स्योत्तरे रासहेत्वर्थः॥ एवं च जातिर्गुणक्रियाद्रव्यैः गुणस्य गुणक्रियाद्रव्यैः क्रियायाः क्रियाद्रव्याभ्यां
द्रव्यस्य द्रव्येणेति दशभेदाः पर्यवसन्नाः॥ गुणो न सह जातिविरोधस्तु पृथक् नोक्तः॥ जाते गुणविरोध
स्ववक्तव्ये इतरभावादेव मुक्तत्वापि वो ध्यम्॥ तत्र जाते जात्या यथा श्रीरुद्रचन्द्रदेवानां॥ यस्याः करानमाद्र
तोयिभवतो वस्थ्यर्मी द्विविधा येनां गे मेलयानिलोपि भवति प्रायः करीषानलः॥ हुंहो मानशवालि
राप्रतिपदं प्रत्याशागुद्धीविकां कुर्वते न यतोतिपिंगुनरहो कर्तुं किमाकांक्षसि॥ अत्र द्वितीयपादे वा
युत्ववह्नित्व जात्योर्विरोधः॥ यथा वा॥ रमसा दमिसत्तु मुद्यतानां दयितानां सखि वारिशेविवस्वान्॥ रज
नीविसाधकारमर्चिर्विपिनं वेश्मविमार्ग एव मार्गः॥ अत्र घनत्वादि जाती सूर्यत्वादि जात्या विरोधः॥
द्वारशसूर्य व्यक्तिवृत्तितया न स्य जातित्वात्॥ जातिपदं च सामान्यमात्रपरं॥ नैतन्नाधकारत्वादीनाम जाति
त्वेप्यदोषः॥ जातीनामेकार्थी समवायित्वमेव विरोधवीजं॥ रागो त्वंकस्मात् तेषां प्रतिवंधकत्वाभावादवि
रोधः॥ जातेर्गुणेन यथा॥ परं जोहु उहु गरल सरिसो चंद तार रसो खद करवा रोहा रोर अशिपवरा दे

अ.को.
१२४

हतवरणा॥ मृणाली बाणाली जलरिअजलिह्रातग्रूले दावरिह्वाकमलवंआणा दीहरा आणा॥ अथ ख्योतन
त्वजाते रौक्ष्येन स्पर्शविशेषरूपगुणेन सहतत्रिष्ठकार्यतानिरूपितसमवायिकारणतानवच्छेदकत्वरूपो
विरोधः॥ विरहवर्णानात्परिहारः॥ जातेः क्रियया यथा॥ किसलयुमकरवरणाविहूकुवलेणआणामिअंक अर
वअणाविा॥ अहहयाप वचंप अगीतहविहुतवद्दलिअहीर अं॥ किसलयत्वादिजातीनां तपतीतिक्रियया सह
तेन नकतानवच्छेदकरूपो विरोधः प्रागवत्परिहारः॥ जातेर्द्रव्येण यथा॥ प्राणेश्वरोरुज्झ जेनेने कृतान्नियोगा द्
शान्यराननगमहितुरद्यतत्प्रसूयाः॥ दुर्दैववैभववलात्सखिसंप्रतंयचंद्रोपि वह्निरभवत्कदहापराध्येत॥ इह चं
द्रत्वे एकव्यक्तिवृत्तित्वान्न जातिरितिद्रव्यशरीरे वह्नित्वजातेस्तत्समवेतत्वाभावरूपविरोधः प्रागवदेवप
रिहारः॥ यद्यपि परिमाणभेदेन द्रव्यभेदावश्यकत्वात्तैजससत्वसंतानांतरोत्पत्त्यावश्यकत्वाद्धि चंद्रस्यानेक
त्वमेवास्ति॥ तथापि समानकालीनानेकवृत्तिधर्मस्यैव जातित्वेन विवक्षितः॥ चंद्रस्य च स्मरणादिभेदेन व
हुत्वेप्येकस्मरोतदभावात्॥ चंद्रपदस्य द्रव्यवाचकत्वमुक्तं॥ एवमन्यत्रापि बोध्यं॥ गुणस्य गुणेन यथा॥ सरसा

विसृमरद्धि अजात्या दुःखस्य दृष्टहि अत्र आवि ॥ रत्नावि पंडुरद्धि अजा आविरईत्तु हविर्जीव ॥ दृष्टहरक्रत्व पां
डुरत्वगुणयोः समानकालीनतद्वद्धेद्रकानवद्धिः ध्यत्वरूपो विरोधः ॥ रत्नपदस्यानुरागविशेषणत्वात्परिहा
रः ॥ गुणस्य क्रियया यथा ॥ यदिंदावानेरंप्रसांधिनिजनेवानभजते व्यनक्तितस्तापं यदयमति धीरो
पि विषमं ॥ प्रियंगुश्यामांगप्रकृतिरपि वा पांडुमधुरं वपुःश्यामं क्षामं वहति रमणीयत्वमवति ॥ अ
त्र धैर्यगुणस्य तापव्यक्तिक्रियया तत्प्रतिबंधकत्वरूपो विरोधः ॥ विरहावस्थाप्रावण्यात् परिहारः ॥ गु
णस्य द्रव्यमेदेन यथा मम ॥ देवः सवाक्षनसगो वरतानिहीनम्रारिप्रभावविभवः प्रमदं क्रियाद्वः ॥ वै
रोचनिस्फुरत्कृतेनिजिह्नक्षमाणास्याकाशमध्यगः कृतं चरस्रोनयस्य ॥ अत्राकाशत्वमेकव्यक्तिकत्वा
ज्जातिरितिद्रव्यं गुणेन अगुपरिमाणरूपगुणस्य तदनधिकरणत्वरूपो विरोधः ॥ भगवत्प्रभावा
तिशयात्परिहारः ॥ क्रियायाः क्रियया यथा ॥ निकामं क्षामांगी सहजकदलीगर्भसुभगा कलाशेषा मू
र्तिः शशिन इव नेत्रोत्सवकरी ॥ अवस्थामापन्ना मदनदहनोद्दाहविधुरामियं नः कल्याणी रमयति म

नः कंपयति वा ॥ अत्र रमणाकंपक्रियायोगपदैककारणाजन्यत्वरूपो विरोधः ॥ अवच्छेदकद्वयसत्वात्तदभा
वः ॥ क्रियायाद्रव्येणायथा ॥ कंपइमहिंदसेलो हरिसरेवाहेणादलइ मेइणीवेढं ॥ सहि दुह्निणात ह्ला उंला
वरणा उद्धाइमल अवणाकुसुमरउं ॥ अत्र महेंद्रशैलत्वंवत्रजातिरिति ॥ तेन द्रव्येणाकंपक्रियायाः स्तितसमवा
यिकत्वाभावरूपो विरोधः ॥ वानरातिशयवर्णनात्परिहारः ॥ अत्र विरोधितावच्छेदकतात्पर्यास्याधिक
रणत्वेन विवक्षितो योधर्मस्तद्वत्वमेव विरोधित्वं ॥ प्रकृते च महेंद्रशैलत्वस्यैव जातित्वेप्यदोषः ॥ द्रव्यस्य
द्रव्येण यथा मम ॥ प्रतिलवविवर्द्धमानत्वत्कीर्तिकदंवसंबाधं ॥ आकाशमपि महीश्वर हिमवानिति कौ
तुकं भाति ॥ अत्राकाशहिमवत्त्वेन जातिरिति द्रव्ययोः तादात्म्याभावरूपो विरोधः ॥ कीर्तिबाहुल्यवर्ण
नात्परिहारः ॥ अत्र वदंति ॥ विरोधाभासकस्यापि शब्दादेः सत्वे विरोधः शाब्दः ॥ अन्यथात्वार्थ इति ताव
त्सिद्धांतस्थितिः ॥ तत्र यद्यपि विरोधस्य शाब्दत्वेन शाब्दजन्यज्ञानविषयत्वं ॥ विशेष्यविशेषणासंसर्गा
तिरिक्तस्य शाब्देऽभानात् ॥ नचत्रोपात्रयदित्यादौ नञ्तरपदार्थयोरन्वयप्रतियोगित्वस्य संसर्गत्वात्तै

सैव च विरोधपदार्थत्वात्संसर्गतयैव तद्भानमिति वाच्यं ॥ सुप्तोपि प्रबुद्ध इत्यादौ तथाप्यगतेः ॥ न च तत्रापि लक्ष-
णया सुप्तत्वविरुद्धत्ववदभिन्नः सुप्त इति बोध इति वाच्यम् ॥ तथाऽनेनुभवादिलक्षव्यवस्थानुपपत्तेः ॥ तथा-
पि सुप्तोपि प्रबुद्ध इत्यादौ स्वापप्रबोधोभयधर्मोपस्थितौ सत्यां तयोर्विरोधोपि स्मर्यते ॥ तत्र च प्रतिबंधक-
सामग्र्या बलवत्त्वात् ॥ विरुद्धाविमौ धर्माविति मानसे वा जनाम्मूलके वा बोधे सति तेनैव प्रतिबंधात्सुप्तविरुद्ध-
दिपदार्थानामभेदान्वयबोधस्यानुदयात् ॥ शात्वंतरालक्षितद्वितीयार्थमादायैवान्वयबोधः ॥ न चैवं विरोध-
स्यालंकारत्वानुपपत्तिः ॥ शिथिलमूलत्वेन तस्य निर्वर्त्तेरिति वाच्यं ॥ कविसंरंभगोचरत्वेन तस्यैव चमत्कार-
हेतुत्वादिति ॥ अन्ये तु विरोधिप्रतियोगिपदार्थयोर्विरोधज्ञानरूपप्रतिबंधकसत्त्वादभेदान्वयबोधे ऽपि
विरहे श्लेषभित्तिकाभेदाध्यवसायन्यायेन विरोधाभासकपदार्थान्वयप्रतियोगिपदार्थाभिन्नत्वेन भा-
सते ॥ तथा चाविरुद्धार्थस्यान्वयेपि तदभेदप्रतियोगिविरुद्धार्थस्यापि निःशेषतया निवृत्त्यभावान्मानसज्ञा-
नविषयत्वेन विरुद्ध एव चमत्कारीत्याहुः ॥ वयं त्वन्वयप्रतियोगिपदार्थाभेदाध्यवसितविरोधप्रतियोगिप

रा.को.
१२६
126

शार्थेन सह वान्यपदार्थाभेदान्वयबोधः॥ विरोधप्रतियोगिपदाज्ञानसत्वेप्याहार्यधीं नञर्थाधीने वा बोधे
तस्य प्रतिबंधकत्वाभावेनाभेदज्ञानोपपत्तेः॥ यद्वान्वयप्रतियोगिपदार्थभिन्नत्वेनाज्ञायमानविरोधप्रति
योगिपदार्थाभिन्नत्वेनान्यज्ञानत्वस्यैव विरोधज्ञानप्रतिबध्यतावच्छेदकत्वकल्पनात्॥ यद्वा॥ आहार्य
योग्यताज्ञानेन विरोधज्ञानसत्वेप्यभेदान्वयबोधसंभवात्॥ अपवादः द्वादशस्थले विरुद्धप्रतियोगिकाभे
दस्यैव संसर्गतयाभासते॥ अपि शब्दस्य तात्पर्यग्राहकः॥ न च विरोधाभेदयोः परस्परविरुद्धत्वेनैक
कालावच्छिन्नैकसंसर्गत्वानुपपत्तिः॥ अभेदस्यैव नामार्थान्वयसंसर्गतया विरोधस्य तत्वे मानाभावा
द्येति वाच्यम्॥ अनुभवानुरोधेन तत्कल्पनात्॥ अभेदसंसर्गतायाश्च मप्यनपायाञ्च॥ विरोधज्ञान
स्य चाभेदमात्रसंसर्गकज्ञानत्वमेव प्रतिबध्यतावच्छेदकं॥ न तु विरोधविशेषितमपि॥ यद्वा॥ अपि श
ब्दोपस्थापितो विरोध एकपदार्थनिष्ठप्रकारतानिरूपितप्रतियोगिनिष्ठसांसर्गिकविषयतानिरू
पितविशेष्यताशाली सन्॥ आश्रयत्वसंबंधेनापरपदार्थेन्वेति॥ पुनश्चैकपदार्थोऽभेदसंबंधेना

राम:
१२६

कस्येद

परपदार्थेऽन्वेति॥ तथा च सुमेरुश्रृङ्गेष्वित्यत्र सुमेरुशिखरेषु इव मत्तवदभिन्नस्य श्रृङ्गेष्वत्वमिति बोधः॥ शु
त्वपि तैव रिमा च समस्तोरः प्रतियोगितया विरोधे आश्रयत्वादिना च पदार्थान्तरेण तयोरविरुद्धत्वादिति
युक्तमोकलामाम॥ अत्र च सुमेरुशिखरेष्वद्भवाऽवोद्भुःखितो हि श्रियादीकथं विरोधस्यालंका
रत्वं॥ आरोपसत्त्वेन रूपकस्यैव संभवात्॥ अन्यथा रूपकस्थलेऽपि विरोधस्यैवालंकारत्वप्रसंगः॥
अत आह॥ रूपकस्थले तूपमाननिष्ठासाधारणगुणानामुपमेयगतत्वेन प्रतिपत्त्यर्थं तन्निर्वाहका
रोपस्यैव चमत्कारकत्वं॥ ननु विरोधत्वस्यापि तेन विवक्षितार्थानुपपादनात्॥ कुसुमानीत्यादौ च कुसुमा
नामपि दुःखजनकत्वप्रयुक्तचमत्कारो विवक्षितो गिरहिरण्यवस्यादीनामत्यद्भुतस्यैव विवक्षितत्वात्तस्य
च विरोधे नैवोपादानात्॥ अतः सत्तामात्रेणारोपस्यालंकारतेति॥ योऽवस्थान्तरः स्वभावस्तस्य निरुक्तिः
स्वभावोक्तिः॥ तज्जातीयनियतधर्मवर्णनं स्वभावोक्तिः॥ स्वभावो हि द्विविधः॥ साधारणः प्रातिस्वि
कश्च॥ तत्र जातिविशेषावच्छिन्नस्य तस्य चमत्कारकारित्वेऽपि दशाविशेषावच्छिन्नस्वभावस्य लौकि

कत्वेपि प्रतिभामात्रगम्यतया चमत्कारजनकत्वादलंकारत्वमिति न्यायपंचाननादयः॥ यथा॥ ग्रीवाभंगाभिरा
मेष्टुद्रस्तुपतति स्यंदने बद्धदृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायं॥ शष्पैरर्द्धावलीढैः श्रम
विवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥ यथा वा॥ कुर्वन्नाभु
ग्नकंठोत्कुररवनिकरैः कैटिः कंधरामातिरश्चीं लोले नाहन्यमानं तु हि न करामचायं वतीकेसरेशा॥ निद्राकं
टूकषायःकषयति निविडितश्रोत्रशुक्तिस्तुरंगस्त्वंगत्यस्माज्जलप्लुतन्तुर्वसकरा॥ क्रांतमंगैरेतैरेशा॥ आ
जस्तुतिर्विपर्ययपर्यवसाने स्तुतिस्तुत्योः॥ अस्तुतेर्निंदायाः स्तुतौ पर्यवसाने॥ स्तुतेर्वा निंदायां तात्पर्ये
व्याजस्तुतिः॥ व्याजेन स्तुति व्याजरूपा वा स्तुतिः इति व्युत्पत्तेरित्यर्थः॥ आद्या यथा मम॥ मिढ्रवीर्यतेरस्क
रोषिमहत्सापूज्यं परं मन्ये से दूरादरस्य सिमार्गरता न्तरा पुंतान्धत्सेति वकेधनुः॥ नित्यं चासिस्तुवरीदा
न निरतो रैकमस्तांतरस्त्वां केनामगुरोः स्विलोकतिलकस्त्वत्पास्पदं कुमहे॥ द्वितीया यथा॥ किं केतकीकुसु
मकोशलमुत्यतांतेयद्रायसे रपिससदासहमावमाप्य॥ जटालं विनरकीकसदामसंगभीत्या शिरः स्मर

रियोरयिनिअंहासि॥ अलंकारांतरसंकीर्णा यथा॥ उग्रग्राहमुदन्वतो जलमतिक्रामत्यनालंबने व्योम्नि आ
म्यति दुर्गमं क्षितिभृतां मूर्ध्नि न मारोहति॥ व्याप्ता याति दिशां कुलैरहितकुलैः पातालमेकाकिनी कीर्त्तिस्ते मद
नाभिराम कृतकं मन्ये भयं योषितां॥ अत्र कीर्तौ स्त्रीत्वारोपाद्व्यवहारारोपे सत्यत्वप्रतीत्युत्प्रेक्षितनिंदायाः स्तुतिपर्य
वसायितया समासोक्तिसंकीर्णा॥ अन्यनिंदास्तुतिर्व्याजस्तुतिर्निंदावगतात्रापि दृश्यते॥ यथा॥ क
स्त्वं वानर राम राजभवने लेख्यार्थसंवाहको यातः कुत्र पुरागतः स हनुमान्निर्दग्धलंकापुरः॥ बद्धो राक्षस
सूनुनेति कपिभिः संताडितस्तर्जितः सव्रीडस्तु पराभवो वनमृगः कुत्रेति न ज्ञायते॥ अत्र हनुमन्निंदया वान
रांतरस्तुत्यभिव्यक्तिः॥ यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटूक्त्या नैषां गर्ववचः शृणोषि न वतात्र
त्याशया धावसि। काले बालतृणानि खादसि परं निद्रासि निद्रागमे तन्मे ब्रूहि कुरंग कुत्र भवता किं ना
मतप्तं तपः॥ अत्र हरिणस्तुत्या राजसेवानिविष्टस्यात्मनो निंदा व्यज्यत इति दीक्षिताः॥ प्रांचस्तु स्तुतिनिं
दयोः सामानाधिकरण्ये न मतीनावेवोक्तालंकारस्याभ्युपगमं इति॥ तेषामयमाशयः॥ निंदया स्तुतिर्हि वयत्र

स्तुत्यत्वविहितविषयकत्वे च॥ तावत्स्तुतिनिंदयोर्व्याजत्वमिति विशेषमेव॥ तदेव वाच्यालंकारप्रवृत्तिनिमित्तं॥ तत इय
स्यैव स्तुतिनिंदे तस्यैव निंदास्तुत्योः प्रतीतौ संभवति न त्वन्यथा॥ न च स्वविपर्ययतात्पर्यक स्तुतिनिंदान्यतर
कत्वमेव प्रवृत्तिनिमित्तं॥ तत्र सामानाधिकरण्यवैयधिकरण्योभयसाधारण्यमिति॥ वाच्यं॥ एकालंका
रोपाध्यवधिविषयसाधारण्यस्यालंकारविभाजकोपाधेः कल्पयितुमनुचितत्वात्॥ वैयधिकरण्यस्य
ले चाप्रस्तुतप्रशंसयैवोपपत्तेस्तत्साधारण्यप्रवृत्तिनिमित्तकल्पने प्रमाणाभावात्॥ तदुक्तमाचार्यदंडिना॥
अप्रस्तुतप्रशंसा स्यादप्रक्रांतेषु या स्तुतिः॥ अधैर्ययन्त्रसुलभैर्जलदर्भांकुरादिभिः॥ सुखं जीवंति हरि
णा नवेष्वपरसेविनः॥ सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते॥ राजानुवर्तनक्लेशनिर्विण्णेन मनस्वि
नेति॥ यत्त्वप्रस्तुतप्रशंसायां अप्रस्तुतेन प्रस्तुतार्थप्रतिपत्तिमात्रं न तु प्रकृताप्रकृतयोर्निंदास्तुति
स्वरूपत्वनियमः॥ अत्र तु स्तुत्या निंदाभिव्यक्तेर्नियमात्॥ किं चैवं संमतस्थलेपि अप्रस्तुताभ्यां स्तु
तिनिंदाभ्यां प्रस्तुतनिंदास्तुतिप्रतीतिरिति॥ अप्रस्तुतप्रशंसैव स्यात्॥ इति व्याजस्तुतेरुच्छेदापत्तिः॥

स्तुतिनिंदाप्रतीतिरूपविशेषाद्व्यतिरेकस्तूभयत्रापि समानः॥ अतोऽपैरयत्र स्तुलमेरित्याशेषो व्या
जस्तुतिरेव युक्तेति॥ तच्चिंत्यं॥ अप्रस्तुतेन प्रस्तुतप्रतिपत्तिमात्रमप्रस्तुतप्रशंसास्वरूपं॥ तेषां कृ स्व
लेप्यबाधितमेवेति॥ ननिंदास्तुतिप्रतीतिनियमेवैलक्षण्ये नातिरिक्तत्वसंभवः॥ उक्तधर्मावच्छि
न्नत्वेन तदैक्यासिद्धौऽवांतरविशेषेणातद्भेदानुपपत्तेः॥ अन्यथाऽनयैव रीत्या सामान्यधर्मावच्छि
न्नाऽवांतरतत्तद्विशेषस्थलेप्यवांतरकल्पनेऽप्रस्तुतप्रशंसाविलयापत्तेः॥ यदपि किंचैवमि
त्यादि॥ तदप्यसत्॥ संमतस्थले स्तुतिनिंदयोरेकधर्मिकत्वादप्रस्तुतप्रशंसायास्तत्रासंभवे
न व्याजस्तुतेः पार्थक्यस्यसाम्राज्यात्॥ प्रस्तुतधर्मिकेऽप्यप्रस्तुतप्रशंसाभ्युपगमे तु ललितालंकार
पार्थक्यस्वीकारस्तेनैव व्याहतः स्यादितिदिक्॥ सहसमभिव्याहारात् सहोक्तिरुभयान्विते धर्मे सहा
दिपदसन्निधानाद्यत्र धर्मवाचकपदस्य विशेष्यविशेषणयोरुभयान्वितार्थबोधकत्वं सा सहोक्तिः॥ उ
भयनिष्ठधर्मस्य संहेगोक्ति यत्र कृत्यत्तेरित्यर्थः॥ चैत्रमैत्रौ सहागच्छतः तद्गत्यन्वयस्तु सहार्थस्य समभि

व्याहारप्रयुक्तो नोभयत्रान्वयः॥ न चाप्रगुणप्रधानभावे नेति नातिव्याप्तिः॥ तस्माद्यत्रैकस्यैवाँगमुख्यतयाऽ
न्यत्र च गुणतया धर्मान्वयस्तत्रायमलंकारः॥ यथा॥ दिव्यं हं दिव्य श्रेहि सहसद्दसंके अभंगेवहिं आसंका॥ आ
पाण्डुरोहाहसुद्दी कलमेन समं कलमगोपी॥ अत्र कलमेन समं कलमगोपी मुष्यतीति वाक्ये॥ तत्रोरगाता
र्थप्रकारकशाब्दबोधं प्रति प्रथमांतपदजन्योपस्थितेः कारणतया गोपीत्यत्र मुष्यतीत्यत्रान्वयः संभवति॥
न तु कलमपदे तस्य प्रथमांतत्वाभावात्॥ तथापि सहशब्दसमभिव्याहारात्तदन्वयः॥ सहार्थो हि साहित्यं।
तच्चैकधर्मान्वयित्वरूपं॥ न च कलमपदे मुष्यतीत्यस्यानन्वये तयोः साहित्यं संभवतीति॥ तथा च कलम
निष्ठशोकसमानकालीनशोषाश्रयो गोपीत्यर्थः॥ मालारूपा यथा॥ धीरेण शिक्षा आमा हि त्रपएण सम
मं अणिहिआउ अएसा॥ उछायेण सह भुआ बाहेण समं गलंति सेउल्लावा॥ यथा वा॥ उत्सिक्तं सह कौ
शिकस्य पुलकैः सार्द्धं मुखैर्नामितं भूपानां जनकस्य संशयधिया साकं समास्फालितं॥ वैदेहीमनसा सा
र्द्धं च सहसा कृष्टं ततो भार्गवप्रौढाहंकृतिदुर्मदेन सहितं तद्भग्नमैशं धनुः॥ अत्रोपाये कार्यकारणयोः

साहित्यरूपातिशयोक्तिमूलेयं॥ गोपीशोकस्य कलमशोषजन्यत्वेपि द्वयोः समानकालत्वाभिधानात्॥ समासस्फालि
ता कृष्णादेः धर्मयोरभेदाध्यवसायरूपातिशयोक्तिमूलत्वा॥ धनुषः समास्फालनेक्रियाविशेषः॥ संशयज्ञानस्य ना
कर्षणकोटिप्रतिबंधः॥ आकर्षितं स्वामिमुखं जनककर्म॥ मनसस्तु स्वानुरक्तत्वमिति विशेषसत्वात्॥ अत्रव
देति॥ धर्मयोरभेदाध्यवसानमूलत्वस्य लक्षवसहोक्तिर्भवितुमर्हति॥ कार्यकारणयोः पौर्वापर्यविपर्ययात्मका
रातिशयोक्तिमूलभेदस्तु प्राचीनोक्तो न युक्तः॥ तत्रातिशयोक्तेरेवालंकारत्वसंभवात्॥ तवकोपोरिनाशश्च जाये
ते युगपदित्येतदतिशयोक्तावपि स्यात् तवकोपोरिनाशेन सहैव जायते इति सहोक्तौ विच्छित्तिविशेषानुभवा
त्॥ तस्यैव चालंकारपार्थक्यव्यवस्थापकत्वात्॥ न चैवं धर्मयोरभेदाध्यवसानस्थलेप्यतिशयोक्तिसत्वात्कथं
पार्थक्यमिति सहोक्तिर्दूरदिति वाच्यम्॥ तत्राभेदाध्यवसायस्य सहोक्त्युपस्कारकत्वेन गुणतया सहोक्ति
तिरस्काराभावात्॥ पौर्वापर्यविपर्ययस्थले च सहोक्तेरेवातिशयोक्त्युपस्थापकत्वेन वैषम्यात्॥ किंच उपमाने
नोपमेयनिगरणमेवातिशयोक्तिरलंकारः॥ निगरणमात्रं तु न तथा॥ अतो नातिशयोक्तिविषयाभावात्सहो

अलं०
१.३.
१३०

क्तिरेवेति॥ वस्तुतो दीपकं तु लघ्यो गिनायो वेतरं तर्भाव:॥ तत्रैकरूपे णासर्वत्र धर्मान्वयो व्यक्तप्रधानमा
वेतिविशेषस्तदंतरमेदत्वमेव साधयति॥ न त्वतिरिक्तत्वं विच्छित्तिविशेषानाधायकत्वात् तस्मात्प्रा
नातुभवमात्र प्रमाणकमेवास्या: पार्थक्यमिति॥ यत्रान्येन विनान्यो: साधु: स च विनोक्ति: सा॥ यत्र केनचि
द्विनाकस्यचिदप्राशस्त्यं वोच्यते सा विनोक्ति:॥ आद्या यथा॥ तव रूपमिदं तया विना विफलं पुष्पमिवाप
केशिन:॥ इयमद्धुपनोव्रथावनी स्वव नीसप्रवदन्त्यिकापिका॥ अत्र मैमी व्यतिरेकेणानलीयरूपादी
नीवैफल्यप्राशस्त्यं॥ यथा वा॥ अनेन रहिता नैषा नानया रहितोप्यसौ॥ कान्तस्त्रिनी विनाहंसकस्याहं
सोत्रिनीं विना॥ अत्र मेदारवती स्फुदरसेनयो रन्योन्यव्यतिरेकप्रयुक्तमन्योन्यनिष्ठमप्राशस्त्यं॥ द्विती
यायथामम॥ निशायेव विना सरोजिनीसरसीप्रारम्भमतराय था॥ विशारदत्वमुपैति भारती जडभावेन विना
विपश्चितां॥ अत्र जाड्यादिव्यतिरेकप्रयुक्तं भारत्यादिनिष्ठप्राशस्त्यमभिधानं विनापदं चार्थपरं॥ तेनान्तरं
ग्यादीनामुपसंग्रह:॥ केचित्तु॥ नित्यसंबंधानामसंबंधविनोक्ति:॥ यथा॥ मरुणालमदानिलचंदनानां

राम:
१३.

कृशीरशैवालकृशेशयानां॥ वियोगदूरीकृतचेतनायाः भिन्ने वशैत्यं भवतीति प्रतीतिः॥ अत्र चंदनादीनां शै-
त्यस्याविनाभावेधिविनाभावो निवर्तितः॥ तत्स्थितं॥ अत्र शैत्यसाक्षात्काराभावस्य वा तस्य शैत्यविनाभा-
स्यानुक्तेशनचंदनस्पर्शनस्य शैत्यविषयकत्वनियमादत्र चंदनादिस्पर्शने शैत्यविषयकत्वनियमस्या-
सिद्धेरिति॥ तस्मादविनाभावेत्र प्राथिकसाहचर्यमेव व्याप्तिस्थिते च संगतिः॥ यत्त्वलंकारान्तरालिंगनेनै-
वास्य चमत्कारो न स्वतः॥ अतो नातिरिक्तोयमिति॥ तन्न॥ उक्तोदाहरणे किं विश्वतिरेकप्रयुक्तः प्राशस्त्यादिज्ञा-
नाद्रेव चमत्कारो स्यात्॥ सदृशासदृशैरर्थानां विनिमयस्तु परिवृत्तिः॥ समेन समस्य न्यूनेनोत्तमस्य न्यून-
स्य च विनिमय इति द्वेधा परिवृत्तिः॥ आद्या यथा॥ आदाय चरणाग्रं गलं किसलयमस्मादियमत्र चरणा-
मर्पयति॥ उभयोः सदृशविनिमयादात्मानमवंचितं मन्ये॥ अत्र धरमालविकाया अशोकवृक्षात्किसलं गृहीतं सा-
र्यं किसलयं गृहीत्वा तत्र दोहदार्थं चरणप्रहारः कृत इति अग्निमित्रोक्तिः॥ उत्तमेनोत्तमस्य विनिमयः न्यूनेन न्यू-
नस्य॥ यथा॥ अस्थिमालामयीं दत्वा मुंडमालामयी तनुः॥ गृह्णंतीं त्वत्तुरस्यानां कोलाहलः स्मरशासनेतिरस्कं

श्रे·कौ·
१३१

131

गाधरकृतः॥ द्वितीयायथा॥ आरत्नेदीप्तमणिमेवरस्यदत्वायरस्मैरवतुसायधूर्तैः॥२ अथतियारभूतिकूटेहेमतत्वां
डुलाग्रंरजतेःस्वरोन॥ अत्रसायंकालेनचंद्ररूपंकुग्रिमसुवर्णंदत्वासूर्यरूपोमणिविशेषोगृहीतइतिन्यूनेनो
तमस्य॥ तृतीयायथा॥ अस्ताचलेस्मिन्निकषोपलाभेसंध्याकषाक्लेरवपरीक्षितोयः॥ विक्रीयतेहिहिरण्यपिं
डेनाराववराटानियमादितथ्योः॥ अत्रस्वर्णपिंडेनवराटिकोपादानादुत्तमेनन्यूनस्य॥ एषाचक्वचिद्धर्मस्यापि॥ यथा
सुहृत्स्वं अंजरांदुल्लेहेविद्रूराटिअस्यआरोंतः॥ अस्यआर अज अज्ञी अविरोतराकआवराहोसि॥ अत्रप्रिय
दर्शनेजीवनयोर्विनिमयोगम्यते॥ यथावा॥ वाशरिरराभरिअं ओद्धिंकरारइउप्पलरसरा॥ कृतंतोअविअहुं
डुंवंतोकौस्थिरेद्वारा॥ अत्रास्थिरजोविभागंदत्वातद्धनोपादानम्॥ यथावा॥ अस्मसहस्साइं तुहचरणोजीररामअ
रा अप्पिअस्सजइतेवितेराषारोराविअसेजेराहंविक्का॥ अत्रनायकवाराणेषं स्मरद्वाराकृत्वातस्मैजीवदानं॥ यत्रच
मत्कारस्तत्रैवेयम्॥ अतोविशुद्धा इमासूमासमीक्ष्यपामरोपादरंचइस्लेरा॥ शिशुमस्तुरैस्साम्लीअपरारशिअ
हंतो॥ इत्यादौनातिप्रसंगः॥ अत्रस्वकीयंकिंचित्त्यक्त्वान्यस्योपादानमेतदलंकारशरीरं॥ किंचित्यमास्यामर

राम:
१३१

रागानि यौवने धृतं त्वया वार्द्धके शोभितं वक्ष्ये ॥ इत्यादि वदतीति केचित् ॥ स्वकीयस्यान्याधीनत्वकरणमपि लक्ष्यतां न गतमित्य
परे ॥ भाविकमध्यस्थं स्यात् सर्वं सप्रागभावानां ॥ सर्वं सा: अतीता: सप्रागभाव भाविनः ॥ प्रतियोगित्वस्य साहित्याधीत
याविवक्षितत्वात् ॥ तथा च भूतानां भाविनां वाप्यनीयमलौकिकप्रत्यक्षाविषयत्वमुच्यते तद्भाविकं ॥ न चातीतानागतानां
संनिकर्षविरहेणालौकिकप्रत्यक्षानुपपत्तिः ॥ स्वरूपातिशयमाहात्म्येन तत्कालोत्कर्षवत्ताया अविवक्षितत्वात् ॥ भावः क
कवेरभिप्रायेस्तस्येति विषयत्वाख्यसंबंधपरषष्ठी समर्थान्मत्वर्थे मतुप् ॥ यत्तु अस्मिन्निति विग्रहप्रदर्शनं ॥ तन्न
सम्बन्धाच्चतौ नैरस्यतावितिभाष्यकारोक्तेः ॥ भूतस्यालौकिकप्रत्यक्षविषयता साम्येनोक्तिर्यथा ॥ तं तस्य स्वरसंक्र
मं मद्गुगिरः क्लिष्टं च्यवन्ते जीस्वनेवशानामपि मूर्द्धिनां तरयन्ते तां चैविरामे मद्दुंगु ॥ हेलासंयमितं पुनस्थचलितं रागाद्धि
रुद्धारितं यत्तस्यैव विरतेपि गीतसमये गच्छामि मन्ये वनैव ॥ अत्र गीतविरामेपि तस्य श्रवणस्य साक्षात्कारश्चा
रुद्धो मोक्तेः ॥ स्मरणानवच्छेदरूपकार्येण दृढसंस्काराधायकतया तस्यातिशयत्वेनात्मर्थेस्य ॥ भाविनो यथा ॥
खहि अजलासि हु सारो मह हियाह्यावि अपसारि ॐ कलाव हो ॥ अप अहि अंतो हि अराओइ पडिउतिसा अरे सारा

मस्य॥ अत्र तारास्य समुद्गमध्यपाते भाविन्यपि तस्मात्प्रागेव प्रारपातस्य लौकिकप्रत्यक्षस्फुटं॥ श्रीरामप्रभावाति
शयवर्णने तात्पर्यम्॥ न तु कारणाभावेपि कार्योत्पत्तिरूपायां विभावनायाः कोस्य भेदः॥ लौकिकप्रत्यक्षे प्रतिविषय
स्य हेतुतया नागतातीतविषयस्य हेतुव्यतिरेकेपि तत्प्रत्यक्षरूपकार्योत्पत्तिः॥ एवं द्वितीयभेदस्यातिशयोक्तावप्यंतर्भाव॥
संभवः॥ कारणात्प्रागेव कार्योत्पत्तेरभिधानात्॥ न वा वयः कौमारभरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलित
मालतीसुरभयः प्रौढाः कदंबानिलाः॥ सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चे
तः समुत्कंठते॥ इत्यादिवत् हेत्वभावेत्वेनोक्तिर्नास्तीति वाच्यम्॥ आसीदंजनमात्रेति पश्यामि तव लोचने॥ भाविभूषणासं
भारां साक्षात्कुर्वे तवाकृतिं॥ विरते विजीतसमये इत्यादौ तत्र द्रुतेभाव्यर्थकप्रवच्छिन्नप्रतियोगिताकसंसर्गाभावत्वेन हे
त्वभावोक्तौ विभावना॥ इह तु उक्तरूपावच्छिन्नप्रतियोगिताकत्वं ध्वंसप्रागभावयोर्न संभवत्येव॥ तयोः सामान्यावच्छिन्न
प्रतियोगिताकत्वाभावात्॥ अनातपत्रोपीत्यादौ तु विभावनासत्वेपि न क्षतिः॥ एवं द्वितीयभेदस्यातिशयोक्तावपि नांतर्भा
वः॥ विषयतातिरिक्तसंबंधावच्छिन्नकार्यतावच्छेदकधर्मावच्छिन्नतादात्म्यातिरिक्तसंबंधावच्छिन्नकारणतावच्छेदकधर्मा

वच्छिन्नतादात्म्यातिरिक्तसंबंधावच्छिन्नकारणतावच्छेदकधर्मावच्छिन्नात्मागेवातिशयोक्तेरभ्युपगम्यत्वा॥ कारणतान्यूनवृका
र्यत्वातिरित्वेनेन प्रकारेणोक्तातिशयोक्तिः॥ भाविविषयप्रत्यक्षत्वेनोक्तो भाविकमित्यंगीकारात्पूर्वाभिधानानभिधा
नयोरेव नियामकत्वाच्च॥ किं च तत्तत्कार्यतावच्छेदकं कार्याधिकरणवृत्ति प्रागभावप्रतियोगित्वेनोक्तं यत्कारणं॥ तत्प्र
तियोगिककार्यतावच्छेदकम्॥ अत एव प्रागभावप्रतियोगित्वेनोक्तं यत्कारणं॥ तत्प्रतियोगिककार्यतावच्छेदकम्॥ अत एव प्राग
भावप्रतियोगित्वेन यत्कारणमुक्तं तदतिरिक्तकारणता प्रतियोगिककार्यतावच्छेदकमिति भेद इतिरिक्त॥ वाक्यपदार्थयो
हेतूक्तिः काव्यलिंगं स्यात्॥ हेतुवचने काव्यलिंगमिति लक्षणं॥ वाक्यपदार्थत्वाभ्यां तस्योक्तिरिति द्वौ भेदौ॥ आद्यं यथा॥

ग्र·कौ·
१३३
133

राम:
१३३

तज्जैव तस्य हेतुत्वे संभवति॥ अत स्व प्रपराध इव अपराधवन्तो अनमनगोचराया अपेक्षाया बुद्धिः तद्द्वारा अनमनयोः प्रयो
वे २ जकत्वमिति॥ न च तत्रापि उभयसाधारणस्य हेतुत्वपर्याप्तत्वे प्रयोजकस्यापि नववधू संगमोत्सुकस्यापि हेतुत्वेन समभिव्याहा
राहोपत्ता रवस्याप्यमेवेति वाच्यम्॥ हेतुत्वे स्वपलव्वोकनियमस्याविवक्षितत्वात्॥ न चैवमपि तत्र परिकरसांकर्यं दुर्वारमेवे
ति वाच्यं॥ हेतुत्वाभिमतस्य शाब्दोपात्तत्वप्रवोकनियमसे कतया तदाक्षेपके संगमोत्सुके तदभावेपि नियमसभिव्याहा
भावेन हेत्वोपस्थितकतयैव काव्यलिंगत्वानपायात्॥ काव्यार्थहेतुक काव्यलिंगानुस्यूतानुरोधात्कार्यबोधकेत्यादि तत्राचका
र्यकारणवाचकपदानां यत्र न यत्रैकवाक्यतयान्वयबोधजनकत्वं॥ अपितु कार्यबोधकानां परस्परं कारणवाचकानां च पर
स्परमिति भिन्नवाक्यतया जनितान्वयबोधानां पश्चादाक्षेपकवाक्यतया कार्यकारणभावावगम इति फलितार्थः॥ सुधांशुकलि
तोत्तंसः॥ महौजसो मानधना इत्यादौ च न हेत्वर्थसमभिव्याहारः॥ व्याख्याने कतया स्थितं श्रुतिगिरां यत्नीनवल्मीकतानाम्ना
भवमन्तस्य सुमहद्भाग्यं च नामाद्भिदि॥ चिरार्थी न च हेत्वर्थपामच कपंसु गामिनानासे गुरुदेवत्वे द्रुतावरीनेकपमहेकर्तुं जः
याकुयां॥ इत्यादौ च कार्यबोधकपदजन्यान्वयबोधजनकपदजन्यान्वयबोधाविषयत्वमेव हेतोरिति नातिव्याप्तिः॥ तथाहि समम

अ॰ कौ॰
१३४

१३५

त्वद्दर्शनाभावो मम व्यासत्वाद्यभावप्रयुक्त इति फलितार्थः॥ तत्राहं त्वद्दर्शनशक्त्यभाववानिति कार्यबोधकपदं अहंप
दमपि॥ तदेव व्याख्यनैकतयेत्यादिकारणबोधकपदजन्यान्वयबोधजनकमप्यस्ति॥ तत्राप्यहंपदस्यैव विशेष्यत्वादिति दि
क्॥ यत्तु रसगंगाधरे॥ अनुमितिकरणत्वेन सामान्यविशेषभावाभ्यां वा नालिंगितः प्रकृतार्थोपपादकत्वेन विवक्षितोर्थः॥ काव्यलिंगमि
ति लक्षणं कृत्वा तु उपपादकत्वेन समर्थ्य॥ न तु शब्दांतरेण रूपेण बोधित इत्यर्थकतया पंचम्यादिशब्दप्रतिपादितहेतुत्वके सहेतौ देववारयो
प्रयोजनाते तेन मयानकत्वादर्शितवर्जनीयो दयाश्रयत्वादसि देव सेव्यः॥ इत्यत्र न व्यभिचार इत्युक्तं॥ विनिर्यातान्मते रुपिनयदिह
र्वाशिपिशुने रवाद्यानिश्रोत्रैः सपुलकमपास्यानि मिमुनेः॥ हरंती लोकानामनवरतमेनांसि कियतां कदाप्यश्रांता त्वं जगति पु
नरेकाविजयसे॥ अपेतेती यीनि त्वरितमिह यशोहृतिविघ्नो करं करौ कुर्वत्यपि किलकपालिप्रभृतयः॥ दूमंतं मामवत्वमथ
करुणाक्रांतहृदये पुनानास सर्वेषामघमथनदर्पं दलयसि॥ इत्युदाहृतं॥ तत्र परविरुद्धमिति स्पष्टमेव॥ हेत्वर्थकशब्दप्रत्य
येन हेतुत्वस्य बोधितत्वादन्यथा पंचम्या पितद्बोधनानुपपत्तेः॥ हरिं पश्य न्मुच्यत इत्यादौ भगवद्दर्शनमुक्त्योः कार्यकारणभा
वप्रत्ययस्य सर्वानुभवसिद्धत्वात्॥ अत्र हेतुभूतहरिदर्शनाश्रयो मुच्यत इति बोधस्यावश्यकत्वात्॥ हेतुत्वं च सममि

राम:
१३४

व्याहतकार्यापेक्षमेवेति ॥ तत्रार्थान्तःक्षिप्तिनिष्ठकार्यत्वनिरूपितत्वलाभात् ॥ नन्वनुमानान्नेदमतिरिच्यते ॥ न च यत्र व्या
प्यत्वपक्षधर्मत्वाभ्यां ज्ञायमानमुपपादकं तूच्यते ॥ तत्रानुमानं यत्र स्वरूपेणैव तत्र काव्यलिंगमिति वाच्यं ॥ उपपाद्
कस्याप्युपपाद्यं व्यभिचाराभावतद्धर्मवत्त्वज्ञानं विनोपपादनसामर्थ्याभावादिति चेत् ॥ अत्र रसगंगाधरकृत
सत्यमत्रानुमितिरूपैवोपपत्तिः ॥ तथापि नेदमनुमानालंकारः ॥ श्रोतरि यल्लिंगानुमितिं बोधयितुं कविः ॥ काव्यनि
र्मातितल्लिंगकानुमितिरेव तदलंकारत्वात् ॥ इह श्रोतर्यनुमितिमुत्पादयितुमेव काव्यनिर्माणं न तु बोधयितुं ॥ अपि
च ॥ कविनिबद्धमात्रांतरनिष्ठानुमितिरनुमानालंकारं प्रयोजयति ॥ श्रोतृनिष्ठा महावाक्यार्थनिष्पत्त्यानुकूला तु का
व्यलिंगमिति विशेष इति ॥ वस्तुतस्तु मानांतरेणानिर्णीते साध्ये तत्राप्रामाण्यशंकानिरासाय यत्र तदुपपादकमुच्य
ते ॥ तत्र काव्यलिंगं ॥ तत्र चोपपादकस्य व्याप्यत्वपक्षधर्मत्वाभ्यां ग्रसमारोपात्वेपि नानुमानत्वं ॥ सिद्धानुमितेरस्य
त्वा ॥ नचैतावतापि अनुमितिकरणत्वमव्याहतमेवेति वाच्यं ॥ साध्यसाधकत्वायोगव्यवच्छिन्नस्यैवात्र तथात्वेनाभिम
तत्वात् ॥ वस्तुतस्तूपपादकस्य निरुक्तरीत्योपयोगे व्याप्यत्वादिनानवबोध एव व्यभिचारज्ञाने सत्यपि मानांतरसि

द्रुपदार्थप्रतिकूलशंकानिरसनसमर्थत्वात्॥ यद्वा व्यभिचारस्यास्फुरणे साध्यवृद्धाव प्रामाण्यशंकानिरासकत्वसं
भवेऽपि व्याप्यत्वादिनाऽज्ञायमानतयाऽनुमितेराधारयितुमशक्यत्वात्॥ अत एव यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं त
दिन्दीवरं मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी॥ येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गतास्त्वत्सादृश्यवि
नोदमात्रमपि मे दैवेन न क्षाम्यते॥ इति काव्यलिंगोदाहरणमलंकारसर्वस्वकृतोक्तं॥ यत्तु तत्रानुमानमेव तदत्राऽ
योक्तसादृश्याश्रयविघटकत्वहेतुकदैवपक्षकसादृश्यदर्शनजन्यसुखासहिष्णुत्वसाध्यकानुमितिसंभवादिति
तदसत्॥ उत्पलादिमग्नत्वोपपत्त्यर्थमेवात्र चतुर्थचरणोपन्यासात्॥ त्वदुक्तरीत्या च विपरीतोपपाद्योपपादकभाव
लाभप्रसंगात्॥ तस्य चाज्ञानभिमतत्वात्॥ सादृश्याश्रयविघटकत्वहेतुत्वसिद्ध्यै तद्दर्शनस्यैव विघटनात्॥ न च
तदेव हेतुत्वकर्तव्यमिति वाच्यं॥ प्रतिबंधकादौ व्यभिचारात्॥ व्यभिचारस्फुरणदशायामनुमितिः॥ संभवत्येवेत्यभि
धानेनोपपादकत्वस्यापि संभवात्॥ त्वदुक्तोदाहरणेऽपि गंगासर्वोत्कृष्टा महापापनाशहेतुत्वादित्यनुमानसंभ
वाच्च॥ यदपि समर्थनादृष्टान्तरप्रत्ययेनानुमितिरिति पक्षमनूद्य॥ सहि न प्रात्यक्षिकः॥ इंद्रियसन्निकर्षाभावा

भावात्॥ न शाब्दीमानसी वा॥ अनुमितिसामग्र्या बलवत्त्वादिति॥ तदप्यसत्॥ सत्यां व्यभिचारस्फूर्तौ वनुमि-
तिसामग्र्या एवाभावात्॥ न च तदा न व्यभिचारस्फूर्तौ वनुमितिसामग्र्या एवाभावात्॥ न च तदा न व्यभिचारस्फू-
र्तिरिति वाच्यम्॥ सत्यामपि तस्यां तदुपपत्तेरनुभवसिद्धत्वात्॥ तस्याश्चानुमित्योपपादयितुमशक्यत्वात्॥ सत्या-
मपि तस्यां तदुपपत्तेरनुभवसिद्धत्वात्॥ तस्याश्चानुमित्योपपादयितुमशक्यत्वात्॥ वस्तुतोऽनुमितिरेवालंका-
न५ रोऽस्तु परामर्शस्य त्वस्य च व्यवधानात् तया मानान्तरेण साध्यसिद्धिसत्त्वेऽनुमितेरनुदयात्॥ नाप्यनुमानान्तर्भाव-
श्रोकापीति सर्वमनवद्यं॥ यत्तु काव्यलिंगं नालंकारः॥ कविप्रतिभानिर्मिततत्त्वप्रयुक्तचमत्कारविशेषात्म-
कवैचित्र्यविरहात्॥ हेतुहेतुमद्भावस्य लोकसिद्धत्वात्॥ श्लेषादिसंभिन्नाया जन्यस्तु चमत्कारः॥ श्लेषप्रयु-
क्तत्वात् इत्याशंक्यालंकारतां कल्पयति॥ न तु काव्यलिंगस्य॥ तत्प्रयोजकचमत्कारान्तराभावादिति॥ तन्न॥ का-
लौकिकत्वेऽपि कविप्रतिभामात्रगम्यतया चमत्कारजनकत्वात्॥ एतदीयहेतुहेतुमद्भावमात्रस्य लोकसि-
द्धत्वाभावाच्च॥ न हि स्तनौ स्वर्णलोकादिहारीनां महीमाहर्तारः स्युरिति हेतुत्वं कश्चिच्चित्रिवदं॥ किं चैवमनुपमादेरप्य-

लंकारत्वेन स्यात्साहृश्यस्य वास्तवत्वेन कविप्रतिभाकल्पितत्वविरहात् ॥ न चैतत्राप्युपमाप्रयोजकसाधारण
धर्माभेदांशे तत्कल्पितत्वमस्तीति वाच्यं ॥ रमणीयत्वादिधर्मस्याप्यलौकिकप्रसिद्धत्वात् ॥ गोसदृशो गवय सदृश इत्या
देरपि वस्तुतो भिन्नसाधारणधर्माभेदाध्यवसायमूलकत्वात् ॥ द्रव्यत्वादिनिभिन्नकसादृश्यस्य शक्तिपरिच्छे
दकत्वायोगात् ॥ अभेदांशस्यैव कल्पिततया तदंशस्यैवालंकारत्वेन तु सादृश्यस्य तूक्तदोषापरिहारात् ॥ क
ल्पितत्वावच्छेदकधर्मावच्छिन्नचमत्काराजनकतायास्तद्धर्मावच्छिन्नमानालंकारत्वप्रयोजकतायास्त्वयैवोक्त
त्वात् ॥ चमत्कारजनकस्यालौकिकस्याप्यलंकारत्वे बाधकाभावात्सर्वालंकारोच्छेदापत्तेश्चेति कृतं पल्लवितेन ॥
पर्यायोक्तं कथितं वाच्यस्यैवान्यभंग्याक्तिः ॥ वाच्य एवार्थो व्यंजनया यद्युच्यते तत्पर्यायोक्तं ॥ अत एव न ध्वनित्वं ॥ तत्र
वाच्यव्यंग्ययोर्भेदात् ॥ एवं च व्यंग्यप्रकारसमानाधिकरणप्रकारांतरेणाभिधानं तदिति पर्यवस्यति ॥ यथा ॥ नि
वेशितां हृतसमापयितो शिरीषकोशम्रदिमाभिमानं ॥ पादौ कियद्दूरमिमौ प्रयासे निधित्सते तुच्छदयं मनस्ते ॥
अत्र कियद्दूरं गन्तुमिच्छसीति व्यंग्यं ॥ तदेव भंग्यन्तरेणोक्तं ॥ दूरगमने धात्वप्रकारेण व्यंग्यत्वे पादनिधाने घा

त्वेन रघायावाचत्वं॥ नचैकस्यैवार्थस्य व्यापारद्वये नावगमयोनेकत्वमितिवाच्यम्॥ प्रकारभेदसत्वेन तद्भावा
त्॥ तदुक्तं पदे वाच्यते तदेव व्यंग्यं न तु यथा वाच्यते तथैवेति॥ यथा हि निर्विकल्पकज्ञाने घटो घटत्वं च विषयः॥ घट इति
पि३ सविकल्पकेपि तद्वत्॥ तत्र च निर्विकल्पके घटघटत्वयोर्विशकलितत्वेन सविकल्पके च तयोर्वैशिष्ट्येन प्रतीतिरिति न
योर्भेद उपपद्यते॥ तद्वदत्रापीति न दोषः॥ सर्वस्वकारस्तु व्यंग्यस्य वाभिधेयत्वायोगात्॥ गम्यस्यैव भंग्यंतरेणा
भिधाने पर्यायोक्तमिति लक्षणानुपपत्तिमाशंक्य भंग्यंतरेण कार्यादिद्वारेणाभिधानमित्यस्यार्थः॥ यथा॥
चक्राभिधानप्रसवा तु येव चकार यो राहुवधूजनस्य॥ आलिंगनोद्दामविलासवंध्यं रतोत्सवं चुंबनमात्रशेषं॥ अत्र
च राहुशिरश्छेदकारीति व्यंग्यं॥ राहुवधूसंबंधिरतोत्सवनिष्ठचुंबनमात्रावशिष्टत्वनिर्माणत्वेन रूपेणाभिहि
तं॥ भगवतस्तु पूर्वप्रक्रांतत्वादच्छेदे नाभिधेयत्वाद्वचनव्यंग्यत्वं॥ एवं॥ यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता॥
मदेनैरावणमुखे मानेन हृदये हरेः॥ इत्यत्रापि शक्रैरावणयोः मदमानौ जाताविति व्यंग्ये शक्रैरावणयोरभिधान
नुपपद्यविषयत्वात्मदमानमोकस्यैव व्यंग्यत्वे पर्यवसानात्॥ एवं च व्यंग्यांशस्य कस्यापि रूपांतरेणाभिधानाद्भूर्म

रास्य वाभिधेयत्वेन व्यंग्यत्वान्न हेतया व्यंग्यस्य प्रकारान्तरेणाभिधानमसंगतमेवेति कार्यादिद्वारेणाभिधानमसं
गतमेवेति कार्यादिद्वारेणाभिधानमित्येव लक्षणार्थं उचितमिति॥ अभिनवगुप्तपादाचार्यास्तु॥ पर्यायेणागमाद्
तिरिक्तप्रकारेण व्यंग्येनोपलक्षितम्॥ उक्तमभिहितं पर्यायोक्तमिति लक्षणार्थं इत्याहुः॥ अत्र दीक्षिताः॥ उभयोरप
र्याये क्लेशो व्यर्थ एव॥ सन्ति हि व्यंग्यस्यैव रूपान्तरेणाभिधाने बहून्युदाहरणानि॥ यथा॥ नमस्तस्मै कृतो येन मुधा
राहुवधूकुचौ॥ अत्र भगवान्वासुदेवः स्वासाधारणरूपेण व्यंग्यः॥ राहुवधूकुचवैयर्थ्यकारित्वरूपान्तरेण स
एवाभिहितः॥ यथा वा॥ लोकं पश्यति यस्यांघ्रिः स यस्यांघ्रिं न पश्यति॥ ताभ्यामप्यपरिच्छेद्या विद्याविश्वगुरोस्त
व॥ अत्र गौतमः पतंजलिश्च स्वासाधारणरूपाभ्यां व्यंग्यौ प्रकारान्तरेणाभिहितौ॥ यथा॥ देवं वन्दे जलधिशरधिं
देवतासार्वभौमं व्यासप्रेष्ठा भुवनविदिता यस्य वाहाधिवाहाः॥ भूषापेटी भुवनमधरं पुष्करं पुष्पवाटी शाटी
पालाः शतमखमुखाश्चन्दनद्रुर्मनोभूः॥ अत्र वेदत्वाद्याकारेण व्यंग्याः एव वेदादयो व्यासादिविनेयत्वाद्याका
रेणाभिहिताः॥ एवं च कार्याभिधानेत्यादावपि स्वरूपेण व्यंग्यस्यापि भगवतो रूपान्तरेणाभिधानमस्तीति यथा

श्रुतलक्षणासंभवात्॥ यच्च तत्र राहुशिरःछेदावगमनं तदंशे प्रस्तुतांकुर एव॥ अत्र रसगंगाधरकृ
तः॥ सर्वस्वकारस्य तावत् यथाश्रुतार्थत्यागबीजं उक्तमेव॥ द्वितीयपक्षेपि तद्बीजं तु पर्यायशब्देन
प्रकारांतराभिधानेविवक्षितार्थतावच्छेदकातिरिक्तधर्मपुरस्कारेणाभिहितमिति योजनार्थः॥
तथाच॥ दशवदननिधनकारी दाशरथिः पुंडरीकाक्षः इत्यादौ रामत्वातिरिक्तधर्मपुरस्कारेणा
रामस्यैवाभिधानात्पर्यायोक्तप्रसंगः॥ नच व्यंग्यस्यैतेन प्रकारेणोक्तं तत्पर्यायोक्तमिति वाच्यं॥ व्यंग्य
स्यायोग्यार्थानंतर्गतत्वात्॥ न च लक्षणांतर्गतत्वं तस्यास्त्येवेति वाच्यम्॥ एवं व्यंग्यस्य लक्षणेप्र
वेशाव्याप्यकत्वे पर्यायशब्देन व्यंग्यस्यैव ग्रहीतुमुचितत्वात् तत्प्रकारांतरस्य॥ व्यंग्योपलक्षितस्य
प्रकारांतरेणैवोक्तिनियमादन्यथा व्यंग्यत्वानुपपत्तेरिति॥ एवं नमस्तस्मै कृतो येनेत्यादि यदुक्तं॥ त
दसत्॥ अत्र राहुवधूकुचवैयर्थ्यकारित्वेन राहुशिरःछेदकारित्वं व्यज्यते इति सर्वसंमतं॥ भगवद्वासु
देवत्वं तु विशेषणमर्यादया लभ्यते न न व्यंग्यकक्षामारोढुमर्हतीति॥ अन्यथा नमो राहुशिरःछेदका

शिरोदुःखहारिणे॥ इत्यत्रापि पर्यायोक्तप्रसंगात्॥ किं च राहुस्त्रीकुचनैःफल्यकारिणे हरये नमः॥ इत्य
त्र स्वासाधारणधर्मस्याभिधानेन व्यंग्यत्वायोगाद्राहुशिरश्छेदकारित्वेनैव व्यंग्यत्वमित्यपि परास्तं॥
राहुशिरश्छेदकारित्वस्य प्रस्तुताङ्कुरविषयत्वे भगवद्रूपस्य च व्यंग्यत्वानुपपत्तौ पर्यायोक्तस्यैव वैयर्थ्य
प्रसंगात्॥ प्रस्तुताङ्कुरस्य प्राचीनैरस्वीकाराच्च॥ प्रस्तुतेन स्वसदृशो वाच्यार्थः प्रस्तुत एव यत्र प्रतीय
ते तस्यैव तद्विषयत्वाच्च॥ प्रस्तुतेन कार्येण कारणावगमनस्यापि तद्विषयत्वे॥ अप्रस्तुतेन कार्येण
कारणावगमने अप्रस्तुतप्रशंसा॥ प्रस्तुतेन कार्येण कारणावगमने पर्यायोक्तमिति सर्वस्वकारा
दिकृतविभागोच्छेदापत्तिश्चेति॥ अत्रेदं वक्तव्यं॥ यत्तावदुक्तं सर्वस्वकारमताकूतं॥ तदसत्॥ व्यंग्यघ
टकयत्किंचिदर्थस्य वाच्यकोटिप्रवेशमात्रेण व्यंग्यत्वव्याहतिस्वीकारे मदमानमोकस्यापि कल्पं व्यंग्य
त्वं॥ तत्प्रविष्टानां त्रयाणामप्यर्थानां मदमानोऽहितशब्दोपात्तत्वेन वाच्यकोटिनिविष्टत्वात्॥ वाच्येऽन्याघ्र
कारकबोधविषयत्वं व्यंग्ये तु तदन्याकारकबोधविषयत्वमिति चेन्न हि रावणशक्योरपि कल्पं

व्यंग्यकोटिप्रविष्टो भावोऽभिहितः॥ मदादेरैरावतादेः स्ववाच्यतामेदस्य व्रस्वराणिपिडुरूपपादत्वाद्॥ एवंरा
होरपि वाच्यतया राहुशिरश्छेदकारीत्यस्यापि व्यंग्यत्वं न स्यात्॥ यदपि द्वितीयपक्षे प्रकारांतराभिधानमि
त्यर्थत्यागवीज मुक्तं॥ तदप्यसत्॥ विवक्षितार्थतावच्छेदकधर्मप्रकारकबोधजनकपदासमभिव्याहृ
तत्वे सति तदतिरिक्तधर्मपुरस्कारेणाभिधानस्य योगार्थत्वे दोषाभावात्॥ एवं च वासुदेवत्वप्रका
रेणाव्यंग्यत्वेन प्रकारांतरेणाभिधानत्वमुपपद्यत एव॥ एवं नमो राहुशिरश्छेदकारिणे दुःखहारिणे
इत्यत्र प्रकारांतरेणाभिधानेऽपि सहृदयैर्भगवत्त्वप्रकारकबोधो दृष्टो नातिप्रसंगः॥ एवं राहुस्त्री
कुचनैःफल्यकारिणो हरये नम इत्यत्र राहुशिरश्छेदकारित्वस्य व्यंग्यत्वेऽपि न पर्यायोक्तं॥ हरि
शब्दसमभिव्याहृतत्वात्॥ किं च लोकं पश्यतीयस्याधिरित्यादौ गरुडध्वजत्वादिकं वाच्यं प्रायमे
वेति पतं च लिखितं चासाधारणरूपेणाव्यंग्यत्वं त्वयाप्यनुमंतव्यमेवेति सर्वं चाप्युतदीयामेव व्यं
ग्यतामादाय पर्यायोक्तमित्यपि किं न स्यात्॥ एवं च चंद्रे इत्यादौ भगवद्वाहानां सौव्यादिविनेयत्वा

भिधानेन नेदत्वाहिरूपेणैव व्यंग्यत्वमावश्यकमिति दिक्॥ यत्तु आनुकूल्यं प्रातिकूल्यमायाऽनुकूल्यानु
बंधि चेद्दिति रूपशोभाहेतो आनुकूल्यमलंकारांतरमुक्तं तदत्रैवांतर्भावादुपेक्ष्यं॥ एवं यः प्रेयान्मारोपि
हृदामयेन स्तटस्थेनायां हृदयमापदागः॥ स्वयंवरस्यानंतरस्तमस्यवधानं कंठेवरराजो भुजेना
शवपीदमेवज्ञेयम्॥ इति पर्यायोक्तं॥ वस्तुप्रचयउदात्तं महतामंगत्वं वचनेन वा॥ संपदादिवस्त्वति
शयवर्णनमुदात्तं॥ उत्कृष्टानां वर्णनीयान्यांगित्वप्रतियोगिकमंगत्वं वर्ण्यते तदपि तदित्यर्थः॥
यथा॥ नीवीबंधोच्छ्वसनशिथिलं यत्र यक्षांगनानां वासः कामादनिभृतकरेष्वाक्षिपत्सु प्रियेषु॥
अर्चिस्तुंगानभिमुखमपि प्राप्य रत्नप्रदीपान् ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः॥ य
था वा॥ म्लायन्मौलिस्रजः कदनकालिकाकुक्षिंभरा भिक्षवो ये के चित्त्रासिति राम कामनृपते युष्म
यशोगोचराः॥ ते खल्कोंतकुटुंबिनीकृतिलसन्नाटंकरत्नांकुरज्योतीभिर्जटिलीभवंति भवने का
वानदिग्भित्तयः॥ द्वितीयं यथा॥ वलगाराग्निमहुमहेमम्य आयासगुच्छलंतरश्मिराग्ज्जोज्जो॥ विश्र

ऽम्बरापभारं गाढमस्तरामिश्रं शिरो मेदुप्रशांतो॥ अत्र सुवेलपर्वतस्यानंतफणाप्राग्भा-
रायत्वात्तस्य वर्णनीये सुवेले महत्वानंतस्यांगत्वात्तस्य सुवेलोत्कर्षप्रतीतिः॥ न चानंतविषय-
कभावोत्र चमत्कारकः॥ तस्याङ्गत्वेन तदभावात्॥ अत्र च वस्तुस्वरूपमिति सामान्यतउक्तत्वाच्छौ-
र्यादिसमुत्कर्षवर्णनेप्ययमेवालंकारः॥ यथा॥ अत्युक्तो यदि न प्रकुप्यसि मृषावादं न चे-
न्मन्यसे तद्भूमोद्धृतवस्तुवर्णनाविधौ व्यग्राः कवीनां गिरः॥ देव त्वत्प्रकटप्रतापदहनज्वालाव-
लीशोषिताः सर्ववारिधयस्तवारिवनितानेत्राम्बुभिः पूरिताः॥ यथा वा ममा॥ प्रस्मोऽयातया-
मं वद्रुमिरथविरादीन्द्रे रभूत्क्रमसृत्तं विज्ञाय स्वोपभोगास्पदपार्थिवपार्थिक व्यूहतो वा सम्भूतं॥ प्रा-
यत्नोऽठप्रतापज्वलनसप्रदीप्तज्वालामालाकलापैर्ग्रस्तं कृत्वा समस्तं समजनि भवता नूतनं
पाकतस्तत्॥ एतेनात्युक्तेः पृथगलंकारत्वं सेपद्युत्कर्ष उदात्तं॥ शौर्योत्कर्षस्तु त्विक्तिरिति मेदकपन-
सपरास्तं॥ तत्र द्वनं तत्परस्परोत्कर्षकपनेनानंतालंकारतासिद्धिप्रसंगात्॥ इत्युदात्तं॥ एकस्मिन्स-

तिहेतौ हेत्वंतरयोगः समुच्चयः कथितः ॥ प्रकृतकार्यनिर्वाहके एककारणे सत्यपि यत्र खलेकपोतन्यायेन
कारणांतराण्यर्पितत्वात्कार्यसाधकतयोपादानं समुच्चयः स्यादर्थः ॥ अतएवानेतरहेतूपादानवैयर्थ्यं ॥
युगपदेव तत्रावतारणादेकैकस्यैव वैयर्थ्यमित्यनवधारणात् ॥ ननु हेतौ किंरूपात्काव्यलिंगात्कोऽस्य भे
द इति चेन्न ॥ तत्र हेतुमात्रं विवक्षितं ॥ न तु गुणत्वप्राधान्ये ॥ एकत्वानेकत्वे वा इह त्वेकस्य हेतोर्मुख्यत्वम
न्येषां गुणत्वं हेत्वनेकत्वं च विवक्षितमिति ॥ यथा ॥ आयाता मधुयामिनी स्मरशरक्रीडाभरा दुर्भरो
ज्ञातो भीष्यति दूरलंघितपथः साध्वी प्रयातो महान् ॥ एषोऽपि स्मरकालकूटकवलैः क्लिष्टो मरद्दर्गिउवा
नो जाने मम दुर्विपाकविटपी कीदृक्फलं धास्यति ॥ इह वसंतनिशाया अनुपपत्तिहेतुत्वसंभवेप्यमेषा
मुपादानं ॥ यथा वा मम मंगारमंजरीशाटके ॥ उद्धतत्वां पठमसाहसउदृमो अउरवं विओ अजदीदं
परतंतरा अरतीवरां ॥ अइ यअरांतिमिरं अरंधं अविजेइ सहि केहिं ह्रूप अधरहे ॥ अयमेव वि
धापयिष्यतीत्याह ॥ सदसत्सदसद्योगे इति ॥ सद्योगे असद्योगे इत्यर्थः ॥ क्रमेणोदाहरणानि ॥ राज्ञे

निर्जितशत्रुर्योगोऽस्य सविवेन्यस्तः समस्तोभरः सम्यक्पालनपालिताः प्रशमिताशेषोपसर्गाः प्रजाः॥ प्रद्योतस्य
सुतावसंतसमये स्वेत्येवनाम्नाधृतिं कामः कामसूपेत्य वृषममपुनर्मन्ये महात्रेत्सवः॥ अयोत्सवं प्रतिराज्या
दीनां सतो योगः॥ चत्वारः षड्दिशोपि अरंशनाअतनूरोपिद्युत्पद्रश्माङ्गः॥ अस्सईसअजिः आतुग्गा स्सा अ
चाहुरवंउ अससीलं॥ अत्र ते षांकृतमंगहेतुत्वादरसतां योगः॥ समस्तयांतरसाह॥ गुणक्रियायोगपद्येन्य
हृति॥ गुणानां क्रियाणां गुणक्रियायोः गुणक्रियाणां गुणानां क्रियाणां चेति षट्कशेषः॥ तथा च गुणयोः क्रिययोः
गुणक्रिययोश्च यौगपद्ये अन्यः समुच्चय इत्यर्थः॥ क्रमेणोदाहरणानि॥ यौवनविजृम्भरोनस्तनद्वयेन
हृदमूर्ध्वासस्याः॥ मदनकोद्रेकात्धूर्णाभमनासिह क्लानि वामुवरः॥ अत्र वैरहत्वदरक्तत्वगुणयोर्यौगपद्यं॥ च
कारेणात इत्यभिधानात्॥ द्वितीयो यथा॥ अन्धोंद्वेअपडस्सो अस्सोंसि अस्करो आहन्ना आर्द्रं॥ रथ्याम्रुहदेउ म०
लवचनगाह अस्संवहिअं आर्द्रं॥ अत्र प्रस्थानजननक्रिययोः॥ तृतीयो यथा मम॥ सद्योतकाले रेखाविंब
धरर्क्षितस्यदयितस्या॥ तामरसद्दृशांनयनं शोषम्नाक्षिन्याः॥ अत्र दर्शनशोषणत्वरूपयोर्गुणक्रि

यथोः ॥ इह योगपद्यमात्रं विवक्षितं ॥ न तु सामानाधिकरण्यं वैयधिकरण्यं वा ॥ तत्रोदाहृतं तु स्पष्टम् ॥
यथा गामम ॥ योती अत्र हररातुर्रतिं डाशासि ऽ यि अत्र मेरा ॥ दीसंदसद्विअ गोसेसवत्तिरा अगोस
संकेतो ॥ अत्राधरक्षिप्यतस्य लौहित्यस्य सपत्नीनेत्रसंक्रमो नाम आश्रयभेदः एकत्वं चाध्यवसानमात्रेणा
न तु पारमार्थिकत्वेनेति भावः ॥ कुचिद्दर्पणगम्यं यथा ॥ मोनेमपूरीछुनदीकुकार्यविधिपांडुरत्वं चवलाहके
शारदभीष्मागमनिर्दिष्टं तामिन्योसी कृतानीवविधियोगिनीभिः ॥ अत्र मोनादयः प्रथमं विरहिणीछुस्थिता
स्तोमपूर्वादिष्विति एकस्यानेकत्रावस्थानमुक्तिः ॥ प्रथममेकधर्मिनिष्ठत्वमप्यत्र विशेषो वोध्यः ॥ य
था श्रीरुद्रटदेवानां ॥ प्रागेकत्र निषेवितः सुकृतिनां लावण्यपुंजश्चिरं यः कालेन स एव हा विशक
लीभूतः समालोक्यते ॥ कापि कापि घनालिखंजनशारत्रेंद्रप्रवालस्फुरच्छत्राकेतुमरालहेमकल
शीरं भास्यलोच्याहिषु ॥ अत्र कालेस्य विशकलत्वमात्रं प्रयोजकत्वम् ॥ अत्र प्रयोजकानभिधानं स्प
ष्टम् ॥ तदभिधाने तु यथा ॥ प्राचीमासककसक्तिकामुपगते भानौ दिशां वल्लभे पश्यतास्तु वयः पतंग

घटामाञ्जेयनाहिं धमा॥ लोकस्यक्षराज्ञानिरंकुशरसोसंभोगनिद्रागमोकोकस्तोमकुमुद्वतीविपिन
योर्निक्षेपमातन्वती॥ अत्रराज्ञावन्यत्रस्थयोः संभोगनिद्रयोस्तत्परित्यागेनचकोकुमुदद्वन्द्वत्वेउक्तं॥ सूर्य
किरणप्रयोजकाभिधानंचपूर्वापरित्यागेनयथा॥ कहसासोहमाप्रगांमयेसमंबहदशिगिप्रागनुम
स्मि॥ जी अहरि अहरामंहरिदुरा अरि अयमप्रा॥ अत्रगोत्रस्खलनेकुपितायामानिन्यानायकंप्रतिउ
क्तौ अन्यत्रस्थितस्यनाम्नोऽन्यचक्रैनायकरूपप्रतिभिधानेद्वितीयपर्यायस्य आयमेदोयथा॥ अत्रद्विस्थि
जरासहितेपिआइजागांकरशरारमिउंसि॥ रआइताइसोकरबाइसंसउजेहिजी अस्स॥ अत्रनाय
कसंगतन्यसोख्यानांप्रथमंइष्टाविषयत्वपश्चाञ्जीवितसंशयहेतुत्वेप्रयोजकानभिधानं॥ द्विती
योयथा॥ विरहेविसंवविसमा अम अम आहोइसंगमे अहि अं॥ ताविहिरासम अंचि अरोहिंवि
पि आविहिआसविआ॥ यथावा॥ वरजनखेजोमहसीस अम्मिरिरा सहिजआरोहिं॥ तंचि अएहिं
परामामिह अजरेहोहिसंतप्पा॥ अत्राद्येएकस्याएवनाथिकायावैषम्यशैत्यद्रूपकार्येक्रमेणाभि

प्रयोजकाप

बाध्यत्वनिश्चितत्वरूपं प्रयोजकद्वयं द्वितीये च व्यतिरेकस्थितयत्पक्षप्रतिमाया अप्रसत्यानारूप्यकालेनाहतादिप्रख्यात
स्यापवनमस्कार्यत्वेन रूपं च प्रयोजकं निर्दिष्टं॥ यथा वा॥ पउमा हिणो आहिंसरू सीवि अंससअभिंविपारि
इद्धं॥ तेहि अअहि हरिहरा हआसुख दीहि आहि सारि आर अहि अरा॥ अत्र प्रथममनाहतानामपि राक्ष
सानां स्वरवंदीभिः स्वीकारे राहतत्वं हेतुः॥ यत्र प्रथमं तु वितरणं येषां कोष्ठे रूनाभि हृदयानि॥ आक्षिप्य
भावनामेरवेलंतु विलोमे रवाञ्छशो भायां त्यत्र भावनायाः पूर्वपूर्वविषयकत्वत्यागस्य अविवक्षितत्वात् क्रमा
लंकारोऽप्यतिरिक्त इति। तच्चिन्त्यं॥ अनुमाने व्याप्यवत्ता ज्ञापकधीर्धर्मिनिष्ठा यथा॥ अव्यभिचरितसामानाधि
करण्यरूपव्याप्तिविशिष्टस्य साधनस्य दर्शनात्॥ धर्मिणि पक्षे तद्व्याप्यत्वेनाभावादिप्रतियोगित्वरूपव्याप
कविशिष्टस्य साध्यस्य यत् ज्ञानं तदनुमानमित्यर्थः॥ अत्र चानुमितेरेवानुमानपदेनोच्यते॥ तस्याश्च चमत्कार
जनकत्वेन अलंकारत्वात् विनापरामर्शमात्रेणाकृतानुक्ते लक्ष्यसिद्धिविरहात्॥ व्याप्तिश्चात्र पारमार्थिकी कविक
ल्पिता वा॥ सा यथा॥ जं धो अं उरासोरा लो अरा जं अं लेवाल अग्गाम्ह हे हत्थाहिं अके सपल्लव चरहो लेति जं
विंडुरा॥ जे रहं लिच अंचलं रिवलिसंतं ह्लारा के लिहिं आ अासी रादृ अमझे रेके उरारा री जोइस रेरामुसा॥

इयमेव रवानेदेनाकर्षणादियुयाससमानीतां कर्पूरमंजरीमालोकयरा इत्युक्तिः॥ अत्र धौतजनत्वशोषणयनत्वादिहे
तुनातस्याः आकर्षणात्पूर्वं जलकेलिस्थितत्वसाध्यम्॥ तथा च प्रयोगः॥ इयं नायिका एतद्व्यवहितपूर्वकाले कृतजलके
स्नाना॥ तदसाधारणचिह्नवत्त्वादिति॥ तथाहि॥ नेत्राञ्जनराहित्यं तावत्स्नानकार्यं प्रसिद्धमेव॥ तस्य च स्वाभाविकत्वेनाप्युपपत्त्या
नतत्साधकत्वं संभवतीति॥ धौताञ्जनेत्युक्तं॥ कालबाहुल्यादञ्जननिर्गमवारणाय धौतेति॥ अञ्जनजन्यनाशप्रतियोगित्वा
र्थः॥ तस्यापि नेत्रमार्जनाश्रुस्रावादिनापि संभवादुक्तं॥ लेवालेकाग्रमिति॥ तत्रापि अंससंस्कारादिना केशमोक्षसंभवात्तद्वारणा
य अलकेति॥ वायुप्राप्त्यादिना लेवत्ववारणाय अग्रेति॥ तथा च यो वह्निवेभागस्य जलसंयोगेन क्लिष्टतया अग्रमात्रस्य
निक्लिष्टतया लेवत्वमिति भावः॥ स्नेहादिजन्यसंयोगे नापि क्लिष्टत्वसंभवादाह॥ हस्ताकर्षितेत्यादि॥ तथा च संहतेष्वके
शेषु अग्रतगतस्य भूयसो जलस्य सहसा शोषाभावादिति इत्यन्तिः॥ अलकाग्राणां विरलतया तत्संबंधिजलस्य प्रागेव नि
पतनात् लेवत्वं इतरबाधसहकारेण स्नानजन्यमेवेत्याशयः॥ हेत्वन्तरमप्याह॥ यदेकमित्यादि॥ तथा च परस्परसहका
रेण कचिह्नानां स्नानानुमापकत्वसिद्धिरिति॥ द्वितीयव्याप्तिमूलानुमाने यथा॥ यदेतालहरीचलाचलदृशो व्यापार
यति भ्रुवं यत्नैवपतन्ति संततममी मर्मस्पृशो मार्गणाः॥ तत्रनीकृतचापसंचितशिरःप्रेरवत्कृतः क्रोधनो धावत्यग्रतए

वशात्सधरः सत्यं सदा सांस्मरः॥ अत्र केचिदकल्पितैव व्याप्तिः॥ अनुमाने चेदं केवलव्यतिरेकि स्वरूपमेवेति विशेषो बो
ध्यः॥ अत्रेदमवधेयम्॥ वक्ष्यमाणमिलितरीत्या भेदाग्रहप्रसङ्गे हेत्वन्तरेणाभेदबोधे उन्मीलितालं तून्मीलितालंकारः॥
तथा सामान्यरीत्या विशेषधर्मस्फुरणे विशेषालंकारः॥ यथा हिमाद्रिं त्वद्यशोमग्नं सुराः शीतेन जानते॥ लक्षितोऽनु
रिते वं दूयमानिव मुखानि चेति दीक्षितमतं॥ तत्र रसगंगाधरकृतः॥ अनुमानालंकारेऽशेषं गतार्थत्वादनयोरतिरि
क्तत्वानुपपत्तिः॥ न चात्र हिमवत्त्वव्याप्यशैत्यवानिति ज्ञाने सत्यपि समानविषये॥ प्रत्यक्षसामग्र्या बलवत्त्वादयं हिम
वानिति प्रत्यक्षमेवोत्पद्यते न त्वनुमितिरतस्तयोः कथमनुमानेऽन्तर्भावश्शङ्क्यतामिति वाच्यं॥ व्याप्तिविशिष्टपक्षधर्मताज्ञान
जन्यज्ञानमात्रस्यैवात्रानुमानालंकारत्वेन परिभाषणात्॥ प्रत्यक्षस्यापि तादृशज्ञानजन्यत्वात्॥ वस्तुतः प्रति
बन्धकवशादनुमित्यनुत्पादेऽपि तत्करणस्यानपायात्॥ फलायोगव्यवच्छेदस्य करणतायामप्रयोजकत्वात्॥ एतेन
विशेषदर्शनस्येतरकोटिभानमात्रनिवर्तकतया हिमाद्रिप्रत्यक्षस्य च चक्षुःसंयोगादिरूपस्वसामग्रीवशादेवो
त्पत्तेस्तत्र विशेषदर्शनस्यानुपयुक्ततया पारिभाषिकापि नानुमितिरित्यपि परास्तमिति॥ तत्रोच्यते॥ अनुमि
तिरेवात्रालंकारो न त्वनुमानात्मकः परामर्श इति युक्तमेव॥ तथा च व्याप्यवत्ताज्ञाने सत्यपि अनुमित्यभावे कथ

ष्चानुमानालंकारसंभवः॥ परामर्शस्यानलंकारत्वात्॥ अन्यथानिष्पन्नसंदेहालंकारोऽनु
दापत्तिः॥ तत्रापि विशेषदर्शनजन्यत्वसत्त्वात्॥ अत एव परामर्शस्यैवालंकारत्वे लिंगकरणा
तापत्तेः॥ तस्य शरीरोपात्तत्वा अनुमानालंकारस्यालक्ष्यत्वव्यंग्यत्वानुपपत्तिः॥ ज्ञानकारणता
पक्षेपि ज्ञानस्य वाच्यत्वाद्यनुपपत्तिरेव॥ अतोनुमितिरेवालंकारः॥ सा च क्वचिद्वाच्या क्व
चिच्च व्यंग्येत्युपपद्यत इति स्वयमेवोक्तं॥ इदानीं तु परामर्शसत्त्वेमात्रेणानुमानालंकार इ
त्युभ्युपगम्यत इति पूर्वापरविरोधो युक्तिविरहश्च॥ शिष्टं सामान्यप्रकरणोक्तवस्यामह इ
तिदिक्॥ इत्यनुमानं॥ साभिप्रायविशेषणविन्यासः परिकरः॥ यथा॥ अम्म अम्म अग अरा
सेहरवर अरली मुहतिल अ अ अ चंद दे द्धिव सु॥ छिन्नोजे हिं अपि अ अ मो मसं विहिते हिं वि
ञकरेहिम॥ अत्र प्रियस्य शीम यामिञ्चकैः स्वस्पर्शो विरहितया चंद्रं प्रति प्रार्थ्यते॥ त
दुपयुक्तायोः मृतमयत्वादिविशेषणयोः प्रतीयते॥ तथाहि आद्येनामृतमयतयास्वभाव

क्षुद्रत्वेन परोपकारप्रवृत्तियोग्यत्वं ॥ चंद्रस्य विप्रलब्धनायकस्यांशेऽनुपपत्तिमाशंक्य ॥ गगनशेखरेति ॥ त-
थात्वातिलंघितेयानतस्यांशोपपत्तिरितिभावः ॥ रजनीमुखतिलकत्वेन स्त्रीत्वपक्षपातसूचनम् ॥ स्यादेतत्
व्यर्थविशेषणत्वं तावद्दोष इति निर्विवादं ॥ ततस्तदभावः ॥ पुष्टार्थत्वदोषाभावमात्रं ॥ नत्वलंकार इ-
ति ॥ अत्र प्राहुः ॥ एकधर्मिनिष्ठतया बहूनां साभिप्रायविशेषणानामुपादाने विच्छित्तिविशेषोऽनुभ-
वसिद्धतया तु परिकर इत्यलंकारमध्ये पठित इति ॥ अत्र दीक्षिताः ॥ श्लेषयमकादावपुष्टार्थत्व-
स्य दोषत्वाभावात् ॥ तथैकविशेषणस्य साभिप्रायत्वेप्यलंकारांतरत्वं दुर्वारमित्यन्ये ॥ अन्यथापि श्ले-
षादिस्थलेपि विच्छित्तिविशेषो नास्तीत्यपि वक्तुं शक्यं ॥ यदि च तत्रानुभवप्रमाणमित्युच्यते तदान्य-
त्रापि तुल्यमिति तेन पृथगलंकारत्वे निर्दीक्षितमतं दूषयितुं ॥ सुंदरत्वे सत्युपस्कारकत्वमलंका-
रत्वं चमत्कारापकर्षकाभावत्वं च दोषाभावत्वं ॥ तयोश्च क्वचिदेकत्र समावेशे नैकेनान्यस्याऽन्यथा-
सिद्धिः ॥ उपाधेरसंकरात् ॥ यथा ब्राह्मणस्य मूर्खत्वं दोषो विद्या तु दोषाभावो गुणश्च तद्वदिहा

पा१

धि॥ अन्यथा काव्यलिंगमलंकारो न स्यात्॥ निर्हेतुरूपदोषाभावात्मकत्वात्॥ न च दोषत्वाभावेनैव संग्रहे
लंकारत्वेन गणनेन किमर्थमिति वाच्यम्॥ दोषाभावांतरवैलक्षण्यज्ञापनाय तदुपपत्तेः॥ अन्यथा गुणीभूत
व्यंग्यत्वेन संगृहीतायाः समासोक्तेरपि अलंकारमध्ये गणना न स्यादिति प्राहुः॥ यत्तु विशेष्यस्य सा
भिप्रायत्वे परिकरांकुरः॥ यथा नरसिंह महीपालकीर्त्तिस्त्रिपथगा तव॥ न कस्य भवति श्लाघ्या पु
नाना भुवनत्रयं॥ अत्र भुवनत्रयपावनोपपत्त्यर्थं त्रिपथगापदं साभिप्रायमिति॥ तत्र परिकरत्वां
तर्भावसंभवात्॥ त्रिपथगापदस्य हि गंगाविशेष्यकमार्गत्रयगामित्वप्रकारकबोधकत्वं कार्यताव
च्छेदकं॥ तत्र विशेषणीभूतमार्गत्रयगामित्वांशस्यैव प्रकृतोपकारकत्वात्॥ एवं चतुर्णां पुरुषार्था
नां दाता देवश्चतुर्भुजः इत्यत्रापि विशेषणीभूतं भुजचतुष्टयत्वमेव तत्त्वमिति॥ कुरंगीदृक्स्तेऽगरमान्वकं
लिखितं हैहयाधिपः॥ द्रष्टुमारब्धऽलेः साक्षात्कारहूमेतेक्के तेगुरवाः॥ इत्यत्र प्रकृतोपयादकयोगिका
र्थविरहात्कथं परिकरांतर्भाव इति चेत्॥ न हि सहस्रमुखादिपदानामत्राभावात्॥ विशेष्यस्यापि साभि

प्रायत्वाभावात्कंपपरिकरांकुरोपीत्यवधार्यतां॥ सहृदस्यमुरवत्वाशेषतांगिरादिपदानां तात्पर्यमिति
चेत् नूनमिदं विशेषणस्य साभिप्रायत्वमेव संभवति॥ पूर्वांगीकृत्वे रूपविशेषणांशेनैव तत्र शास्त्रे पातं
श्रुतस्य च योगरूढपदस्य लेशिऽवयवार्थस्य प्रकृतोपकारतायां कश्चित्तेनैव प्रकृतोपकारस्य विशेष
स्य च प्रतीतिसिद्धेः॥ यथा॥ मध्ये निजस्य वलनशेषमवर्जनीयमनन्यस्य मूर्द्धि विनिवेश्य वहिर्भुजंभुजः॥
आविश्य देवरसनानि महाकवीनां देवीगिरामपि तव स्तन मातनोति॥ अत्र देवीगिरामित्यज्ञानेनावि
द्याविषयाधिष्ठितत्वस्य सरस्वतीत्वेन च बोधस्य सिद्धिः॥ यत्र तु रूढार्थवाचकपदांतरमपि युज्येतेत
नावयवार्थमात्रपरत्वमेव तस्य॥ यथा॥ उत्थस्थगोरूढविके दलकोमलानां उन्निद्रशोणनलिनोदरसो
दरार्णा॥ प्राकृतवाधरस्वाम अवलोकनेन नालं सहस्रनयनः सकृशाधिपतिर्मे॥ अत्र सहस्रनयनेति दर्श
न सामर्थ्ये ज्ञनेपि तस्य नरेंद्रपरत्वं॥ इत्वपर्यायोनरूत्यापत्तेः॥ अत एव तवप्रसादात्कुसुमायुधोपि सह
यमेकं मधुमेव लब्धाहि॥ कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोन्ये॥ इत्यत्र पिनाकपाणि

पदेनायुधहंडत्वमात्रप्रतीत्यापुनर्हरपदप्रयोगवत॥ कुसुमायुधपदेनतदसारत्वप्रतीत्यास्मरवाचकपदप्रयो
गाभावादनुपपत्तिमाशंक्यनतथापुनर्मधुसूदनाक्षिप्ताहंपदस्यस्मरवाचकत्वमस्त्येवेतिसाहित्यचिंतामणिकारो
क्तेनेनियमाभिप्रायकमितिस्वयमेवदीक्षितैर्वृत्तिवार्तिकेप्रतिपादितं॥ तस्मात्प्रयोगेदृष्टत्वाद्दोषप्रयोगेदृष्टत्वात्सिम
सहस्रेपूरकत्वमेवप्रकृतोपकारकमतोनविशेषणासाभिप्रायत्वक्षतिरितिसिद्धं॥ अयंतुविशेष॥ अयंतुवि
शेषणांसाक्षादेवप्रकृतोपकारकंक्वचित्प्रकृतोपकारकमर्थांतरमाक्षिप्येति॥ विशेषणापदमात्रसंसर्गाति
रिक्तविषयपरं॥ तेनविशेष्यविशेषणयोरभयसाभिप्रायत्वेपिपरिकरएवेतित्वस्माकंप्रतिभात्यानुरूमापन्नैः
पक्षइत्यलंभूयसा॥ इतिपरिकरः॥ २९॥ व्याजोक्तिर्विशदीभवदर्थस्यापह्नुतिर्भिषतः॥ अप्रकाशस्यस्यार्थस्यक
थंचिद्धिभावनप्रसंगेसतिकेनचिल्लेशेनतदपह्नवोव्याजोक्तिरित्यर्थः॥ यथा॥ स्वसंकुचद्विहितधृतिसुहृदोनि
देतदायातरसाक्षिप्तविक्रमेतिसखिपुनःस्वापोविधेयोमया॥ आरोग्याकृष्णमरतायकेरागहरादत्रास्तिलमा
नत्रयतीममातन्वतीमानीरीनरवैःखरैःकृतवतीकांकांनमेदुःशासम॥ यथावा॥ मागहेंकुसुमानिचेत्तमयैवदंदे ६१

१४६

नैमाल्लती निःशंकं यद्धः कपोतनतरुराजीछुल्कारमुख्यस्यति॥ व्यक्तं तत्र निरंतरं मधुलिहो माद्यंति कपानोत्सुका दुंबीराः
कतिनैव रष्ठुमधरं धावंति वामाशया॥ उभयत्रापि न रवक्षता द्विरदीनेन स्वयापि चार प्रवाद प्राक घ स्यात्संस्तत्र तु
मितिलिंगमूता नेरवक्षताद यत्र क प्रकारे रानि गूहिता॥ यत्तु दंपत्या निशि जल्पतो गृहशुके नाकर्णितं यद्वचस्तस्या
तद्गुरुसन्निधौ निगदितं श्रुत्वैव तारं वधूः॥ कर्णालंकृतिपद्मरागशकलं विन्यस्य चंचोः पुरो व्रीडार्ता प्र
करोति दाडिमफलव्याजेन वाग्वंधनं॥ इत्यत्र छेकोक्तिरलंकारः॥ व्याजोक्तौ वचसा गोपने रष्ट क्रियया येति वह्णुयो भेद इति
तत्र॥ व्याजोक्तिलक्षणमस्या भयसाधारणपातः॥ तत्रोक्तिनिवेशस्य गोपनस्य परा हतत्वात्॥ अन्यथा प्रकाशितरेरागो
पनस्थले छेकोक्तेरांतरत्वप्रसंगात्॥ तथापि तुल्यरुचिषा...वेशस्य स्तुवचत्वादिति दिक्॥ पृष्टमपृष्टं वोक्तं यदन्यव्य
पि वाचकं वा॥ फलेनीतरव्यपोहं परिसंख्या सा तु संख्याता॥ यदुक्तस्तु अभिहितं सत् अन्यव्यवच्छेदं फलति सा परिसंख्येति
लक्षणोक्तिः॥ अभिधानेन द्विधा॥ प्रश्नपूर्वकं तद्भिन्नं च व्यवच्छेद्योपि द्विविधः॥ व्यंग्यो वाच्यश्चेति चत्वारो भेदाः इत्य
र्थः॥ यद्यपि पारिसिक प्राप्त्यर्थोः निवर्तको नियमः॥ नित्यप्राप्तविषयकान्यव्यावृत्तिः फलकस्तु परिसंख्येति मीमां

सकमर्था दृश्यत एवापि सोपाधिकनित्यत्वविशेषणामूत्रं प्रयोजनकाभावादविवक्षितत्वान्नियमोपि
परिसंख्यापरे नोच्यते॥ अतएव पंचपंचनखाभक्ष्या इति परिसंख्यायां नियमपरेनोक्तिः महाभाष्ये
पि दृश्यते॥ अत्र प्रश्नपूर्वकाभिधाने व्यंग्यव्यवच्छेद्ये यथासंख्यम्॥ कार्या कुत्र निजेष्टसाधनमतिः साधीय
सां संगमे किं भूयः परिभावनीयमसकृत्त्यास्नं प्रबोधावहं॥ छित्त्वं कुत्र भवेदस्य मन्यविषयाद्राकृष्य
रुद्रीश्वरेधन्ना कुत्र विधीय तया संसारतो मोक्षदो॥ अत्र स्त्रीसंगमादिव्यवच्छेदो व्यंग्यः॥ तत्रैव
वाच्यव्यवच्छेदो यथासंख्यम्॥ दोषाद्रावनतः क्व यातिगुरुतां वारेषु नो लौकिके गौरवं क्व गुणाय सा
रसदृशां नेत्रेषु नो चेतसि॥ कुत्र श्लाघ्यतरं शिरः प्रणायनं देवेषु ने वा हि ते वा गर्भं गः क्व सुखायते प्रिय
जनाश्लेषेषु नो संसृष्टिः॥ अत्र लौकिकव्यवहारादिव्यवच्छेदो वाच्यः॥ अत्र प्रश्नपूर्वकाभिधाने आद्यो
भेदो यथा॥ सोऽन्यो जनोऽन्यत्वेतं मित्रं जशिशांतरं वसयो॥ तं रूपं जनस्य गुणानां विरागोयत्स्य धर्मेण॥
अयहस्ताच्यितं वार्थीनेत्वन्याधीनद्रत्यादिव्यवच्छेदो व्यंग्यः॥ तत्रैव द्वितीयभेदो यथा॥ दीर्घीवं

दनमालिकाविरचिता दृष्ट्यैव नेन्दीवरैः पुष्पाणां प्रकरः स्मितेन रचितो नो कुंदजात्यादिभिः॥ दत्तः स्वे
दमुचा पयोधरयुगेनार्घ्यो न कुंभांभसा स्वैरेवावयवैः प्रियस्य विशतस्तन्व्या कृतं मंगलं॥ अत्र एवकार
व्यवच्छेद्याः इंदीवराद्याः शाब्दाः॥ यथा वा॥ दानेन पाणिर्न तु कंकणेन श्रोत्रं श्रुतेनैव न कुंडलेन॥ विभा
ति कायः करुणापराणां परोपकारेण न चंदनेन॥ अत्र पाण्यादिशोभासाधनत्वाभावादार्थाः कंक
णादयो बोध्याः॥ पूर्वं रूपमागर्भमिदं तु शुद्धमिति विशेषः॥ केचित्तु व्याख्यातारस्त्वर्थगाम्भीर्यमेवालंकारोऽ
न्यथा तु शुद्धपरिसंख्यामात्रं॥ अतो व्यंग्ये व्यवच्छेद्ये भेदद्वयमेवेति वदंति॥ पंचपंचनखा भक्ष्या इ
त्यादीनां त्वचमत्कारित्वान्नालंकार इति ध्येयम्॥ इति परिसंख्या॥ कारणमाला॥ पूर्वं पूर्वं कार्यं य
थोत्तरं हेतो॥ प्रथमं कार्यत्वापन्नस्य पश्चादन्यं प्रति हेतुमित्येवरीत्या॥ अत्र कार्यकारणभावाव
लंब्यते सा कारणमाला॥ यथा॥ दारिद्र्यात् ह्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो निस्तेजाः परिभूय
ते परिभवान्निर्वेदमापद्यते॥ निर्विण्णः शुचमेति शोकविहतो बुद्ध्या परित्यज्यते निर्बुद्धिः क्षयमेत्यहो नि

घनता सर्वोपदशमास्पदम्॥ अत्र दौर्जन्यस्य लक्ष्मीनाशे तस्य तेजोनाशे तस्य परिभवे हेतुरन
मित्यादिरीत्या मालात्वमेव यथोत्तरोत्तरस्य पूर्वपूर्वहेतुत्वमुच्यते तत्रापीयं॥ इति कारण
माला॥ अन्योन्यं वस्तुनोः परस्परोत्कर्षहेतुत्वे॥ स्यादन्योन्यं॥ यथा॥ नलेन भायाः शशिना निशी
थत्वया सभा भाया त्रिशया शशी वा॥ परस्परं तत्कृतगुणविधाता योग्यामुपास्ते नु युवां कुकस्य॥
यथा वा॥ कंठस्य तस्याः स्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य॥ अन्योन्यशोभाजननाद्ब
भूव साधारणो भूषणभूष्यभावः॥ क्वचित्तुल्यो व्यासंकीर्णमपि॥ यथा॥ चंदुज्जोआस रामए
रामये सा चंदा अवोराउ धाहि अवसरो॥ दोहिं वि तेहिं मअ रोमम अशो राउ दोवि तेशि आअ
इअ भूमिं॥ क्वचिदुपमा[illegible]संकीर्णं॥ यथा॥ इतरेतरशोभायै संयोगो युवयोः किल॥ नव चंद्रकलास
र्वं जटामुकुटयोरिव॥ क्वचित्सोपकारसंकीर्णं परस्परोपकारस्वरूपमपि॥ यथा॥ उद्धद्धोपि अ
इअलं जह जह विरह हविरलं गुली चिरंपहि॥ उं बालि अवितहतहधारंत राउ अवितहराउ इइ॥ अ

अ. को.
१४८

148

रयां प्रकृतोऽस्य कायाः प्रपालिकायाः स्वांगुलीविरलीकरणेन पथिकेनोपकारः कृतः॥ तेनैव च प्रपालि
कामुखावलोकनेऽस्यापि ~~स्वांगुलीविरलीकरणेना~~ सिद्धा पथिकोपकारस्यापि सिद्धिः॥ एवं प्रपालिका
कर्तृकधारातनूकरणेन पथिकोपकारस्यैव प्रपालिकोपकारस्यापि पथिकेन प्रपालिकामुखावलोकन
वर्त्तया पथिकमुखावलोकनस्यापि सिद्धेरिति दीक्षिताः॥ रसगंगाधरकृतस्तु॥ स्वव्यधिकरणव्या
पारसाध्यस्यैव परस्परोपकारस्य चमत्काराधायकत्वं॥ न तु स्वसमानाधिकरणव्यापारसाध्यस्या
पि तुषारशीतलीकरणावत्स्वव्यापारसाध्यस्योपकारस्य चमत्कारकत्वात् अतो नेदमन्योन्यान्तर
मित्याहुः॥ इत्यन्योन्यं॥ उत्तरमात्रात्प्रश्नोन्नयने स्यादुत्तरं नाम॥ यत्र प्रतिवाक्यस्य वशादेव प्रश्नवाक्यं
कल्प्यते तदुत्तरं नामालंकारः॥ यथा॥ अरोसकपहि अपुकलसवाह कुडुं वे कुसुसि अ वम्माइ॥ अस्य वा
हपु आह हिरोसुधसंराणा मेति॥ अत्रान्येकुव्याधकुटुंबे कुतुक्ख बमो हि म समापेक्षं ते तानि संतिनवा
इति पथिकवाक्यं कल्प्यते॥ नैवेदं काव्यलिंगमेव॥ उत्तरस्य प्रश्नहेतुत्वादिति वाच्यम्॥ उत्तरस्य प्रश्नजन
कत्वाभावात्॥ प्रश्नात्पूर्वं तन्निर्ज्ञातो यथा दकस्यैव तद्विषयत्वव्यवस्यापनान्नतु॥ नैवं समयत्नुमानेनैतस्या

रामः
१४८

वोस्तु ॥ यद्यपि उत्तरं तत् तत्प्रकारकपूर्वकमिति व्याप्तिवन्नेनोत्तरस्य प्रश्नज्ञापकत्वादिति वाच्यं ॥ साध्यसाधनयोः सामा
नाधिकरण्यस्यैवानुमानप्रवृत्तेः ॥ महानसे धूमदर्शनेन पर्वतीयवह्न्यनुमितेरभावात् ॥ इह च प्रश्नोत्तरयोर्व्यधि
करणत्वादिति अतिरिक्तत्वमेवोचितम् ॥ न च एतदुत्तराव्यवहितपूर्वकालः प्रश्नवान् व्याधिकरणोऽपि उत्तराव्यवहित
पूर्वकालत्वान्मदुत्तराव्यवहितपूर्वकालवदित्यनुमित्यास्यादस्य सिद्धिः स्यादिति चेत् न यत्किंचित्प्रश्नवा
व्याधिकरणत्वसिद्धावप्यस्मात्तरप्रश्नाप्रतीतत्वात् ॥ प्रश्नोत्तरं किंचित्कालविलंबेनोक्तस्य लेख्यमिचारात् ॥ न चैतत्
प्रश्नविषयजिज्ञासानिवर्तकवाक्यान्तराव्यवहितत्वमेवाव्यवहितत्वमेवाव्यवहितपूर्वत्वमेव विवक्षितमिति
वाच्यं ॥ तथापि प्रश्नस्य धर्मिविशेषनिष्ठत्वप्रतीत्यनुपपत्तेः ॥ अथ एतदुत्तरवाक्यजन्यबोधवत्प्रकारके धर्मिवि
शेष्यकं ॥ एतत्पूर्वकालावच्छिन्नप्रश्नकर्ता ॥ उत्तरवाक्यबोधजन्यनिवृत्तिप्रतियोगीच्छावत्वात् ॥ इत्यनुमितिरस्तु ॥
न च हेत्वसिद्धिः ॥ एतदुत्तरवाक्यं परकीयजिज्ञासानिवर्तकत्वेन प्रयुक्तं ॥ उत्तरवाक्यत्वात् मदुत्तरवाक्यवदिति तत्सि
द्धेः ॥ न चैवमपि प्रश्नवाक्यविशेषस्य स्वरूपासिद्धसंभवः ॥ तादृशस्यैव बोधादिति वाच्यं ॥ वाक्यकल्पनपक्षेपि अर्थवि
शेषस्य विवक्षिततया वाक्यविशेषकल्पने नियमाभावात् ॥ आचारानुमीयमानस्मृत्यादौ आनुपूर्वीविशे

धानवद्देदेपि तादृशार्थबोधकं यस्य पद्यवाक्यमुपस्थितं तस्यैव कल्पनवद्व्यापि समानं॥ श्रूयमाणो तरेयादृ
शो ध्वनिस्तत्र संभवस्तदनुकूलस्यैव प्रश्नस्यानुमितित्वासिद्धेः॥ न चैतादृशव्याप्तिज्ञानविधुराणामपि प्रश्नक
ल्पनोदयात्रैवमितिवाच्यम्॥ प्रश्नं विना नोत्तरानुपपत्तिरिति ज्ञानाभाववतां प्रश्नोत्रयनाभावात्॥ अनुप
पत्तिज्ञाने सति तत्तस्यैव व्याप्तिज्ञानस्वरूपत्वात्॥ यथोक्तं कुसुमांजलौ गवार्थैः॥ अनियम्यस्य तादृक्ति नो कृति
र्नानियंतोपपातकद्धि॥ त [illegible] त्कपक्षस्यानुमाद्गे ददाति चेत्॥ उच्यते॥ साध्यसाधनयोर्व्याप्त्यादीनां च शाब्द
त्वेप्यनुमानालंकाराभ्युपगमात्॥ अनुमानं तु तत्यत्साध्यसाधनयोर्वचः इत्यनल्पादृशार्थलाभात्॥ ये
तु कवि निबद्धप्रसत्वेतरनिष्ठामेवं अनुमितिरनुमानालंकारमिच्छंति तन्मते त्वेतत्प्रसंगएव नास्ति॥
व्याधीपधिकृयोः प्रश्नज्ञानसत्वेनानुमित्यनुदयादित्तिदिक्॥ उत्तरांतरमाह॥ प्रश्नोलोकाविदितोत्तरस्य
तत्रासकृत्प्रोक्तौ॥ प्रश्नेत्तदुत्तरत्वेन लोकेऽप्रसिद्धं यदुत्तरं असकृत्कल्प्यते तदप्युत्तरमित्यर्थः॥ असकृदि
ति सकृदुक्तिव्यवच्छेदः॥ बहुत्वं प्रश्नोत्तराणामविवक्षितं॥ नत्वेकस्मिन्नेव प्रश्ने उत्तराणामिति॥ यथा॥ किं कू
रं स्त्रीहृदयं किं गृहिणः प्रियस्य का यदारत्नाः॥ कः कामः संकल्पः किं दुःकरसाधनं प्रज्ञा॥ अत्र स्त्रीहृदय

नांकुरत्वादिकं लोके प्रसिद्धमेवोत्तरत्वेनोक्तं ॥ यथा वा ॥ संस्थानः सविदग्धसंसदि सदागदे
त्पण्डिते यतो तं रसस्थ मधिस्मरस्य विशिखा मुग्धेषि गानो स्मर्त्तवा ॥ यः किं मधितिनाध रंतव कंथं
हेमेति न त्वहृदुः कीदृशमस्य घेति पृच्छति गिरं दत्ते न तेनोत्तरं ॥ अत्र किमधित्यादि प्रश्नस्याधरादि
१४ कमुत्तरं प्रसिद्धमेव निबद्धं ॥ न तु प्रश्नपरिसंख्यातोस्य किमेरक मितिते ह ॥ अश्लीलं ॥ तत्रोत्त
रस्य लोकप्रसिद्धोत्तरविषयत्वमप्रयोजनोत्तरविरोधो न्यथा व्यावृत्तावेव तात्पर्यं ॥ अत्र त्व
प्रसिद्धविषयत्वादुत्तरस्य स्वार्थ इव वेति ॥ इत्युत्तरं ॥ प्रतिभातिशयाज्ञातो यथाकारेङ्गितादर्थः ॥
विशदीक्रियते न्यस्मै तत्थैव तत्सूक्ष्ममित्युक्तं ॥ आकारः संस्थानविशेषः ॥ इङ्गितं नेत्रहस्तादिभंग्या
दि ॥ ततो यथाकृतमाहिमिर्दुर्बोधमसंबासनाविशेषपरिपाकाद्विज्ञायदुर्लक्ष्यप्रकारेणैव य
दन्यस्मै तत्प्रकाश्यं क्रियते तत्सूक्ष्ममित्यर्थः ॥ आद्यं यथा ॥ संवाहनासुहरसतो सिश्राद्येतेशालतुद्धु
करेल मंबं ॥ चलरोनविद्धमाइ हेव ललेणमस्सु वहिंध्वेतिरंता ॥ अत्र नायकहस्तादिलाक्षारसस्पर्शयो
गेहस्वाद्धितल सुरतमभिज्ञायफलेबराणं तक्रूरतास्पविक्रमादित्य साम्यमभिधाय नायकायत तत्प्रका

शानं कृतं॥ किंयत्र त्रैलोदनमानयनं किंयत्कौस्तुभप्रहृदगतागतेन यामा॥ अहं किमिव पश्यामि किं मे ध्यसीति तां
व्यधत्त नेमं किलेलक्ष्येयानन म॥ अथ स्वामिमुखं नायकाभिमुखं वकरव्यापारे॥ किं त्वं मत्समीपमाया
स्यसि किं वाहं त्वत्समीपमायास्यामीति नायकाभिप्रायमाकलय्य नायिकया मुखवनमनेन त्वयैवागंत
व्यमिति सूचितं॥ एवं अहर्निशावेति रतायप्रदत्ते कमेसाशीतो समकरायंराहिदे॥ ह्रियाविदग्धा द्वि
लतत्रिविधिनी व्यधत्त संध्यामुखे दधरे गलितिमिमादावपि वोध्यम्॥ इति सूक्ष्मम्॥ सारस्तु पूर्वपूर्वोत्कृ
कर्षितस्तूत्तरोत्तरे प्रोक्तः॥ यत्रोत्तरोत्तरस्य पूर्वपूर्वप्रतियोगिकोत्कर्षवत्त्वं कथ्यते स सारालंकारः॥ यथा॥
लीवल्लीजितयोऽदृश्विवादिते या अप्यादितेयेषु महान् अहं हि॥ किं कर्तुमर्थी यदि सौधिरागा क्वागर्निक
स्या किमतः परापि॥ केचित्तु तत्र स्याभेदेपि उत्कर्षेवोत्तरोत्तरस्योत्कर्षवर्णनेपि सारः॥ यथा॥ जंबीरश्रि
यमतिलंघ्य लीलयैव व्यानम्रीकृतकमनीयहेमकुंभौ॥ नीलांभोरुहनयने भुजाकुचौ ते स्फीतौ ते किल
५८ केनैकोनसांद्रौ॥ पूर्वपूर्वापेक्षया विशिष्टाभ्यां कुचाभ्यां उत्तरोत्तरावस्थाविशिष्टयोस्तयोरेवोत्कर्षः॥
एकाग्रेपि केवगाने काये यस्मिन्निति रूपपर्यायस्तु मध्यत्वप्रतीयते तथाप्युत्कर्षरूपसारस्याप्यनन्य

व्याप्तिसिद्धत्वोरङ्गीकार इति वदन्ति॥ नन्वप्रथमक्षितकं जं कोरकाभावप्रसङ्गोऽनुभूयके तु कानो॥ अथ तु ना
यत्तु कुत्रचित्तेन दर्शितेन करिष्यावकं मलीलां॥ तन्नितान्तयायोरहरदोषद्वयोरिन्द्रियालकाधीनभवाद्विशेषः
स्मित्यः॥ अयं चालंकारो वैदर्भीदृश्यते॥ तथा च कठवल्लीश्रुतिदृश्यते॥ इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः॥ पुरुषान्न परं किंचित्सा काष्ठा
सा परा गतिः॥ ३॥ हेतुव्यधिकरणस्य कार्यवैत्साव संगतिः प्रोक्ता॥ इह खलु कार्यकारणभावः सामाधि ना५
करणयोरेव धर्मिणोः प्रसिद्धः॥ कार्यतावच्छेदकसंबन्धेन कार्याधिकरणे वर्तमानस्य कारणतावच्छेदकावच्छि
न्नस्य प्रतियोगिताकाभावस्य प्रतियोगितानवच्छेदकधर्मवत्त्वस्य कारणपदार्थत्वात्॥ पदार्थान्तरत्वमते
पितद्वेवतत्कल्पनात्॥ न च कारणं विना कार्यानुपपत्तिः॥ समानाधिकरणकारणान्तरस्येशाविरोधसमाधा
श्लो ६ नात्॥ यथा॥ जातस्ते निशि जागरो मम दृशोर्नेत्रांजनं मीलितं मानिनिः पीतं भवता मधु प्रविततं ताम्बूलरीतं मम मनः॥
भ्राम्यत भृंगघनेनि कुंजभवने लब्धं त्वया श्रीफलं पंचेषुणा रेषमामपरस्य चन्द्रैः शरैः कुंतिभ॥ यथा श्रीरुद्र
वंद्रदेवानां॥ दोलाखेलनमातनोति भवती दृष्टा सरोला यते वास स्वकेलवचयो नेविंदति पदक्षोभं स वाविंदति॥ त१

अ.को.
१५१
151

कीनावेगपरिक्रमोवपुषितेहष्ठास्खेरंगतस्त्वभूयोविद्रतासिमेवसफुनः किंवाविधेयंवरः॥ परिक्रमशावेना
ग्रंविवक्षितं॥ प्रथमे क्रोधजन्यशोणिमेकामरूपरोलामेरोमवक्षितायारोलारखेलनवैयधिकरण्यभाव
रोलासंयोगरूपकारणतावच्छेदकसंबंधाभावोपिहवेत्यनेनोक्तःशेषः॥ यथा वा॥ सन्यासमभेकृतकौचीज
होडुकूलेनितंबमवलोक्य॥ तस्याजरागमधरोमुक्तिमुरीचकार चिकुरः॥ अत्र मुक्तिरूपेशकार्यैलाव
पारागं वैयधिकरण्यं॥ तेषामपिपरस्परनिष्ठकार्यप्रतियोगिककारणावैयधिकरण्यमितिविशेषः॥
कचित्मालारूपाययथा॥ वधीमृजातानवयोवनश्रीराशावधूः प्रोष्ठपयोधराभृत्॥ पुष्पोद्गमोजायतकेत
कीनां वभूवरस्सरघतमास्तदिन्यः॥ कचिद्संगतिर्माधानगर्भापि॥ यथा॥ अत्र कामारोहासिद्धिघंटीघीसं
कल्पसोपानततितरीयाम्॥ भ्वासाम्सवर्षात्यधिकं पुनर्यत्भ्यानातवत्वन्मयतामवाप्य॥ अत्र सोपानारोह
रांमेभ्यो॥ भ्वासाम्तुनलेइतिवैयधिकरण्यं॥ तत्रनलेस्यमेमीनादात्म्यमुपपादकनयाउपन्यस्तम्॥ किंवा
चहेतुपरंप्रयोजकपरमेवाभिमतं॥ तथा च सोपानारोहणागमक्रमस्य च भ्वासेहेतुत्वमिति॥ आरोहणा शिव ४
योभ्वासयोरप्यसंगतिरुक्ता॥ ननु कारणाभावेपिकार्योत्पत्तिरूपायां विभावनायामेवास्यांतर्भावइतिच

राम:
१५१

तेन॥ तत्र कारणाधिकरणवृत्त्यभावप्रतियोगित्वं कारणस्योच्यते इह तु कार्याभाववद्वृत्तित्वं कारणस्येति दोषा
त्॥ किं च तत्र कारणतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताककारणतावच्छेदकावच्छिन्नाभावसत्त्वं॥ इह तु कारणताव
च्छेदकसंबंधाभावमात्रं विरोधस्फोरकमिति विशेषात्॥ नन्वेवमपि विरोधालंकारालंकृतो मे इति चेत्॥ अत्र ब्रूमः॥
तत्रैकत्राधिकरणे हेतुयोः संबंधाद्विरोधभानम्॥ इह त्वधिकरणद्वयादिति॥ यत्तु केश्चिदुक्तं॥ इहापि तन्न कार्यता
वच्छेदकधर्मे तत्कारणवैयधिकरण्यरूपयोर्धर्मयोरेकस्मिन्कार्यरूपेऽधिकरणे संबंधादेव विरोधप्रतिभानोत्प
त्तेरेवं दृष्टं॥ किं तु विरोधे हेत्वन्तरविमर्शं विनैव विरोधप्रतिभानमिह तु तन्निविमर्शपूर्वकमेवेति विशेष इति॥ तच्चि
न्त्यम्॥ कारणवैयधिकरण्यस्य कार्यतावच्छेदकसामानाधिकरण्यप्रतीतेर्विरोधज्ञानहेतुत्वे मानाभावात्॥ का
रणाभावस्य कार्यसामानाधिकरण्यसंभवेऽपि कार्यनिष्ठविरोधप्रतीतेस्तेनानुपपादनात्॥ कारणाभाववद्वृत्ति
त्वरूपस्य तस्य विरोधात्मकत्वात्॥ न च कार्याधिकरणवृत्तित्वघटनां विरोधस्फोरकम्॥ कार्यनिष्ठत्वेनोक्तस्वरूपे वि
रोध इति वाच्यम्॥ द्वयोरपि समानवित्तिवेद्यत्वाद्धि निगमकाभावात्॥ कारणाभावकार्योभयाधिकरणत्वे कार्याधिक घि १
रणनिष्ठविरोधभासकमिति त्वनाशंक्यमेव॥ कारणाभावकार्ययोर्विरोधज्ञानेन तस्यैवासिद्धेः॥ किं निसादिकमपि

नपुंसकं॥ किंसत्त्वप्रकरत्वरः स्मारो तावोऽन्यत्र विमर्शस्मिन्नाविरोधानवभासात्॥ तस्मात् यत्र किंचिद्भाति देकं प्रबुद्धावि
रोधस्फूर्तिस्तन्मात्रासंग्रहः॥ यत्र तु स्वरूपे सौवस्मात् न च विरोध इत्येव विभाग इत्यवधेयम्॥ यत्तु ज्ञप्त्यन्तःकारणात्वं स्यत
तोन्यत्र कृतिस्वरूपा॥ अन्यत्कन्तु प्रवृत्तस्य तद्धि रूढकृतिस्वरूपा॥ अपारिजातां च हृद्यां विद्धीयन्यान्तपाकृपाः॥ गोचोद्गार
प्रवृत्तोपि गोचोद्गारं दृप्तरावृतो॥ इति मे दृढयमत्र हितो॥ तत्र यत्र विशेष्यतावच्छेदकसम्बन्धेन अपारिजातत्वत्वप्रकारिका
इच्छा॥ तत्र विशेष्यतावच्छेदकतासंबंधेन अपारिजातत्वप्रकारिकाकृतिरिति॥ प्रकृते च उक्तसंबंधेन इच्छाप्रतिपित्सेव॥
अपारिजातत्वप्रकारककृतिः स्वाङ्ग इति वैयधिकरण्यस्य संस्थान॥ एवं॥ त्वत्तव दुःखं इति सपत्नविलासिनीनां स्मरधाम
वैत्यभिन वाप्रुगणे केनीरा नेत्रे कुंकुमयोर्हरूपत्रवल्ली चोलेऽङ्कसिंदूरतिलकं करपल्लवे च॥ इत्यत्रापि॥ स्मरधामतासंबं
धेन केकरासंयोगं प्रति स्मर्यतासंबंधेन हस्तादेरकारणत्वात् तथाहस्तत्वकेंकरायोर्वैयधिकरण्यमवसेयम्॥ तथा
गोचोद्गारप्रवृत्तोपीत्यत्र॥ मोहं जगत्त्रयभुवामपनेतुमेतदालिख्य रूपमखिलेश्वरदेहभाजा:॥ निःसीमकान्तिरसनीर
धिनामुनैव मोहं प्रवर्द्धयसि मुग्धविलासिनीनां॥ इत्यत्रापि गोचोद्गारे मोहप्रवर्द्धनवत्त्वे द्रष्टत्वसंबंधेन तत्र हि विषयकप्र
वृत्तोहं तु तयातद्भावेपिकार्यौत्स्तावि मा वनायामेवांतर्भाव संभवात्। व्यधिकरणत्वसंबंधेन सामानाधिक

राधाभावमात्रस्यैवमभिमतत्वादिति दिक्॥ ९४॥ समाधिमाह॥ भवति समाधिः सुकरे हेत्वन्तरसमवधा
नतः कार्ये॥ विवक्षितस्य कार्यस्य सिद्ध्यर्थमभिमते यो हेतुस्तदतिरिक्तहेतुना कार्यस्य सौकर्यं स
माधिः॥ समाधीयते कार्यमनेनेति कृत्यन्तेः॥ तत्र प्रकृतकारणासंभवे यथा॥ पा- अपदि असस्तपदरो
पुष्टिं पुते समानतं तस्मिन्॥ दृष्ट सरा ह्रमि आह्विहासे घरिणी आशांकेता॥ अत्र मानापनोदनार्थं
प्रगलते पत्योतेनन्दम्भोवेपितं स्पष्ट पुत्र समारोहणात्स्पविलक्षणावेक्षा हासगम्यो मानत्यागः॥
धूविदनारधुरवयथा॥ मानमस्यानिराकर्तुं पादयोर्मे नमस्यतः॥ उपकाराय दिष्ट्येतदुदीर्णं घ
नगर्जितं॥ सोऽकथमत्र तद्धर्माव्यभिचारो हेतुस्य कप्रवृत्तिविषयहेत्वतिरिक्तहेतुना कार्योपकाराधानं
उपकारश्चतदुपयुक्तं किंचित्सहकारि सकलसहकारिसमवधायसजातीयान्तरसंवलितत्वा
दिसाधारणः कारणावाहुल्यस्य चाविवक्षितत्वादत्र समुच्चयभेदः॥ कार्यस्य प्रवृत्तिविषयत्वे
फलतोलाभात्॥ काव्यलिंगात्॥ द्वितीयोपकारो यथा॥ चातकस्त्रिचतुरः पयःकणान्याचते जलधरं
पिपासया॥ सोऽपि पूरयति विश्वमंभसा हंत हंत महतामुदारता॥ अत्रालं जलप्रार्थनायामपि जलदानं

क्षेत्रार्थे रागप्रभूतजलसिद्धिः ॥ एतेन प्रहर्षरामलेकार्यान्तरमित्यपास्तं ॥ एवं हि नतत्र साक्षात्तु दृश्यकयत्नमत
रेणाप्यभीष्टार्थलाभः प्रहर्षरो ॥ तत्त्रिविधं ॥ अकस्मादभीप्सितार्थस्य लाभे तत्सिद्धार्थं यत्नेन क्रियमाणेनतो
पायिकवल्लभे लाभे ॥ उपायापायप्रवृत्त्या फललाभे च ॥ क्रमेणोदाहरणानि ॥ तिरस्कृतो रोषवशात्परिष्वङ्गे
प्रियो मृगाक्ष्याः शयितः पराङ्मुखः ॥ किमन्यदिच्छतो साधितिकादिशी कयाकयापि दासुंव्यधिराय सल्लजे ॥ के
लिमंदिरमागतस्य शनकैरालीरपास्येंगितैः सुप्तायाः सहसाः सरोरुहदृशः संवीजनं कुर्वतः ॥ ज्ञानत्याप्यनमि
रायेव कपटव्यामीलिताक्ष्यास्सखि स्मातासीत्यभिधाय वक्षसि तया पाणिर्ममाधीयत ॥ तद्दर्शनोपायविम
र्शनार्थं मया तदालीसदनं गतेन ॥ तत्रैव सा लब्धा तत्पक्ष्मलाक्षी दासायरागी मर्चयितुं प्रयाता क्षितौ ॥ अत्रे
दं चिन्त्यते ॥ उद्देश्यतासंबंधेन प्रवृत्तिविषयस्य पदार्थस्य प्रयोजकत्वमिष्टाविषयत्वप्रयोजकं तदर्थीवच्छि
कार्य ६ न्नस्य हेत्वंतरासिद्धिरितितावद्दृष्टदुष्करीत्या समाधिलक्षणं गां पर्यवसितं ॥ तद्भवदभिमत प्रहर्षरगालं
कारविषयसाधारणमेव ॥ तथाहि ॥ मानत्यागरूपकार्यस्य प्रतिबंधकाभावविधया स्वालिंगनादि प्रयोज
कत्वमेव नायकनिष्ठस्याविषयतायां प्रयोजकं ॥ आलिंगनाय वदि त्रमानत्यागस्य च भयापि हि हेतुः ॥ एवं हिती

यादिभेदेपि योज्यं॥ यथा॥ तत्र ज्ञजनवीक्षणसमये कामुकस्य मानिनिवारणास्यैव मुख्योद्देश्यत्वेन तदानीं तत्साध्य
कुचादिस्पर्शानुपस्थितेरपि॥ तत्र॥ तदापि तदुपपत्तेरावश्यकत्वाद्रत्नपातहेतुद्देश्यस्यैवानुपपत्तेः॥ एवं तृतीयेपितु
पायरूपविमर्षकार्यस्य नायिकादर्शनप्रयोजकत्वे॥ इच्छाविषयत्वप्रयोजकं॥ तदवच्छिन्ननायिकादर्शनस्येहत्वं
तदास्ति छिन्नसत्वात्॥ न च प्रयोज्यतावच्छेदकप्रयोज्येतदुभयं विवक्षितं॥ अतो नासंगतिः॥ एवं लोभाहृतादिकानां
विवेकेनुतकमनिशमदत्या॥ लघुयोगोपपत्तिकशोध्यामच्छेरत्वमहेंद्रनीलमणिः॥ दृत्यत्र च वरादिकानामिच्छाविषय
त्वेवत्वेतरप्राप्तिप्रयोजकत्वं प्रयोज्यं॥ तत्प्राप्त्यवच्छिन्नं च प्रयोजकता संबंधेन नीलमणिरूपमपि कार्यमिति॥ सा
ध्यवसानमत्र कार्यमिति तु विशेषः॥ एवं उष्णित्यप्रचममधःस्थितमगास्तीपुच्छ्यो घंक्रितविदर्पणहीतुकामा॥ आ
रोहंपदमरधारशोकयष्ट्या वा मूलेषु नरपितेन पुष्पितामूलता॥ इत्यादावपि योज्यं॥ इति समाधिः॥ सममाह॥ अ
न्योन्यसंगमात्रैः संबंध्येते समं तत्स्यात्॥ यत्र परस्परप्रतियोगिकत्वसंबंधानुरूपयोः संबंध उच्यते तत्समं॥ संबंधा
नुरूप्यं हि द्विविधं॥ सतो रतोश्च॥ यथा॥ स्त्रीपुंसव्यतिषंजनं जनयतः पत्युः प्रजानाममूद्भ्यामसः यदि पद्मिनः कि
मनयोर्दांपत्यसंपत्तये॥ आसंसारपुरं पुरं प्रियपुरुषमिथः प्रेमार्षणा क्रीडया याप्येत अप्रतिगाढरागरचनास्त्र

कथं चेतो भवः॥ अथान्यस्त्रीपुरुषसंबंधजननाभ्यासस्याभीमीनले सबंधफलकलो स्यात् तत्संबंधस्यानुरूप्यं त-
भ्यते॥ यथा॥ शरज्ज्योत्स्नाकान्तं कुमुदमिव तन्नेदयितुं सा सुजाता कन्याया[मी]भवतु कृतकृत्यः स च युवा॥ वृत्तीया नन्या-
न्यप्रपञ्चरागरागिनिर्माणनिपुणो विधातुर्व्यापारः फलतु नमनोज्ञस्य भवतु॥ अत्र मालतीमाधवसंबंधानुरू-
प्यस्तुतावकल्पाराशी शक्षेपमालंकारद्वितीयार्थ्यं यस्य मा॥ यथा॥ सधर्मैराजः खलु धर्मशीलया त्वया श्रितिचिन्ता-
तिचिन्तामवाप्तितः॥ ममापि साधुं प्रतिभात्यये कमस्य कास्ति योऽन्यो नहि योग्यसंगमः॥ द्वितीयं यथा॥ सवितुस्तिव-
षापि रहस्तेहीनयः सतमीतमोभिरभिगत्यतता॥ श्रुतिमस्महीभूद्गरोलछवः प्रकृतीर्भवंति मलिनाश्रयतः॥
अत्र लघूनां मलिनाश्रयेणाशकयं स्वभावद्दत्सुकार्यस्योचितं योग्यत्वं॥ संबंधोपि द्विःस्थितकार्यकारणाभावः॥ य-
थागुरौ नयोधे निजकारणास्य न हानिवद्धीकथमेतुवंद्रः॥ यथा च यद्राज्ञि राजवदिहार्यमित्यादि॥ संबं-
धानुपपत्तौ इष्टार्थावाप्तिनिष्ठसम्प्राप्तौ॥ जन्यजनकोभयगुणक्रियाविरोधेपि विषमः स्यात्॥ यत्रात्यंतविल-
क्षणाभूतयोः परस्परं संबंध एवानुपपद्यमानः प्रतीयते स एको विषमः॥ यथा॥ क्व रूढाहेदयमाधिनी-
कवतेविभासनीयमायुधम्॥ क्व तु तीस्मातरं यदुच्यते तरिदं पन्नमपदृश्यते त्वयि॥ अत्र कोमलायुधोत्कट-

व्यपदेशः कार्यकारणाभावसंबंधोऽत्यंतानुपपन्नवद्भासते ॥ अत्र संबंधसामान्याद्धानमुक्तं राहुगम्यमित्यु
न राहुर्गम्यमितितन्नसेकीर्त्यो यथा ॥ यथा ॥ न खलु जेन खलु यातः सन्निधात्यो यमभिप्र-म्बुनि मृगशरीरे
न्दुलशाशाविवाप्रि ॥ भवनेहारिशाकानां जीवितं वातिलोले कचनिधिग्रितनियाता बज्रे सारासहरास्ते ॥ गा
म्याय यथा ॥ राज्ञः प्रियायस्तु हृदे स्वविवाय कार्यी हत्वात्मजानि इति मानसमानमात्यः ॥ दुर्दशीनेन घट तामि
यमध्यनेन धूमग्रहेराविमलाशशिनः कलेव ॥ अत्र दुर्दर्शीनेनेति नंदनविशेषरोन मालती संबंधानर्हते
लाभः ॥ यथा वा ॥ दोःसंदोहवशंवदत्रिभुवनश्रीगर्वसर्वंकषः कैलासोद्धरणप्रचंडचरितो देवः कुबेरानुजः ॥
यत्रायं स्वयमक्षिसेयममरावत्याधिपं याचुरीनीता मर्कटकेन कामपि दशां धिग्दैवमावश्यकम् ॥ प्रथमे
कुस्वरूपे रावणसंबंधानुपपत्तिरथ लंकायां मर्कटकेन दुर्दशासंबंधानुपपत्तिरपि रावणस्य त्रैलोक्याधिपती
तद्विधिष्ठाने नैव तदनुपपत्तेर्भावादिति विशेषः ॥ कथं सर्वगुरोर्हीनाद्गुणावंतं महोजसं ॥ दुर्मेखी स्नुषु रवणा
मेकामयामास राक्षसी ॥ एतेनासंभवार्थानिरूपणे रसमाभ्यवशीनं ॥ कोवेद गोपशिशुकः शैलमुत्पाटयेदिति
अत्र सम्भवस्यालंकारांतरत्वमपास्तं ॥ एतेनैव दृष्टसिद्धपर्यमिष्टे विरोधिक्रियमाराराभिष्टप्रतिकूलार्थावरणं विधि

चालंकारः ॥ यथा ॥ बंधो मुक्त्यै खलु मखमुखान्कुर्वते कर्मपाशानंतः शांत्यै मुनिशतमतानल्पचिंताभजंति ॥ तीर्थे मग्ना
त्यमृभजलदेः पारमारोढुकामाः सर्वं त्मामादिकमिह भव भ्रांतिभाजां नराणां ॥ रूपकास्तं ॥ उक्तिक्लिपाशयोः कार्य
कारणभावादुपपत्तिसमात् ॥ यत्तु ध्वस्तं त्वयः ध्वस्तकावाध्वपंकः ध्वचपंकजमुः ॥ ध्वमगः ध्वचकस्तूरीप्रियश्रिवधा
तुर्विदग्धतां ॥ इत्यादौ नायमलंकारः ॥ वस्तुवृत्तस्य लोकसिद्धत्वेनालंकारयोगात् ॥ कविप्रतिभाकल्पितानामे
वार्थानामलंकारत्वात् ॥ एवं च नांतः खेलंती शशांकस्य मालो कावकिता भुजग्रांतपल्लुमुंगनभय हृद्विंशतिया ॥
शि५ अहो सेवंसीतारशवदननीताकररदेः परीतारक्षोभिः ज्ञपतिरूपणां कामधिरशांहत्यत्रापितधे वा ॥ इतेन ज्ञ
रत्नपानीकेयं छतकनकस्तूरः ध्वसमृगः ध्वस्तकाहारोयं ध्वचसपतगः ध्वयमवला ॥ ध्वतत्कन्यारत्नेललितमिहम
र्तुः ध्वचरथस्वमाकूतं धातानिभृतमिहधाताप्रथयति ॥ इत्यलंकारसर्वस्वकारोदाहरणमपि प्रत्युक्तमिति ॥ त
रमत ॥ तत्राप्युपपत्तेः ॥ कविप्रतिभाकल्पितत्वात् ॥ उक्तिमुक्त्योः संबंधानुपपत्तेर्लोकप्रसिद्धविरहात् प्रत्युतत
त्संबंधस्यैव प्रसिद्धत्वादेवमन्यत्राप्यवगंतव्यः ॥ यत्रैष्यानवाप्तिसहितानिष्टलाभः सहितीयः ॥ यथा ॥ कन्यातस्यव
धायया विषमयीगूढमयुक्तामयारेवात्यर्वतकस्तयाविनिहतोयस्तस्यराज्यार्द्धभाक् ॥ येरीरितस्तुविषेण व प्र

रिगाहिता स्तोरवते घातिता स्तोयस्ये वफलं तिपश्य विविधम्लेयां स्मि मेनीतयः॥ अत्र वंदगृमवधा यैराक्षसेन कृतेहपा
येन केवलं तद्धा मावमात्रं॥ किंतु पर्वतकाटिवध स्तूपानि दृष्टमपि पद्यापा॥ अयं दुग्धांभोधेः पतिरितिगवां पालक
इति स्मितो स्मामि दुग्धोपनयनधियागोपतनयः॥ अनेन प्रत्यहं होधुरविंसतप्यायेन जननीस्तना दप्यस्माकं निजमपि
पयो दुर्लभमभूत्॥ सा नरमेघं कंरं दृमिवारविंदे विंदे तव दूपद पुर्वेति जनेरशेकि॥ देवादकांड परिमृद्रितपुंड
म ४ रीककोशादम्दरहहनिःसरत्यां पुमध्ये॥ सूविभिर्ग्रसितं वपुः कवलितं धूलीभिराच्छ्रशोनीरं प्रेः क्षकवोपमेघ
लपुटैः पक्ष्मद्वये कीलितम्॥ यूत्रां एवमनोरथाः किमपरं कल्याणि केऽप्युतं जीयाः केतकीहि निर्गमपथं जीवत्ल
सौषट्पदः॥ इदं सर्वमपि ह्रपेष्ठानवातुदाहरणं॥ अनेन र्थपरिहार भूयेष्ठानवामो॥ यथा मम॥ त्वंपारितवान्पूयं दे ६
तरादिश्यां प्रेमालसे लोचने दत्त्वा के वरवर्णिनी प्रतितत्याति निहोतु माकोक्षतां॥ त्वं मामेव यदन्यथाधिववसांगृष्ठ व्या १
भक्तंते नमेयत्नहिमोपकमणोस्य दृष्टिः कमियापातो भ्युज्जंगाननेन॥ तत्र नाधिकोत्तरदर्शन रूपानर्थपरिहारा
र्थवचनं प्रपंचेन न केवलं तर्भावमात्रं॥ किंतु गोचरस्वलनमपि॥ इदं च सर्वं स्वनिष्ठेष्टानवमाचुदाहरणं॥ पर
निष्ठत्वे तु यथा॥ यः कल्पितः कुवलतरविरहातुरायाः शैत्याय सांद्रतरचंदनपंकलेपः॥ अंतः सतापमधिकं ज

न यत्स्वदासी दायाकवाद्यपनेकर्दमलेपकस्यां ॥ अत्रनाधिकारीत्पायकल्पिते चंदनलेपेन तापशांत्यभावस्तायोत्कर्ष
स्याद् इष्टार्थानाप्तिविशिष्टत्वं विशेषः ॥ समुद्बयेनोदाहृतं ॥ एकविभाजकतामात्रेणापि वैशिष्ट्यमिति प्रत्येकमाद्याया
पि विद्यमत्वं ॥ तत्र केवलेष्टानवाप्तौ यथा ॥ पंकोद्भवत्वपरिवादभयान्मृगाक्ष्या जातः सरोजयुगलं कुचवेषधारि ॥ शक्यं
न धात्रा विहितं परिहर्तुमस्य मृगयोषितेन घनचंदनपंकयोगः ॥ तत्र केवलानिष्टप्राप्तौ यथा ॥ रिष्टीजराजदिष्टो सरलसहा ५८
वाद्जंवराः प्रविष्टाः ॥ रुअ आरोजं लाकउतं रिअकलियं अद्ध हले हिं ॥ अत्र नायकविषयकानुरागकृतकामावस्था
नरश्च्यानां तदर्शनादीनां लोपेऽपि अन्यानिष्टतद्विषयकज्ञानरूपानिष्टप्राप्तिः ॥ न चेयं विशेषोक्तिरिति वाच्यम् ॥ अ
दर्शनादीनां लक्ष्यादितोऽपि संभवेनानुरागबाधाहेतुत्वाभावात् ॥ तत्प्रकारे योऽत्यभावात् ॥ अदर्शनादेः सत्वेऽपि आ
प्रवासादिना तन्निरोधोऽर्दयात् इति ॥ यथा वा ॥ निजां कुनि र्दग्धमदं गमस्मि धाविधुर्वीक्षति लोद्धनेनास्त्रां ॥ त्व
दास्यतां यास्यति तावतापि किं वधूवधेनैव पुनः कलंकितः ॥ अत्र शशमत्वरूपकलंकस्यान्यस्य संयोगेन नाशसंभ
वेऽपि परिहार्यं यात व्ररूपकलंकप्राप्तिर्लेशः ॥ मत्वेमी ष्वार्थविरुद्धलाभो विषादनालंकारः ॥ यथा ॥ तन्नत्वयाप्रतिभ
न्नमानसतया मतोऽनिवृत्ते जने चेरू कोटिविपादितोऽगलद्दूतिया स्याम्य हृं पंजरात् ॥ इत्यं की रवरेमनोरथमयं पीयूषमा

स्वादयत्यंतः संप्रविवेशाशारणाकरणाकारः प्रतिभासमयीः॥ न प्रत्येवं विषमसंभवः॥ इष्टार्थकारणप्रयो
गाभावात्॥ इष्टार्थसंपुटीकारणे न सहोत्साद्योत्पादकभाववत् क्षणसंसर्गानन्तरूपत्वस्य तत्स्फुरीरादि
ति॥ तद्विन्यं॥ मोक्षरूपेष्टकारणस्येच्छायाः इहापि प्रयोगात्॥ यच्चेच्छायाप्रयोगेपि अनिष्टेतत्र न्याय्य इ
ति चेत्॥ किं ततः॥ इष्टसाधनत्वेन निश्चितात्कारणात् अनिष्टकार्योत्पत्तिरिति विषमस्वरूपाभाव इ
ति चेत् ततः॥ इष्टप्राप्त्यभावविशिष्टानिष्टप्राप्तेरेव तत्स्वरूपत्वात्॥ अनिष्टे इष्टार्थसंपुटीकारणा
जन्यत्वविशेषदोषयोजनाभावात्॥ त्वया च विचारेणालंकारपार्थक्याद्रागद्वेषौ च न स्यातां त्वात्॥
तस्मादिष्टार्थसंपुटयतस्तत्प्राप्त्यभावसहितानिष्टप्राप्तेरेव [illegible]॥ विषममेरस्य शरीरं॥ अ
निष्टप्राप्तिरूपं तत्कारणादन्यतो वेति निश्चय इष्टः॥ विषमस्यैवैतद्रूपमिति तु न निवारयामः॥ न त्वेव
मनन्तरूपसंसर्गरूपविषमसामान्यलक्षणानुपपत्तिः॥ इष्टसाधनत्वेन ज्ञायमानात्कारणादनि
ष्टोत्पत्ताविव तदुत्पाद्योत्पादकसंसर्गस्यानन्तरूपत्वस्फुरणादिति चेत्॥ मैवं॥ इष्टोदयमानिष्टलाभ

योऽरनेनुसः पल्लवस्फुरणाद्देवतद्दुत्पन्नेऽरित्यलेपसवेन॥ यत्र च कार्यकारणभूतधर्मयोर्विरुद्धगुणक्रियाजनकत्वं त
त्र तृतीयः॥ यथा॥ कुधजनकथा ठेयं तनोति नूजन्मनः पितृशितहृदि तृश्याकायाहारजः किलकालिमा॥ शामनय
मुनाक्रोडैः कालैरितत्तमसाधिपारपिपद्मलेखा यात्का याद्भूयते मास्वतः॥ यथा॥ यं प्राप्तूनसहस्रयादुदग्
वत्यादेनखंडकैः कथं सखायानन्वयः स्नुतः किलपितुः साहसमन्विष्यते॥ एतस्योत्तरमध्यनः समजनि त्वत्तेजसांले
पने साहसोरपिपंगुरं छित्रिमिरप्रिमाक्षीभवन्मानुमानः॥ अशेमयत्र समाधानगर्भो यमः॥ प्रथमे प्रयोजकांत
राधीनः॥ द्वितीये कारणस्यापि कार्यगुणावश्यकत्वनाधीनस्य परिहारइति विशेषः॥ प्रुद्धो यथा॥ कथं विधा
तमेधिपाणिपंकजात्तव प्रियाशैत्यमद्गुत्वशिल्पिनः॥ वियोक्ष्यसेवल्लभयेति निर्गतालिपिर्ललाटंतपनिष्ठु
रासरा॥ अत्र हंसीशैत्यमद्गुत्वजननगम्यमत्रहस्तशैत्यमद्गुत्वविरुद्धं॥ तज्जन्यलिपेरुष्णत्वनैष्ठुर्यरूपेणगु
णद्वयमुत्तं॥ क्रियाविरोधे यथा॥ अमअमअंविअहिअअंहस्यात्तुह्णहरासअणाणां॥ वंरमुहहकस्पाशिव
सइअमितहुहरोनहहपआवो॥ अत्र हस्तस्पराजननकत्वं॥ तस्यप्रतापजनकत्वं॥ हस्तप्रतापनिषत्वदाहर

णारहन्मित्ययोर्विरोध इति दिक्॥ ४ ॥ आधारस्याधेयादाधेयस्यापि चाधारात्। यदि वर्ण्यते महत्त्वं तत्कथ्यतेऽधि
कमधिकं द्विधा॥ यत्राधेयापेक्षयान्यूनस्यापि माहात्म्यमाधारस्य महत्तया वर्ण्यते॥ यत्र च आधारापेक्षयाऽल्प
स्याप्याधेयस्य महत्तया वर्ण्यते तत्र द्विविधमधिकालंकारः॥ आधाराधेययोः परस्परापेक्षोत्कर्षोक्तिः॥ एवं चाश्र
यत्वनिरूपकत्वान्यतरसंबंधेनोत्कर्षवदाधारकत्वं॥ तेनैव संबंधादाधेयकत्वं॥ एवमपकर्षनिवेशान्नापी
तिलक्षणाचतुष्टयं पर्यवस्यति॥ प्रथमं यथा॥ अंके केऽपि दर्भैर्द्रुगुरस्य शांकेन संममौ नैषत पासमाज॥ यथा पयो
राशिरगस्त्यहस्ते यथा जगदाजठरे मुरारेः॥ अत्र जनसमाजापेक्षया कुंभनुरस्य महत्त्वं वर्ण्यते॥ द्वितीयं यथा॥
आस्ते दामोदरीयामियमुदरदरी यावदंतस्त्रिलोकी संमातु शक्तिमान्यः प्रथिमभरवशाद्दरेनेतस्य शांति॥
तामेतां पूरयित्वा निरगुरिव मधुध्वंसिनः पांडुपद्मद्वीनितानि॥ १ हि पदशनसनाभीति नाभीपद्मेन॥ अत्रैव
लोक्याधारतया महतोपि भगवदुदरात् यशसां महत्त्वं॥ यथा॥ यौरत्र क्वचिदाश्रिता प्रविततं पातालमत्र क्व
चिल्लोक्याप्यत्रैव धराधरजलाधारावधिर्वर्तते॥ एतत्स्फीतमहो नभः किययदिदं यस्येभिरं काश्रिते दूरे पूरणमस्

स्तु भून्याम इति पद्यमाधिना संगतमिति ॥ सर्वस्वकारोदाहरणमवुक्तं ॥ गगनस्य परमहत्परिमाणता: यावानात्मत्वत्वेन
कविप्रतिभानिर्वर्तितत्वाभावादिति ॥ तत्र ॥ वृत्तिनियामकसंबंधेनाकाशस्य पर्वतादीनामाश्रयतयातदाश्रय
तायाः कविनैव कल्पितत्वात् ॥ आधिक्यं आवेदितं नैव तत्कल्पितत्वस्य चाप्रयोजकत्वात् ॥ यत्र ॥ आलयं तु सूक्ष्मादा
धेयादाधारस्य च सूक्ष्मता ॥ महिमा लोभिकांतेय करे जपवटायते ॥ अंगुलीयकस्य सूक्ष्मपरिमाणत्वेपित
दपेक्षया करस्य सूक्ष्मत्वं वर्णितमिति ॥ अन्याख्यमलंकारांतरमिति ॥ तद्भिन्नत्वे ॥ आधारापेक्षया आधेय
स्य महत्वे कल्पनस्यापाधिकमेदेव पर्यवसानात् ॥ ४८ ॥ इति सूक्ष्मं ॥ आत्मापकारजनकः प्रत्यपकारासम
र्थेन ॥ तत्संबंधापकारे प्रवृत्तमेः प्रत्यनीकमित्युक्तं ॥ यत्र साक्षात्स्वविपक्षं विजेतुमशक्तेन विपक्षसंबंधि
नोऽपकारः क्रियते तत्प्रत्यनीकं ॥ संबंधित्वं च द्विधा ॥ साक्षात्परंपरया च ॥ आद्यं यथा मम ॥ यस्य व्यथाधिज
नकेन दुरास्यदाहो भालेक्षणो निवसता पुरसूदनस्य ॥ तस्य त्वदीयहृदये वसतास्मरेण धूमस्य रोमलति
केति कृतो ग्रहः किं ॥ अत्र रोमावलीवर्णने कामेन स्वदाहकवह्न्यपकाराशक्त्या तज्जन्यधूमनिरोधरूपोऽसि

नः॥ वह्निधूमयोर्जन्यजनकभावरूपसाक्षात्संबंधः॥ उद्धृतं यथा॥ एकेनापातिलम्बापतिवपुषि पदेरणाभि
पीतः पितांति आतातायेन शापहस्ति भुवनतलतोन्येन निर्गासितासि॥ एकोयं वीरभूमद्रुणापतितस्तावतो
स्तो जालपेते स्मातस्तेऽग्नि मा वप्रणाधिनिमधिलंब कोपेविदध्याः॥ अत्र सा जात्यरूप साक्षात्संबंधः॥
निषेधगम्यस्थापकारः॥ द्वितीयं यथा समेव॥ कामेनम्यालूनयनोपरि वैरभाजा प्राले यशैलदुहितृ गति
मानशीला॥ त्वं नीयसे कुसुमसगाधिशरव्यभावं कल्पांतवह्नितेगतैस्त्रा भूताविषदर्शां॥ अत्र स्वप्रतिपक्ष
शिवस्यस्त्रीत्वेन संबंधिन्या भवान्याः साहश्येन संबंधिन्या नायिकाया अप्रकारउक्तः॥ यथा॥ साक्षात्प्रतिप
क्षसंबंधिनोऽप्रकारे॥ तथा संबंधिसंबंधिनाऽस्वसंबंधि प्रतिपक्षस्याप्यकारे एतद्रूपोध्यं॥ यथा॥ हृतस्य यन्मे
वयतेरहस्यंतत्प्राणं मामेवयते मंगवपत॥ तद्वैरि दुध्याद्युधमित्रवद्रुसरव्योविती साववरक्तातन्ने रवस्या॥ अ
त्र मुखेन रवेंदुस्या साहश्यरूपः॥ चंद्रस्य कामेनउद्दीप्योद्दीपकभावरूपः संबंधः॥ कामेन हृदयस्य गिरी
८१· शितारूपइति परंपरासंबंधिनां मुखेन कामवैरिणो हृदयस्य संबंधिनो मन्त्रिणस्यमेदरूपोऽपकारः॥

यथा वा ममैव कृकिन्नणीयरिणाये॥ रंकुान्तराले विषयत्वमपीधिवांसं स्वभानुरिंदुममनुः वहु राः प्रुरायत्॥ त
कंठ कांड परिवर्तनकारणस्य ममैस्यतेन वितनोनिरूजं सउगं॥ अत्र रक्षणप्रयोजनेराद्दु संवंधवता वंद्दूण
स्य संवंधिरद्दु प्रतिपक्षकृष्णकारकः॥ अत्र प्रतिपक्षसाक्षात्संवंधिन इति विशेषः॥ अत्र वदंति॥ हेतूत्प्रेक्षा
न्तरस्मलं कार्यान्तरमयुक्तं॥ सर्वत्र हेतुहेतुमद्भावप्रतीतेः॥ न चात्र हेतुनिश्चयउत्प्रेक्षाभावनायांतु संदेह मात्रमि
ति भेर इति वाच्यं॥ व्यंग्यहेतूत्प्रेक्षायामिवात्र भावेन संभावनाविरहेण निश्चयसंभवेन तद्दुद्भावपत्तेः॥ न चा
त्र प्रतिपक्षगतवलेवत्वस्वगतदुर्वलत्वप्रतीत्या भेर इति वाच्यं॥ तावतापि हेतूत्प्रेक्षाविशेषत्वस्यैव संभवे न त
दतिरिक्तत्वो[illegible]नौचित्यात्॥ पृथ्वीविशेषवैलक्षण्येन घटस्य पृथिव्यतिरिक्तत्वाभावात्॥ इति तद्विद्वचं॥ उ
त्प्रेक्षाविनिर्मुक्तविषयस्य दर्शितत्वात् रत्नताद्दशीहेतुनिर्णयोऽस्त्यात्र॥ न च व्यंग्योत्प्रेक्षाविलयप्रसंगः॥ न हि इवा
दिशब्दप्रयोगाभावे हेत्वनिर्णये निर्णयप्रयोजकत्वेनाभिमतो येनोक्तदोषापत्तिः स्यात्॥ किंत्वत्र किंचिन्निष्ठका
र्यताप्रतियोगिकं॥ यत्कारणमुत्प्रेक्ष्यं तन्निष्ठकार्यतानिरूपितकारणस्याप्यभिधानेन पूर्वकारणनिर्णा
यः॥ उत्प्रेक्षायां तदभावात्॥ तन्निर्णय इति विशेषः स्फुटमेव॥ नन्वेवमुत्प्रेक्ष्यो ममनसहते जातिवैरी निशा

त्रयामिं रोमीरिंदीवरदलदृशानस्य सौंदर्यं स्वरूपः॥ नीतः शांतिं प्रसभमनया वक्त्रकांत्येति हर्षाल्लग्ना मन्ये ललितनतनूते पा
दयोः पद्मलक्ष्मीरित्यत्राधिपद्मस्य लक्ष्म्याः स्वरूपसंबंधे जनकत्वाभिमतहर्षस्यापह्नवे हिंदूदर्योपशमनरूपं कारणा
मकर्ममिति हेतुनिर्णयप्रसंगादिति चेन्नैवं॥ तत्र हेतुनिर्णयस्यामग्न्या सत्यामपि संभावनार्थकपदसमभिव्याहारेणातद
उदयात्॥ न चैवं तत्र मन्ये इति पदपरित्यागे अन्यथोत्प्रेक्षानुपपत्तिः स्याद्रीत्या तत्र हेतुनिर्णयायपत्तेः॥ एवं हस्तन्यस्य तुदाहृते स
स्वरूपकीर्तिमहरद्भुवि यस्य तनुं प्रविष्टहृदयेयमिति॥ त्वयि मत्सरादिव निरस्तदर्पः स्तनराशिरशोति खलु तां मदनोत्वे
विनिर्जितमनोभवरूपः सा च सुंदरि भवत्यनुरक्ता॥ पंचमिति गयदेव शरीरं स्पर्श। ऽयत्यनुशयादिव कामकृत्यादावपि सं
भावनार्थकपदसत्वेन हेतुनिर्णयापत्तिरिति विवेकः॥ ४८॥ सहजनिमित्तधर्मोऽसदृशादन्येन वस्तुना वस्तुनः॥ अपिधीयते
यदेतन्मीलितमाहुः विशेषज्ञाः॥ अत्र धर्मयतरद्वान्निधर्मसमेन धर्मेणायत्पदार्थांतरस्य तिरोधानं॥ तन्मीलितमिति॥
सदांशधर्मस्य द्वैधा॥ स्वाभाविको नैमित्तिकश्चेति द्वैधा भेदः॥ आद्यं यथा मम॥ गोरेषु गंधफलिकागुरावेषु रेषु को
श्मीरसंभवरसेन परिस्फुटेषु॥ विंबाधरेषु नरलंतककरंजितेषु कस्यापि नोद्भवति तत्र तिमालवीपि॥ अत्र सा हृज्जिका
न॥११ भ्यां गौरधरनिष्ठाभ्यां गौरत्वारुणत्वाभ्यां कुंकुमयावकनिष्ठतिरस्कारः॥ अन्त्यं यथा॥ अपहृतः स्वेदभरेकरेत

योऽस्तु पात्रवा हीनत्वेलेखिलं मुहुः॥ इत्यो रधिप्रस्तुतमन्न सात्विकं घनैः समाधीयमानत धूमत्वं घनेः॥ अत्र स्वेदज
लस्य दाने जलेनां गतु कथमेतान्वि दजलस्य धूमत्वे नचा स्नः॥ सात्विक नेत्यास्नः॥ अत्र आद्यस्य सजातीयोऽप्रसा
केषिकत्वं द्वितीयस्य रमत्वस्य विषयस्वकार्यत्वप्रतियोगिककारणता आयकत्वेति रस्कारकत्वम प्राजकं॥ प्रथमे विशे
षणांवे द्विशेष्यमस्योम वत्वसकृते॥ विरहप्रतियोगीवानदाने कावलिसोत्ता॥ यच प्रथमे प्रविशेषणीभूतस्य प्रथ्वाद्वि
शेष्यत्वे साश्कां॥ यत्र च प्रथमतः अभावप्रतियोगिनो न्यप्रतियोगिकाभावाधिकरणां सापरे ति द्विधेकावली॥ एक
वारमात्रं तद्रूपादाने चमत्कारभावात॥ अस्य रूढिरिति बहुत्वपरे॥ तन्मोमयज्ञापि वोध्यं॥ अध्याय या॥ मिराघई तावन्तो आ
वर्त्तंतरभं मेत मिसामहिपरे॥ महिहरसंभम्मविहृउविद्गु आधिः अनसलिलोधि॥ अनद्रुअ हीं॥ प्रविताक्षमो रंभाः निय
तविपाकानिकमीरिशिः॥ अतिविषमास्य विपाका वैषम्यं दुःसहं नितरां॥ विशेष्यत्वे चात्र अन्यनिष्ठप्रकारतानिरू
